विद्याकृतमुपाधिकृतं वाभेदमाश्रित्यैते निर्देशाः इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेपि नोपजायन्ते प्रलये न व्यथन्ति च तथावि
द्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीत्युक्तो वस्तव्यपदेशात् उत्तराच्चेदाविर्भूतस्वरूपस्तु संपद्याविर्भावः स्वेन शब्दात् ज
गद्व्यापारवर्जं प्रकरणादसन्निहितत्वात् भोगमात्रसाम्यलिंगाच्चेति सर्वविधोपाधिविनिर्मुक्तस्यैव भेदोपपादनात् श्रुतिस्मृतिसूत्रेषु
सर्वत्र भेदनिर्देशो चिदचिदीश्वरभेदः स्वाभाविको विवक्षित इति निश्चीयते सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत वाचारंभ
णं विकारो नामधेयम् मृत्तिकेत्येव सत्यं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजत सन्मूलाः सोम्ये
माः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो क्षेत्रज्ञं चापि मां विद्धि इत्यनन्यत्वमा
रंभणशब्दादिभ्य इति परस्य ब्रह्मणः कारणत्वे सूक्ष्मस्य चिदचिदात्मकप्रपंचस्य कार्यत्वे कारणात् कार्यस्यानन्यत्वं चोच्यमानमेव
मेवोपपद्यते सर्वावस्थचिदचिद्वस्तुनः परमात्मशरीरत्वं परमात्मनश्चात्मत्वं यः पृथिव्यां तिष्ठन् पृथिवी न वेद यस्य पृथिवी श
रीरं य आत्मनि तिष्ठन् परस्यात्मा यस्यात्मा शरीरं य आत्मानमन्तरो यमयति यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं एष सर्वभूतान्तरात्मापहतपा
प्मा दिव्यो देव एको नारायणः अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा इत्यादि श्रुत्यैवोपपादितमिति सूक्ष्मचिदचिद्वस्तुशरीरः परमात्मा
कारणं स एव परमात्मा स्थूलचिदचिद्वस्तुशरीरः कार्यमिति कारणावस्थायां कार्यावस्थायां च चिदचिद्वस्तुशरीरतया तत्तच्छब्दे
ः परमात्मैव सर्वशब्दवाच्य इति परमात्मशब्देन सर्वशब्दसामानाधिकरण्यं मुख्यमेवोपपन्नतरं अनेन जीवेनात्मनानुप्रवि

रूपनामरूपेव्याकरवाणीति सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवदिति श्रुतिरेवैतमर्थमुपपादयति सर्वात्मतयानुप्रवि
श्य तत्तच्छरीरत्वेन सर्वप्रकारतया स एव सर्वशब्दवाच्यो भवतीत्यर्थः बहु स्यामिति बहुभवनसंकल्पोपि नामरूपविभागानर्हसूक्ष्मचिद
वे०प० २ चिद्वस्तुशरीरतयैकधावस्थितस्य विभक्तनामरूपचिदचिद्वस्तुशरीरतया बहुप्रकारताविषय इति हि वेदान्तविदां प्रक्रिया येपुनर्निर्विशे
षकूटस्थस्वप्रकाशनित्यचैतन्यमात्रं ब्रह्मज्ञानबद्धमोक्षमिति वदन्ति तेषां जन्माद्यस्य यतः शास्त्रयोनित्वात् तत्तु समन्वयात् ईक्षतेर्नाश
ब्दमित्यादिजगद्व्यापारवर्जं भोगमात्रसाम्यलिंगाच्च अनावृत्तिः शब्दादनावृत्तिः शब्दादित्यन्तस्य सूत्रगणस्य ब्रह्मणो जगत्कारणत्व
बहुभवनसंकल्परूपेक्षणाद्यनन्तविशेषप्रतिपादनपरत्वात् सर्वस्तत्रज्ञातेस्त्रकारोदातौ यतो वा इमानि भूतानि जायन्ते तदैक्षत।
बहु स्यां प्रजायेयेत्याद्याः सर्वाः श्रुतयश्च न संगच्छन्ते अथोच्यते येनाश्रुतं श्रुतमित्येकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय यथा सोम्येकेन मृ
त्पिण्डेनेत्येकमृत्पिण्डारब्धघटशरावादीनां मृत्पिण्डादनन्यतया तज्ज्ञानेनैव तेषां ज्ञातत्वमेव ब्रह्मज्ञानेन तदारब्धस्य कृत्स्नस्य चिदचिदा
त्मकस्य जगतस्तदनतिरिक्तवस्तुतया ज्ञाततासंभवतीत्युपपाद्य सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमितीदंशब्दवाच्यस्य।
चिदचिदात्मकप्रपंचस्य सृष्टेः प्राक् निखिलभेदप्रहाणेन सच्छब्दवाच्यतयैकधापत्तिं घटशरावाद्युत्पत्तेः प्राकु उत्पादकमृ।
त्पिण्डैकधापत्तिवदभिधाय तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोसृजतेत्यादिना तदेव सच्छब्दवाच्यं परं ब्रह्म चिदचिदात्मकप्रपंच राम
रूपेणात्मनो बहुभवनमेकमृत्पिण्डस्य घटशरावादिरूपेण बहुभवनवत् संकल्प्यात्मानमेव तेजःप्रभृतिजगदाकारेणासृज २
तेत्यभिधायैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसीत्यभिधानात् ब्रह्मैकमेवाविद्याकल्पितनानार्थिकेन उपाधिना संबद्धं

रावमणैकवतत्जीवेश्वरयोरप्युत्पत्तिमत्वमनित्यत्वंच स्यात् न्यथैकथापत्तिर्वेलायामपि भोक्तृभोग्यनियंतृशक्तित्रयमवस्थितमिति
वे०प० ३ चेत् किमिदं शक्तित्रयपदवाच्यमिति विवेचनीयं परिसन्मात्रस्यैकस्यैव भोक्तृभोग्यनियंतृरूपेण परिणामसामर्थ्यं शक्तित्रयशब्दवाच्यं।
एवं तर्हि मृत्पिंडस्य घटशरावादिपरिणामसमर्थस्य तदुत्पादकमिव ब्रह्मण ईश्वरादीनामुत्पादकत्वमिति तेषामनित्यत्वमेव ईश्वरे
श्वरादीनां सूक्ष्मरूपेणावस्थितिरेव शक्तिरित्युच्यते न हि तद्व्यतिरिक्तस्य सन्मात्रस्य ब्रह्मणः प्रमाणाभावात् तदभ्युपगमेच तदुत्पाद्य
तयेश्वरादीनामनित्यत्वप्रसंगाच्च त्रयाणां नामरूपविभागानर्हसूक्ष्मदशापत्तिरेव प्राक् सृष्टेरेकधावधारणावसेयमिति वक्त
2 व्यं तथा तेषामब्रह्मात्मकत्वादेकत्वावधारणं विरुध्येत अतः सर्वावस्थस्य चिदचिद्वस्तुनो ब्रह्मशरीरत्वश्रुतेः सर्वदा सर्वशरी
रं ब्रह्मैव तत्तच्छरीरतया तत्तच्छब्दैरभिधेयमिति स्थूलचिदचिद्वस्तुविशिष्टं ब्रह्मैव कार्यभूतं जगन्नामरूपविभागानर्हसू
क्ष्मचिदचिद्वस्तुविशिष्टं ब्रह्म कारणमिति तदेवं मृत्पिंडस्थानीयं सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमित्युच्यते तदेव विभ
क्तनामरूपचिदचिद्वस्तुविशिष्टं ब्रह्मकार्यमिति सर्वं समंजसं श्रुतिन्यायाविरोधश्चेति भाष्यप्रपंचितं इति नेह प्रतन्यते इति।
भाष्यादितोधिकरणार्थः सूत्रविवरणासुखग्रहणाय संक्षेपेणोपन्यस्यते तत्र प्रथमेपादे प्रधानपुरुषावेव जगत्कारणं
तया वेदांताः प्रतिपादयंतीत्याशंक्य सर्वज्ञं सत्यसंकल्पं निरवद्यं समस्तकल्याणगुणाकरं ब्रह्मैव जगत्कारणतया प्र राम
तिपादयंतीत्युक्तं द्वितीयतृतीयचतुर्थेषु पादेषु कानिचिद्वेदांतवाक्यानि प्रधानादिप्रतिपादनपराण्यसुखेन सवीक्षेप। ३

वादिरूपेण वहुभूतमिति वैदिकैरभ्युपगंतव्यमिति यदुक्तं तदसत् ज्ञाज्ञौ द्वावजावीशानीशौ नित्यो नित्यानां चेतनश्चेतनानामेको वहूनां यो
विदधाति कामानित्यादिश्रुतिभिर्जीवानामजत्वनित्यत्ववहुत्ववचनात् यदि घटशरावादेरुत्पत्तेः प्रागेकीभूतस्य मृद्रूपस्योत्तरकाल
भाविवहुत्ववत् सृष्टेः प्रागेकीभूतस्यैव ब्रह्मणः सृष्ट्युत्तरकालनानाविधजीवरूपेण वहुत्वमुच्येत तदा जीवानामजत्वनित्यत्ववहुत्वा
दि विरुध्येत स्वत्रविरोधश्च इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिरिति ब्रह्मैव देवमनुष्यादिजीवरूपेण वहुभूतं चेतनदाऽऽत्मनो
हिताकरणादिदोषप्रसक्तिरित्युक्तोऽधिकं तु भेदनिर्देशादिति जीवाद्ब्रह्मणोऽर्थांतरत्वमुक्तं तथा च वैषम्यनैर्घृण्ये न सापेक्षत्वादिति
दैवादिविषमसृष्टिप्रयुक्तपक्षपातनैर्घृण्ये न सापेक्षत्वादिति जीवानां पूर्वपूर्वकर्मापेक्षत्वाद्विषमसृष्टेरिति परिहृतं तथा।
न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति सृष्टेः प्राग
विभागवचनात्सृष्टेः प्राग्जीवानामभावात्तत्कर्म न संभवतीति जीवानां तत्कर्मप्रवाहाणां चानादित्वादिति परिहृतं नात्मा
श्रुतेर्नित्यत्वाच्च ताभ्य इत्यात्मनः उत्पत्त्यभावश्चोक्तः नित्यत्वं च स्वाभ्युपगमविरोधश्च आत्मनो जीवभेदस्यानादित्वं सर्वैरपि वेदां
तवादिभिरभ्युपगम्यतेऽतः श्रुतिविरोधात्स्वत्रविरोधात्स्वाभ्युपगमविरोधाच्च सृष्टेः प्रागेकत्वावधारणं नामरूपविभागाभावाभि
प्रायं नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुभेदसहं चेति सर्वैरभ्युपगम्यते इयांस्तु विशेषः अविद्योपाधिकल्पनेऽप्युपाधिपरिक
ल्पनेऽपि ब्रह्मव्यतिरिक्तस्याविद्यासंवंधिनश्चोपाधिसंवंधिनश्च चेतनस्याभावात् अविद्योपाधिसंवंधेन कृतानां दोषाणां ब्रह्म।
ण्येव भवेयुरिति तस्मात् ब्रह्मत्वादेः प्राक्सृष्टेस्तन्मात्रं ब्रह्मैकमेव सृष्ट्युत्तरकालं भोक्तृभोग्यनियंतृरूपेण त्रिधाभूतं चेत् घटशरा।

स्तोपासिनां ब्रह्मप्राप्तिरुक्तप्रकारेणाभिमन्यते तृतीये चार्चिरादिस्वरूपं गमर्चिरादिनैव ब्रह्मप्राप्तिरिति प्रतिपाद्यते चतुर्थे तु मुक्तस्य ब्रह्मा
नुभवप्रकारोऽभिधीयते अतो मुमुक्षुभिर्ज्ञातव्यं निरस्तनिखिलदोषगंधानवधिकातिशयासंख्येयकल्याणगुणाकरं निखिलजगदेक
वे०प० कारणं परं ब्रह्म ज्ञानं च मोक्षसाधनमसकृदारतस्मृतिसंतानरूपमुपासनात्मकं उपासनाफलं चार्चिरादिना परं ब्रह्मोपपद्य स्वेन
४ रूपेण स्वरूपभूतज्ञानादिगुणाविर्भावपूर्वकानंतमहाविभूत्यनवधिकातिशयानंतब्रह्मानुभवोऽपुनरावृत्तिरूपः इति शारीरकशास्त्रे
3 णोक्तं भवति अथातो ब्रह्मजिज्ञासा० ब्रह्ममीमांसाविषयः सा किमारंभणीयोता नारंभणीयेति संशयः तदर्थपरीक्षिते वेदांताः किं ब्रह्म
णि प्रमाणमुत नेति तदर्थं परीक्षिते परिनिष्पन्नेर्थे शब्दस्य बोधनसामर्थ्यावधारणं संभवति न वेति न संभवतीति पूर्वपक्षः संभवतीति
राद्धांतः यदि न संभवति तदा परिनिष्पन्नेर्थे शब्दस्य बोधनसामर्थ्याभावात्सिद्धस्वरूपे ब्रह्मणि न वेदांताः प्रमाणमिति तद्विचारा
कारा ब्रह्ममीमांसा नारंभणीया यदा संभवति तदा सिद्धेप्यर्थे शब्दस्य बोधनसामर्थ्यसंभवाद्वेदांताः ब्रह्मणि प्रमाणमिति सा चारंभणी
या स्यात् तत्र पूर्वपक्षवादी मन्यते वृद्धव्यवहारादन्यत्र व्युत्पत्त्यसंभवात् व्यवहारस्य च कार्यबुद्धिस्त्वैकहेतुत्वेन कार्य एवार्थे शब्दशक्त्यवधा
रणात् परिनिष्पन्नेर्थे ब्रह्मणि न वेदांताः प्रमाणमिति तद्विचाररूपा ब्रह्ममीमांसा नारंभणीयेति राद्धांतस्तु बालानां मातापितृप्रभृति
भिरंबा तात मातुल शशि पशु मृगादिष्वंगुल्यादिना निर्दिश्य तदभिधायकशब्दान् प्रयुंजानैः क्रमेण बहुशः शिक्षितानां तत्तच्छब्द राम
श्रवणसमनंतरं स्वात्मनामेव तत्तदर्थबुद्ध्युत्पत्तिदर्शनात् शब्दार्थयोः संबंधांतरादर्शनात्संकेतयितृपुरुषज्ञानानवबोधवे ४

माशंक्य तान्यपि ब्रह्मपराणीत्युक्तं तत्र स्पष्टजीवादिलिंगकानि वाक्यानि द्वितीये निरूपितानि अस्पष्टजीवलिंगकानि तृतीये चतुर्थे तु प्रधा
नादिप्रतिपादनपराणीति विशेषः अतः प्रथमेऽध्याये सर्ववेदान्तवाक्यजातं सर्वज्ञत्वसत्यसंकल्पत्वादियुक्तं ब्रह्मैव जगत्कारणं तया
प्रतिपादयतीति स्थापितं द्वितीयेऽध्याये स्यार्थस्य दुर्धर्षत्वप्रतिपादनेन प्रद्रढिमोच्यते तत्र प्रथमे पादे सांख्यादिस्मृतिविरोधान्न्या
यविरोधाच्च प्रसक्तदोषः परिहृतः द्वितीये सांख्यवेदवाह्यपक्षप्रतिक्षेपमुखेनास्यैवादरणीयता स्थिरीकृता तृतीयचतुर्थयोर्वेदा
न्तवाक्यानामन्योन्यविप्रतिषेधादिदोषगंधाभावस्थापनाय वियदादीनां ब्रह्मकार्यत्वप्रकारो विशोध्यते तत्र तृतीयपादे चिद
चित्प्रपंचस्य ब्रह्मकार्यत्वे सत्यप्यचिदंशस्य स्वरूपेण स्वभावान्यथाभावेन कार्यत्वमोदितं चतुर्थे तु जीवोपकरणानामिन्द्रिया
दीनामुत्पत्तिप्रकार इति प्रथमेनाध्यायद्वयेन मुमुक्षुभिरुपास्यं निरस्तनिखिलदोषगंधमनवधिकातिशयासंख्येयकल्याणगु
णगणं निखिलजगदेककारणं ब्रह्मेति प्रतिपादितं उत्तरेण द्विकेन ब्रह्मोपासनप्रकारस्तत्फलमुत्तमोक्षस्वरूपं च चिंत्यते तत्र
तृतीयाध्यायस्य प्रथमे पादे ब्रह्मोपासिषोत्पत्तये जीवस्य संसरतो दोषाः प्रकीर्तिताः द्वितीये चोपासनोत्पत्तये ब्रह्मणो निरस्तनि
खिलदोषता कल्याणगुणाकरता रूपोभयलिंगता प्रतिपाद्यते तृतीये तु ब्रह्मोपासनैकत्वनानात्वपूर्वकमुपासनेषूपसंहार्या
नुपसंहार्यगुणविशेषाः प्रपंचिताः चतुर्थे तूपासनस्य वर्णाश्रमधर्मेतिकर्तव्यताकत्वमुक्तं चतुर्थेऽध्याये ब्रह्मोपासनफल
चिंता क्रियते तत्र प्रथमे पादे ब्रह्मोपासनफलं वक्तुं उपासनस्वरूपपूर्वकोपासनप्रकारो विद्यामाहात्म्यं चोच्यते द्वितीये तु ब्र

स्यादिवाक्यमेवविषयः तत्किं जगत्कारणे ब्रह्मणि शास्त्रं प्रमाणमुत नेति संशयः नैतत्प्रमाणमिति पूर्वपक्षः कुतः अनुमानसिद्धब्रह्मवि
षयत्वात् प्रमाणान्तराविषयेहि शास्त्रं प्रमाणं जगत् सावयवत्वेन कार्यं वा कार्यस्य च स्वोपादानोपकरणसंप्रदानप्रयोजनाभिज्ञक
वे०प० र्तृकत्वात् जगन्निर्माणे चतुरः कर्म्मपरवशापरिमितशक्त्यादिक्षेत्रज्ञविलक्षणः सर्वज्ञः सर्वशक्तिः सर्वेश्वर ईश्वरोनुमानसिद्ध इति न।
५ तस्मिन्यतो वा इमानि भूतानि जायन्ते इत्यादिवाक्यं प्रमाणमिति। राद्धान्तस्तु अकार्यत्वेपि कदैवैकेन कर्तृत्वं जगन्निर्मितमिति प्रमाणाभा
वात् क्षेत्रज्ञानामेव विलक्षणपुण्यानां ज्ञानशक्तिवैचित्र्यसंभावनया कदाचिज्जगदेकदेशनिर्माणसामर्थ्यसंभवात् तदतिरिक्त
4 पुरुषानुमानं न संभवतीति शास्त्रैकप्रमाणत्वाद्ब्रह्मणः यतो वा इमानीत्यादिवाक्यं ब्रह्मणि प्रमाणमिति सूत्रार्थस्तु शास्त्रं यस्य यो
निःकारणं प्रमाणं तद्ब्रह्म शास्त्रयोनित्वं तद्बुद्धिकारणत्वेन शास्त्रस्य योनित्वं प्रमाणान्तराविषयत्वेन शास्त्रैकप्रमाणकत्वाद्ब्रह्म
णस्तत्प्रतिपादकत्वेन तस्मिन् यतो वा इमानीत्यादिवाक्यं प्रमाणमिति तत्तु समन्वयात् ब्रह्मणः शास्त्रप्रमाणकत्वं संभव
तीनवेति किंवा यत्नेन संभवतीति पूर्वपक्षः कुतः प्रवृत्तिनिवृत्तिपरविरहिणो ब्रह्मणः स्वरूपेणापुरुषार्थत्वात् पुरुषार्थावबोधित्वे।
न च शास्त्रप्रमाण्यान्मोक्षसाधनब्रह्मध्यानविधिपरत्वे सत्यपि ब्रह्मणो ज्ञानविधानासंभवात् न ब्रह्मसद्भावे तात्पर्य
मिति ब्रह्मणः शास्त्रप्रमाणकत्वं न संभवतीति राद्धान्तस्तु प्रतिशयितगुणपितृपुत्रादिजीवनज्ञानवदनवधिकातिश राम
यानंदस्वरूपब्रह्मज्ञानस्य निरतिशयपुरुषार्थत्वात् तस्य शास्त्रप्रमाणकत्वं संभवतित्यानंदं ब्रह्मणो विद्वान् इत्येवमादि ५

धकभावलक्षणस्वार्थयोः संबंध इति निश्चित्य नानार्थवादिनि व्यत्ने व्यर्थे शब्दस्य वेदो धकत्वावधारणं संभवतीति ब्रह्मणि वेदांतानां प्रामाण्ये
तदर्थविचारात्मकारा ब्रह्ममीमांसारंभणीयेति सूत्रार्थः अथेत्यानंतर्ये अतइति वृत्तस्य हेतुभावे ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ज्ञातुमिच्छा
जिज्ञासा इच्छायाः इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमिह अभिप्रेतं पूर्ववृत्तात् स्थिरफलकेवलकर्माधिगमादनंतरं नत एव हेतो
रनंतस्थिरफलब्रह्माधिगमः कर्तव्य इति जन्माद्यस्य यतः तैत्तिरीयके यतो वा इमानि भूतानि जायंते येन जातानि जीवंति यत्प्रयंत्यभि
संविशंति तद्विजिज्ञासस्व तद्ब्रह्मेत्येतद्वाक्यविषयः किमेतज्जिज्ञास्यतया प्रतिज्ञातं ब्रह्म जगज्जन्मादिकारणत्वोपलक्षणतः प्रतिपादयितुं
शक्नोति न वेति संशयः न शक्नोतीति पूर्वपक्षः कुतः जगज्जन्मादीनामुपलक्षणतया विशेषणतया च ब्रह्मलक्षणत्वासंभवात् उपल
क्षणत्वे ह्युपलक्षितस्य ब्रह्माकारांतरयोगापत्तेः न चेह तदस्ति अतउपलक्षणत्वेन न संभवति विशेषणत्वे ह्यनेकविशेषणविशि
ष्टतया अपूर्वस्यैकस्य प्रतिपादकत्वेन संभवति विशेषणानां व्यावर्तकत्वेन विशेषणबहुत्वे ब्रह्मबहुत्वप्रसक्तेः राद्धांतस्तु एकस्मि
न्न विरुद्धानां विशेषणानामनेकत्वेपि श्यामत्वयुवत्वादिविशिष्टदेवदत्तवज्जन्मादिविशिष्टं ब्रह्मैकमेव भवति उपलक्षणत्वेपि ज
गज्जन्मादिविशिष्टं ब्रह्मैकमेव भवति उपलक्षणत्वेपि जगज्जन्मादिभिरुपलक्षितस्य ब्रह्मशब्दावगतबृहत्वाद्याकारासंभवतीति
जगज्जन्मादिकारणं ब्रह्मेति लक्षणतः प्रतिपादयितुं शक्नोतीति तद्वाक्यमिति सूत्रार्थः अस्य विविधविचित्रभोक्तृभोग्य
पूरणस्य जगतः यतो जन्मादि तद्ब्रह्मेति प्रतिपादयितुं शक्नोतीति तद्वाक्यमिति शास्त्रयोनित्वात् यतो वा इमानि भूतानी

सोम्येदमिति जगत्कारणतया प्रतिपादितान्यपि तत्र ईक्षणाभावादचेतनमशब्दं तत् अपि तु सर्वज्ञमेव जगत्कारणमिति निश्ची
यते इति॰ गौणश्चेन्नात्मशब्दात्॰ तत्तेज ऐक्षतेत्यचेतनगतेगौणशब्दः साहचर्यात्तदैक्षतेत्यत्रापि गौण इति चेन्न आत्मशब्दात् सच्छ
वे०प० ब्दाभिहिते ईक्षितरि ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मेति श्रूयमाणो चेतनवाचिनः आत्मकत्वावगमात् तेन शब्दादयमिक्षतिर्मु
६ ख्यमेवेति प्रतीयते ऐतदात्म्यमिदं सर्वमिति तेजःप्रभृतीनामपि तदात्मकत्वावगमात् तेजःप्रभृतीक्षणमपि मुख्यमेवेत्यभिप्रा
यः तन्निष्ठस्य मोक्षोपदेशात् इतश्च सच्छब्दाभिहितेन प्रधानं अपि तु परमेव ब्रह्म तत्त्वमसीति सदात्मकतया प्रत्यगात्मानुसं
ऽ धाननिष्ठस्य तस्य तावदेव चिरं यावन्न विमोक्षे अथ संपत्स्ये इति मोक्षोपदेशात् कारणं परमेव ब्रह्म हेयत्वावचनाच्च यदि प्र
धानमिह कारणतया विवक्षितं तदा तस्य मोक्षविरोधित्वात् हेयत्वमुच्यते न चोच्यते अतश्च न प्रधानं प्रतिज्ञाविरोधात् प्रधानका
रणवादे प्रतिज्ञा च विरुध्यते नांशं प्रति प्रधानस्याकारणत्वात् तज्ज्ञानेन चेतनांशो न ज्ञायते इति न प्रधानं कारणं स्वाप्ययात् स्वम
पीतो भवति सता सोम्य तदा संपन्नो भवतीति जीवस्य सुषुप्तस्य स्वाप्ययः श्रूयते स्वकारणे ह्यप्ययः जीवं प्रति प्रधानस्याकारणत्वा
त्स्वाप्ययश्रुतिर्विरुध्येत अतश्च न प्रधानमपि तु परब्रह्मैव गतिसामान्यात् इतरोपनिषत्सु गतिसामान्यात्सर्वोपनिषदि न प्रधा
नं कारणं विवक्षितं इतरासु चोपनिषत्सु यस्सर्वज्ञः सर्ववित् तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते परास्य शक्तिर्विविधैव श्रू राम
यते स्वाभाविकी ज्ञानबलक्रिया च स कारणं करणाधिपाधिपः आत्मनि खल्वरे विज्ञाते सर्वमिदं ज्ञातं भवति तस्य ह वा ६

निरनवधिकातिशयानंदरूपं ब्रह्मेति हि प्रतिपाद्यते अतो ब्रह्मत्वेन परेणाप्यनुभूयमाननिरतिशयानंदस्वरूपमेवेति न स्वाति-
पादनपरस्यैव साक्षात्पुरुषार्थान्वयः प्रवृत्तिनिवृत्तिपरस्य तु तत्साध्यफलसंबंधात्पुरुषार्थान्वयः इति सूत्रार्थस्तु तु शब्दः प्रस
क्तशंकानिवृत्त्यर्थः तत्पूर्वसूत्रोदितब्रह्मणः शास्त्रयोनित्वसमन्वयात्सिद्ध्यति सम्यक्पुरुषार्थतयान्वयः समन्वयः वेत्तुर्निरति
शयानंदस्वरूपत्वेन परमपुरुषार्थरूपे ब्रह्मण्यवेदकतया शास्त्रस्यान्वयात् ब्रह्मणः शास्त्रप्रमाणकत्वं सिद्ध्यत्येवेति ॥ ईक्षतेर्ना
शब्दम् जगत्कारणवादिवेदांतवेद्यविषयः तत्किं सांख्योक्तं प्रधानमुतानवधिकातिशयानंदं ब्रह्मेति संशयः प्रधानमिति पूर्वपक्षः कुतः प्र
तिज्ञादृष्टांतान्वयेनानुमानाकारवाक्यवेद्यत्वात् येनाश्रुतं श्रुतं भवतीत्यादिना एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय यथा सौम्यैकेन मृत्पिंडे
नेति दृष्टांतेन ह्युपपाद्यते एवमानुमानिकमेवैतद्वाक्यवेद्यमिति निश्चीयते सदेव सोम्येति सच्छब्दः प्रधानविषयः तदैक्षत बहु स्यामिति त्वि
गौणमीक्षणं भवितुमर्हति तत्तेज ऐक्षतेत्यादि गौणेक्षणसाहचर्याच्च शब्दांतस्तु तदैक्षत बहु स्यामिति बहुभवनसंकल्परूपेणान्वयात् ॥
सदेव सोम्येदमिति कारणवाचिसच्छब्दः विषयो नाचेतनं प्रधानं सर्वज्ञसत्यसंकल्पत्वादियुक्तं परं ब्रह्मैवेति निश्चीयते तेन चानुमानाका
रमेतद्वाक्यं हेत्वनुपदेशात् तेनात्मज्ञानेनात्मज्ञानासंभवपरिजिहीर्षया तु दृष्टांतोपादानं न च मुख्येक्षणसंभवे गौणत्वपरिग्रहसंभवः ते
जः प्रभृतिष्वपि न गौणमीक्षणं तेजआदिशब्दानां तेजः प्रभृतिशरीरकस्यात्मनो वाचकत्वादिति परमेव जगत्कारणवाचिवे
दांतवेद्यमिति सूत्रार्थः ईक्षतिरीक्षतिधात्वर्थः ईक्षणं शब्दः प्रमाणं यस्य न भवति तदशब्दं यदोक्तमानुमानिकं प्रधानं सदेव

वे॰ प॰
१

वशारीरस्यात्मायः पूर्वस्मे त्मनुक्रम्यते इति प्रत्यगात्मनो विज्ञानमयस्य एव शारीरस्यात्मानंदमयः तस्यैष एव शारीर आत्मा यः पूर्वस्ये
ति निर्देशः आनंदमयस्यानन्यात्मत्वप्रदर्शनार्थः अतो जगत्कारणभूतः प्रत्यगात्मनोऽर्थांतरभूतः पर नयानिर्दिष्ट आनंदमयः परा
मात्मैवेति सूत्रार्थस्तु आनंदमयशब्दनिर्दिष्ट आकाशादिजगत्कारणभूतः प्रत्यगात्मनोऽर्थांतरभूतः परमात्मा अस्यानंदस्य निरति
शयत्वप्रतीतिबलात् स एको मानुष आनंदः ते ये शतमित्याद्यभ्यासात् तस्य च प्रत्यगात्मन्यसंभावितत्वेन तदतिरिक्ते परमात्मन्येव संभ
वात् विकारशब्दान्नेति चेन्न प्राचुर्यात् आनंदमय इति विकारार्थमयट्शब्दात् नायमविकृतपरमात्मा अस्य च विकारार्थत्वमेव
6 युक्तं आनंदमय इति विकारो वक्रमादिति चेन्न प्रत्यगात्मन्यपि न जायते म्रियते वा विपश्चिदिति विकारप्रतिषेधात् प्राचुर्यार्थ
एवायं मयडिति निष्प्रत्यूह अस्मिन्नानंदे यतो वाचो निवर्तंते मतिकृत्समाप्ता प्राचुर्यात् अपमानंदप्रचुरः परमात्मैव न ह्यनव
धिकातिशयानंदरूपः प्रभूतानंदः प्रत्यगात्मनि संभवति तद्धेतुव्यपदेशाच्च एष ह्येवानंदयातीति जीवात्मानंदयितृत्वव्यपदेशा
द्वायं परमात्मैव मांत्रवर्णिकमेव च गीयते सत्यं ज्ञानमनंतं ब्रह्मेति मंत्रवर्णोदितं ब्रह्मैव तस्माद्वा एतस्मादात्मन इत्यारभ्यानंदमय
इति गीयते ततश्चायं आनंदमयो ब्रह्म प्रत्यगात्मनः परिच्छिन्नस्वरूपं मंत्रवर्णोदितमिति माशंक्याह नेतरोऽनुपपत्तेः परस्माद्ब्रह्मणः राम
इतरः प्रत्यगात्मा न मंत्रवर्णोदितः तस्य विपश्चिता ब्रह्मणेति विपश्चित्त्वानुपपत्तेः विविधं पश्यति हि विपश्चित्त्वं तच्च सोऽकाम १
यत बहु स्यां प्रजायेयेत्यादिवाक्योदितनिरुपाधिकबहुभवनसंकल्पपूर्वकं सर्वज्ञत्वं तत्तु प्रत्यगात्मनः परिच्छिन्नस्यापि न सं

एतस्य महतो भूतस्य निश्वसितमेतदृग्वेदः पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यं तस्माद्विराडजायत आत्मा वा इदमेक एवाग्र आसीत् ॥
स ईमांल्लोकानसृजत तस्माद्वा एतस्मादात्मन आकाशः संभूतः एको ह वै नारायण आसीत् स एकाकी नारमेतेति सर्वज्ञः पुरुषोत्त
म एव कारणतया प्रतिपाद्यते अस्य श्रुतत्रुतिसामानाधिकरण्याद्व्यापि स एव कारणतया श्रुतिवाक्ये न महत्त्वात्तिन्न च प्रधानं श्रुतत्वाच्च श्रु
तमेवास्मामुपनिषदि आत्मन एवेदं सर्वमिति अत्र अस्य सदेव सोम्येदमित्यादि जगत्कारणवादिवेदान्तेषु प्रधानं सर्वज्ञत्वे सत्यसंकल्प
परं ब्रह्मेति स्थितं आनन्दमयोऽभ्यासात् तैत्तरीयके तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकृत्य तस्माद्वा एतस्माद्विज्ञान
मयात् अन्योऽन्तर आत्मा आनन्दमय इत्येव जगत्कारणतयावगत आनन्दमयः किं प्रत्यगात्मा उत परमात्मेति संशयः प्रत्यगात्मे
ति पूर्वपक्षः कुतः स तस्यैष एव शारीर आत्मा यः पूर्वस्य इत्यानन्दमयस्य शारीरत्वश्रवणात् शारीरो हि शरीरसंबंधी स च प्रत्यगात्मैव तस्य
चेतनत्वेनेत्वापूर्विका च सर्वरूपपद्यते राद्धान्तस्तु सैषानन्दस्य मीमांसा भवति इत्यारभ्य यतो वाचो निवर्तन्ते अप्राप्य मनसा सह
आनन्दं ब्रह्मणो विद्वान् इति निरतिशयानन्दस्याशिकोऽस्य मान आनन्दः प्रत्यगात्मनोऽपि तत्परभूतस्य परस्यैव ब्रह्मण इति निश्चीय
ते शारीरात्मत्वं च परमात्मन एव तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्याकाशादि जगत्कारणतयावगतेरानन्दमयस्य
शारीर आत्मेति प्रतीयते आत्मान्तरानिर्देशात् अन्तरेषु पृथिव्यन्तरादीनां शरीरत्वं परमात्मन आत्मत्वं च श्रूयते यस्य पृथिवी
शरीरमित्यारभ्य एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इति अन्नमयस्यात्मेव प्राणमयादिषु तस्येव

वे०प०
८

तिष्क्रियते च तद्रूपस्याप्राकृतत्वं आदित्यवर्णं तमसः परस्तादित्यादौ सूत्रार्थस्तु आदित्यादौ श्रूयमाणः पुरुषः परं ब्रह्म न त्वस्या साधारण
पहतपाप्मत्वादिधर्मोपदेशात् भेदव्यपदेशाच्चान्यः य आदित्ये तिष्ठन्नादित्यादन्तरः य आत्मनि तिष्ठन्नात्मनोऽन्तर इत्यादि जीवात् भेदव्य
पदेशाच्चान्यः [illegible] जीवादन्यः परमात्मैव। आकाशस्तल्लिंगात् अस्य लोकस्य का गतिरित्युक्ते प्रतिवचनं आकाश इति होवाच सर्वाणि
ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्तीत्यत्राकाशशब्दनिर्दिष्टं जगत्कारणं किं प्रसिद्धाकाश उत समस्त
चिदचिद्वस्तुविलक्षणं ब्रह्मेति संशयः प्रसिद्धाकाश इति पूर्वपक्षः कुतः आकाशशब्दस्य लोके तत्रैव व्युत्पत्तेः यतो वा इमानीत्यादि
7
सामान्यलक्षणस्य सदादिशब्दानामपि साधारणत्वेनाकाशादेव समुत्पद्यन्ते इति विशेषपर्यवसानात् ईक्षणादयोऽप्याकाश
एव जगत्कारणमित्यभिमते सन्निगौणाः वर्णनीयाः राद्धान्तस्तु सर्वाणि ह वा इमानि भूतानीति प्रसिद्धवन्निर्देशात् प्रसिद्धेश्च
क्षापूर्वकत्वात् चिदचिद्विलक्षणं सर्वज्ञं ब्रह्माकाशशब्दनिर्दिष्टमिति सूत्रार्थस्तु आकाशशब्दनिर्दिष्टं परमेव ब्रह्म तस्य प्रसिद्धव
न्निर्दिश्यमानात् जगत्कारणत्वादिलिंगात् अत एव प्राणः छान्दोग्ये प्रस्तोतर्या देवता प्रस्तावमन्वायत्तेति प्रस्तुत्य कतमा सा
देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्ते
त्यत्र निखिलजगत्कारणतया प्राणशब्दनिर्दिष्टः किं प्रसिद्धः प्राण उतोक्तलक्षणं ब्रह्मेति संशयः प्रसिद्धः प्राण इति पूर्वपक्षः राम
कुतः सर्वस्य जगतः प्राणायत्तस्थितिदर्शनात् स एव निखिलजगदेककारणतया निर्दिश्यमर्हति इति राद्धान्तस्तु शिलाका ८

भवति जगदाधारत्वं प्रकरणादिति वक्ष्यमाणत्वादतः परं ब्रह्मैव सोऽत्र वर्णितम् भेदव्यपदेशाच्च भीषास्माद्वातः पवत इत्यादि
नाग्निवायुसूर्यादिजीववर्गस्यानंदमयात् प्रशासितुः प्रशासितव्यत्वेन भेदो व्यपदिश्यते अतश्चानंदमयः परमात्मेति योज्यं नो
तरं च तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर आत्मानंदमय इति विज्ञानमयाज्जीवादानंदमयस्य भेदो व्यपदिश्यते विज्ञानमयो
जीव एव न बुद्धिमात्रं व्यपदिश्यते अतश्चानंदमयः परमात्मेति कामाच्च नानुमानापेक्षा। सोऽकामयतेत्यारभ्य इदं सर्वमसृजतेति
कामादेव जगत्सर्गश्रवणात् आनंदमयस्य जगत्सर्गे नानुमानगम्यप्रकृत्यपेक्षा प्रतीयते प्रत्यगात्मनो हि यस्य कस्यचिदपि
सर्गप्रक्रमे यच्चास्ति अतश्चाप्यप्रत्यगात्मनोऽन्यः परमात्मा अस्मिन्नस्य च तद्योगं शास्ति रसो वै सः रसं ह्येवायं लब्ध्वानंदी भ
वति इत्यस्मिन्नानंदमये रसशब्दनिर्दिष्टेऽस्यायंशब्दनिर्दिष्टेऽसायंशब्दनिर्दिष्टस्य जीवस्य तल्लाभादानंदयोगं शास्ति शास्त्रं च
प्रत्यगात्मनो यल्लाभादानंदयोगस्तस्मादन्यः परमात्मैवेत्यानंदमयः परं ब्रह्म अंतस्तद्धर्मोपदेशात् छांदोग्ये य एषोऽन्तरादित्ये
हिरण्मयः पुरुषो दृश्यते य एषोऽक्षिणि पुरुषो दृश्यते इत्यत्रत्यादित्याधारतयाक्ष्याधारतया श्रूयमाणः पुरुषः किं जीवविशेषः उत परमपुरुष इ
ति संशयः जीवविशेष इति पूर्वपक्षः कुतः सशरीरत्वात् शरीरसंयोगो हि कर्मवश्यस्य जीवस्य स्वकर्मफलोपभोगायेति शास्त्र
न्तस्तु स एष सर्वेभ्यः पाप्मभ्य उदित इत्यादिना अपहतपाप्मत्वादिपूर्वकसर्वलोककामेशत्वव्यपदेशात् तेषां जीवे असंभवात्
अयमक्ष्यादित्याधारः पुरुषोत्तम एव स्वासाधारणविलक्षणरूपवत्त्वं च ज्ञानबलैश्वर्यादिकल्याणगुणवत्वस्य संभव

थाहि दर्शनं तथा ह्यन्यत्रापि छंदस एव साहश्येन छंदःशब्देनाभिधानं दृश्यते ते वा एते पंचान्ये पंचान्ये दश संपद्यन्ते इत्यारभ्य सैषा वि
वे० प०
९
राडन्नादीति भूतादिपादव्यपदेशोपपत्तेश्चैवम् भूतपृथिवीशरीरहृदयानि निर्दिश्य सैषा चतुष्पदेति भूतादीनां पादत्वव्यप
देशाद्ब्रह्मण एवोपपद्यत इति ब्रह्मैव गायत्रीशब्दनिर्दिष्टमिति गम्यते॰ व्यपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् पादो
स्य सर्वा भूतानि त्रिपादस्यामृतं दिवि इति पूर्ववाक्योदितं परं ब्रह्मैवास्तु तथापि अथ यदतः परो दिवो ज्योतिरिति पुंसंबंधमात्रेणेने
हतस्मात्प्रत्यभिज्ञायते तत्र चात्र च व्यपदेशप्रकारभेदात् तत्र हि दिवीति सप्तम्या निर्दिश्यते इह च दिवः परो ज्योतिरिति पंचम्याः तत्रो
न प्रतिसंधानमिति चेन्न उभयस्मिन्नपि व्यपदेश उपरिस्थितिरूपार्थैक्येन प्रतिसंधानाविरोधात् यथा वृक्षाग्रे श्येनः वृक्षाग्रात्परतः
श्येन इति प्राणस्तथानुगमात् कौषीतकिब्राह्मणे प्रतर्दनविद्यायां त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इति प्रतर्दनेनो
8
क्त इन्द्रः प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमित्युपास्स्वेत्याह अत्र हिततमोपासनकर्मतया निर्दिष्टः इन्द्रः प्राणशब्दाभिधेयः किं जीवः उत
परमात्मेति संशयः जीव इति पूर्वपक्षः इन्द्रशब्दस्य जीवविशेषप्रसिद्धेः प्राणशब्दस्यापि तत्सामानाधिकरण्यस्य स एवार्थ इति तं मामा
युरमृतमित्युपास्स्वेति तस्यैवोपास्यत्वोपदेशात् राद्धान्तस्तु इन्द्रप्राणशब्दनिर्दिष्टं जीवादर्थान्तरभूतं परं ब्रह्म स एष प्राण एव प्रज्ञा
त्मानंदोऽजरोऽमृत इन्द्रप्राणशब्दनिर्दिष्टस्यैव जीवे ह्यसंभावितानंदत्वाजरत्वामृतत्वश्रवणात् सूत्रार्थस्तु उपासनतयोपदिष्ट इ राम
न्द्रप्राणशब्दाभिधेयं परं ब्रह्म तथेति प्रकारवचनः परब्रह्मप्रकारं भवेत्तेषानंदादिश्रवणस्यानुगमात् न वक्तुरात्मोपदेशादिति चे॥ ९

शदिश्चैतन्नेषु प्राणपत्नाश्यत्वभावात् सर्वाणिह वा इमानि भूतानीति प्रसिद्धवन्निर्देशादेव हेतोः प्राणशब्दनिर्दिष्टं परमेव ब्रह्मस्त्वम
पि व्याख्यानम् ज्योतिश्चरणाभिधानात् छांदोग्ये अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमे लोके
ष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरित्यत्र जगत्कारणत्वयाम्नानिरतिशयदीप्तियुक्तज्योतिःशब्दनिर्दिष्टं प्रसिद्धमादित्यज्योति
रुत परमेव ब्रह्मेति संशयः प्रसिद्धज्योतिरिति पूर्वपक्षः कुतः इदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति कौक्षेयज्योतिषा प्रसि
द्धेनैक्यावगमात् स्ववाक्येन व्यतिरिक्तपरब्रह्मासाधारणलिंगादर्शनात् राद्धांतस्तु प्रसिद्धज्योतिषोऽन्यदेव परं ब्रह्मेह निरतिश
यदीप्तियुक्तज्योतिःशब्दनिर्दिष्टं कुतः पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवीति पूर्ववाक्ये द्युसंबंधितया निर्दिष्टस्यैव चतु
ष्पादो ब्रह्मणो यदतः परो दिवो ज्योतिरित्यत्र प्रत्यभिज्ञानात् न च परमेव ब्रह्मेति विज्ञातं सर्वेषां भूतानां तत्स्वपादत्वेन व्यपदेशात्
एवं परब्रह्मत्वेन निश्चितं कौक्षेयज्योतिषस्तु तदात्मकत्वानुसंधानफलायोपदिश्यत इति विज्ञायते सूत्रार्थस्तु ज्योतिःशब्द
निर्दिष्टं परं ब्रह्म अस्य ज्योतिषः पूर्ववाक्ये सर्वभूतचरणत्वाभिधानात् सर्वभूतपादत्वं च परस्यैव ब्रह्मणः उपपद्यते
छंदोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमात्तथा हि दर्शनम् गायत्री वा इदं सर्वमिति गायत्र्याख्यच्छंदसः प्रकृतत्वात्स
र्वभूतपादत्वेन गायत्र्या एवाभिधानात् न ब्रह्मेति चेन्नैतत् तथा चेतोऽर्पणनिगमात् गायत्रीवं भवति तथा ब्रह्मणि चे
तोऽर्पणोपदेशात् गायत्री साक्षरं पंचतुष्पात् ब्रह्मणा ऽनुसंधेयमिममुपदिश्यते गायत्र्याः सर्वात्मत्वानुपपत्तेरित्यर्थः त

त्मशरीरकं परमात्मानं पश्यन्नहमिति परमात्मानमवोचत् तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे ऽहं मनुरभवं सूर्यश्चाहं कक्षीवा
न्नृषिरस्मि विप्र इति ॥ जीवमुख्यप्राणलिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ त्रिशीर्षाणं त्वाष्ट्रमहनं अरुन्मु
वे०प० २० खान्यतीन्सालावृकेभ्यः प्रायच्छं यावदस्मिन्शरीरे प्राणो वसति तावदायुरिति जीवमुख्यप्राणलिंगान्नात्मसंबंधभावपरं
मात्मत्वनिश्चय इति चेन्न परमात्मन एव स्वाकारेण जीवशरीरकत्वेन प्राणशरीरकत्वेन च उपासात्रैविध्यादिहोपास्तत्वेनच्छेदेना
भिधानमिति निश्चीयते ॥ अन्यत्रापि ब्रह्मोपासने त्रैविध्यस्याश्रितत्वात् सत्यं ज्ञानमनंतं ब्रह्मानंदो ब्रह्मेति स्वाकारेणोपास्यत्वं सच्च
त्यच्चाभवदित्यादिभोक्तृशरीरकत्वेन प्राणशरीरकत्वेन च इह प्रतर्दनविद्यायामपि तस्य त्रैविध्यस्य संभवात् अत इन्द्रप्राणश
ब्दनिर्दिष्टः परमात्मा ११ इति श्रीभगवद्रामानुजविरचिते वेदांतदीपे प्रथमाध्यायस्य प्रथमः पादः ॥१॥ सर्वत्र प्रसिद्धोपदे
शात् ॥ छांदोग्ये श्रूयते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीत अथ खलु क्रतुमयोऽयं पुरुषः यथाक्रतुरस्मिंल्लो
के पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वीत मनोमयः प्राणशरीर इत्यत्र सर्वं खल्विदं ब्रह्मेति सर्वात्मत्वेन निर्दिष्टं
ब्रह्म किं प्रत्यगात्मा उत परमात्मेति संशयः प्रत्यगात्मेति पूर्वपक्षः सर्वतादात्म्योपदेशो हि तस्यैवोपपद्यते परस्य तु ब्रह्मणः
सकलहेयप्रत्यनीककल्याणैकतानस्य समस्तहेयाकारसर्वतादात्म्यं विरोधादेव न संभवति प्रत्यगात्मनो हि कर्मनि राम २०
मित्तब्रह्मादिस्तंबपर्यंतसर्वभाव उपपद्यते सुखदुःखादिहेतुकत्वं च तत्कर्मनिमित्तत्वेन सुखाद्युपपद्यते ब्रह्मणश्चे ।

ध्यात्मसंबंधभूमा ह्यस्मिन् । नायमुपास्यः परमात्मा मामेव विजानीहि तं मामायुरमृतमित्युपास्स्वेति श्रुतजीवभावस्य इन्द्रस्य वक्तुः
स्वात्मन उपास्यत्वोपदेशात् उपक्रमे जीवभावनिश्चये सत्युपसंहारस्य तदनुगुणतया नेयत्वादिति चेन्न ध्यात्मसंबंधभूमा ह्यस्मिन्नात्म
नि संबंधो ध्यात्मसंबंधस्तद्भूमा बहुत्वं जीवादर्थान्तरभूतस्यात्मनो ऽसाधारणधर्मसंबंधबहुत्वमस्मिन्प्रकरणे उपक्रमप्रभृत्योप
संहारादुपलभ्यते उपक्रमे तावद्वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यसे इत्यनेनात्यन्तमानमुपासनं परमात्मोपासनमेव तस्यैव हिततम
त्वात् तथा एष एव साधु कर्म कारयति इत्यादिना साध्वसाधुकर्मणोः कारयितृत्वं परमात्मन एव धर्मः तद्यथा रथस्यारेषु नेमि
रर्पिता नाभावरा अर्पिता एवमेवैताः भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्राणे ऽर्पिता इति सर्वाधारत्वं च तस्यैव धर्मः आनंदादयश्च एष
लोकाधिपतिरेष सर्वेश इति च हीनिहितो ऽन्तः परब्रह्मैवायमित्यर्थः परमात्मैवोपास्य इति कथमिन्द्रो मामुपास्स्वेत्युपदिदेश अत
त आह शास्त्रदृष्ट्या तूपदेशो वामदेववत् इन्द्रस्य जीवस्यैव सतः स्वात्मत्वेनोपास्यभूतपरमात्मोपदेशोऽयं शास्त्रदृष्ट्या अंतः प्र
विष्टः शास्ता जनानां सर्वात्मा तत्त्वमसि य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति
स त आत्मान्तर्याम्यमृतः एष सर्वभूतान्तरात्मापहतपाप्मा दिव्यो देव एको नारायण इत्यादीनि हि शास्त्राणि परमात्मनोऽ
जीवात्मन आत्मतया उपदिदिशुः अतो जीवात्मवाचिनः शब्दाः जीवात्मशरीरकं परमात्मानमेव वदंतीति विदितशास्त्रा
र्थस्य मामेव विजानीहि मामुपास्स्वेति स्वात्मवाचिशब्देन परमात्मोपदेशोऽयं न विरुध्यते यथा वामदेवः शास्त्रदृष्ट्या स्वा

स्य परवशो शारीरे प्रत्यगात्मन्यनुपपत्तेः स्त्रोपेन शारीरः अपितु पर एव ब्रह्म कर्मकर्तृव्यपदेशाच्च एतमितः प्रेत्याभिसंभवितास्मीति प्रा

प्यतयोपास्यो निर्दिश्यते प्राप्तृतया जीवः अतः अन्यो जीवादन्य एव परं ब्रह्म। शब्दविशेषात्। एष म आत्मान्तर्हृदय इति शारीरः षष्ठ्यानि

वे॰ प॰ २२ र्दिष्टः उपास्यः प्रथमया। अतश्च जीवादन्यः स्मृतेश्च सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति स्मृतेश्च जीवादन्य

उपास्यः परमात्मा अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च। एष म आत्मान्तर्हृदय इत्यल्पस्थानत्वा

त् अणीयान् व्रीहेर्वा यवाद्वेत्यल्पत्वव्यपदेशाच्च न परं ब्रह्मेति चेन्न निचाय्यत्वादेवं एवमुपास्यत्वाद्धेतोरल्पायतनत्वाल्पत्व

व्यपदेशः न स्वरूपाल्पत्वेन ज्यायान् पृथिव्या इत्यादिना सर्वस्माज्ज्यायस्त्वोपदेशात् ज्यायसोऽप्यस्य हृदयायतनावच्छेदे

नाल्पत्वानुसंधानमुपपद्यते व्योमवच्च यथा महतोऽपि व्योम्नः सूचिवाशपादिष्वल्पत्वानुसंधानं चशब्दोऽवधारणे न हृदये व(

२० त्यर्थः स्वाभाविकं चास्य महत्त्वमत्र व्यपदिश्यत इत्यर्थः ज्यायान् पृथिव्या ज्यायानन्तरीक्षात् ज्यायान् दिवो ज्यायानेभ्यो

लोकेभ्य इति ह्यनन्तरमेव व्यपदिश्यते संभोगप्राप्तिरिति चेन्न वैशेष्यात् यद्युपासकशारीरे हृदयेऽयमपि वर्तते ततस्त(

हृदेवास्यापि शारीरवत्सुखदुःखसंभोगप्राप्तिरिति चेन्न हेतुवैशेष्यात् न हि शारीरान्तर्वर्तित्वमेव सुखदुःखोपभो

गहेतुः अपि तु कर्मपरवशत्वेन तच्चापहतपाप्मनः परमात्मनो न संभवति अत्ता चराचरग्रहणात् कठवल्लीषु आम्ना राम

यते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्योपसेचनं क इत्था वेद यत्र स इति अत्रौदनोपसेचनसूचितोऽत्ता किं(२२

पि बृहत्त्वगुणयोगेन तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते इतिवत् तत्रैव वर्तते राद्धान्तस्तु तज्जलानिति सर्वं खल्विदं ब्रह्मेति
तज्जन्मस्थितिलयहेतुकं तदात्मकत्वं प्रसिद्धवन्निर्दिश्यमानं परस्यैव ब्रह्मण उपपद्यते परस्माद्ब्रह्मण एव जगज्जन्मस्थितिल
याः प्रसिद्धाः सो ऽकामयत बहु स्यां प्रजायेयेति इदं सर्वमसृजत इत्यादिश्रुतेस्तथा सर्वात्मकत्वं च जन्मादिहेतुकं परस्यैव प्रसिद्धं स
न्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वमिति हेयप्रत्यनीककल्याणैकतानात्मनश्च परस्य
हेयाकारसर्वभूतात्मत्वमविरुद्धं यः पृथिव्यां तिष्ठन् यस्य पृथिवी शरीरं य आत्मनि तिष्ठन् यस्यात्मा शरीरमिति सहेतु
कं तदात्मकत्वं प्रसिद्धवन्निर्दिश्यमानं परस्यैव ब्रह्मण उपपद्यते परस्माद्ब्रह्मण एव जगज्जन्मस्थितिलयाः शरीरं स त आ
त्मान्तर्याम्यमृत इत्यादिना शरीरात्मभावेन सर्वात्मत्वोपपादनात् शरीरात्मनोश्च स्वभावव्यवस्थापनात् सर्वं ब्रह्मेति सा
मानाधिकरण्यनिर्देशाच्च सर्वशब्दस्य सर्वशरीरके ब्रह्मण्येव प्रवृत्तिरुपपद्यते शरीरवाची शब्दः शरीरिण्यात्मन्येव पर्य
वस्यतीति देवमनुष्यादिशब्दवत् सूत्रार्थः सर्वत्र सर्वं खल्विदं ब्रह्मेति निर्दिष्टे वस्तुनि सर्वशब्दस्य सामानाधिकरण्येन तदात्म
कतया निर्दिष्टं परं ब्रह्मैव कुतः प्रसिद्धोपदेशात् तज्जलानिति सर्वमिदं ब्रह्म खल्विति प्रसिद्धवत् तस्योपदेशात् तदेव हि जग
ज्जन्मस्थितिलयहेतुत्वेन वेदान्तेषु प्रसिद्धम् विवक्षितगुणोपपत्तेश्च मनोमयत्वादिकाः सत्यसंकल्पत्वमिश्रा विवक्षि
ताः गुणाः परस्मिन्नेवोपपद्यन्ते अनुपपत्तेस्तु न शारीरः एतेषां गुणानामनन्तदुःखमिश्रपरिमितसुखलवभागिन्यस्तोक

त्वादिभिर्विशेष्यते महांतं विभुमात्मानं मत्वा धीरो न शोचति विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः सोऽध्वनः पारमाप्नोति तद्विष्णोः प
वे०प० रमं पदमित्यादिषु अनन्यातापरमात्मा ॥ अन्तर उपपत्तेः छांदोग्ये य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमभयमेत
२२ द् ब्रह्मेत्यत्राक्ष्याधारः पुरुषः प्रत्यगात्मा जीवो देवताविशेषो वान्यतमः उत परमात्मेति संशयः एष्वन्यतमः इति पूर्वपक्षः प्राप्ते एषः दृश्य
त इति प्रसिद्धवत्साक्षात्कारनिर्देशात् सिद्धांतस्तु परमात्मैवायमक्ष्याधारः पुरुषः अक्षिपुरुषसंबंधितया प्रत्यमाणो निरुपाधिका
त्मत्वामृतत्वाभयत्व ब्रह्मत्वसंयद्वामत्वादयः परमात्मन्येवोपपद्यन्ते प्रसिद्धवन्निर्देशश्च चक्षुषि तिष्ठन्नित्यादि श्रुत्यन्तरप्रसिद्धरू
पपद्यते साक्षात्कारश्च तदुपासननिष्ठानां योगिनामिति सूत्रार्थः अक्ष्यन्तरपुरुषः परमात्मा संयद्वामत्वादीनां गुणानामत्रैवोप
११ पत्तेः स्थानादिव्यपदेशाच्च ॥ स्थानं स्थितिः परमात्मन एव यश्चक्षुषि तिष्ठन्नित्यादौ चक्षुषि स्थितियमनादीनां व्यपदेशाच्चायं पर
मात्मा ॥ सुखविशिष्टाभिधानादेव च ॥ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति सुखविशिष्टतयाप्रकृतस्यैव परस्य ब्रह्मणोऽक्ष्याधारतयो
पासनाभिधानाच्चायं परमात्मा एवकारोऽस्य वहेतोर्नैरपेक्ष्यावगमाय प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति पत्र सुखविशिष्टं परमेव ब्र
ह्माभिहितमिति कथमवगम्यते यावता नामादिवत् प्रतीकोपासनमेवास्याशंकयाह ॥ अत एव च स ब्रह्म ॥ यतः सततभवभयभीता
योपकोशलायब्रह्मस्वरूपं निज्ञासवे कं च खं च तु न विजानामीति पृष्टे यद्वाव कं तदेव खं यदेव खं तदेव कमिति मन्योन्यव्य राम
वच्छेदकतया ऽपरिच्छिन्नसुखस्वरूपं ब्रह्म समभिधाय प्राणं चहास्मै तदाकाशं चाचुरित्युक्तं अत एव सुखशब्दाभिधेय २२

जीवउतपरमात्मेति संशयः जीव इति पूर्वः पक्षः भोक्तृत्वस्य कर्म्मनिमित्तत्वात् जीवस्यैव तत्संभवात् राद्धान्तस्तु सर्वोपसं
हारित्वरूपस्य चनमदनीयं चराचरात्मकं कृत्स्नं जगदित्यस्यौदनस्यात्ता परमात्मैव न चेदं कर्म्मनिमित्तं भोक्तृत्वमपि जग
तः सृष्टिस्थितिलयलीलस्य परमात्मनो जगदुपसंहारित्वरूपं भोक्तृत्वं सूत्रार्थः ब्रह्मक्षत्रौदनस्यात्ता परमात्मा ब्रह्मक्षत्रशब्देन चराचरा
त्मकस्य कृत्स्नस्य जगतो ग्रहणात् न मृत्यूपसेचनस्यौदनं ब्रह्मक्षत्रमात्रमपि तु तदुपलक्षितं चराचरात्मकं कृत्स्नं जगदेव प्रकरणाच्च
महान्तं विभुमात्मानं मत्वा धीरो न शोचति नायमात्मा प्रवचनेन लभ्य इति परस्यैव हीदं प्रकरणं अत्ता अयं परमात्मा अनन्तरं ऋतं
पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे इति द्वयोः कर्म्मफलादनश्रवणात् परमात्मनश्च कर्म्मफलादनासंभवात्
अन्तःकरणद्वितीयो जीव एवात्रात्मेति प्रतीयते अतोऽत्रापि स एव जीवो नाम भवितुमर्हतीत्याशंक्याह: गुहां प्रविष्टावात्मानौ हि तद्
र्शनात् गुहां प्रविष्टौ हि जीवात्मपरमात्मानौ जीवद्वितीयः परमात्मैव तत्र प्रतीयते इत्यर्थः स्वयमनश्नतोऽपि परमात्मनः
प्रयोजककर्तया पानेन्वयो दृश्यते जीवद्वितीयः परमात्मेति कथमवगम्यते तद्दर्शनात् तयोरेवास्मिन्प्रकरणे गुहाप्रवेश
व्यपदेशो दृश्यते तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीति
परमात्मनः या प्राणेन संभवत्यदितिर्देवतामयी गुहां प्रविश्य तिष्ठन्ती या भूतेभिर्व्यजायतेति जीवस्य कर्म्मफलान्यत्तीत्यदि
तिर्जीव विशेषणाच्च अस्मिन्प्रकरणे ह्युपक्रमप्रभृत्युपसंहारात् जीवपरमात्मानावेवोपास्योपासकत्व प्राप्यत्वप्राप्तृ

संभावनया नांतर्यामित्वप्रसक्तिः तथा प्रत्यगात्मनोपीत्यर्थः उभयेपि हि भेदेनैनमधीयते । उभये काण्वा माध्यंदिनाश्चापि यो विज्ञा
वे०प० २३ ने तिष्ठन् य आत्मनि तिष्ठन्निति पठतः प्रत्यगात्मनो भेदेनैनमंतर्यामिणमधीयते अतोयं तद्व्यतिरिक्तः परमात्मा ॥ अदृश्यत्वादिगु
णको धर्मोक्तेः अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमित्यारभ्य यद्भूतयोनिं परिपश्यंति धीराः अक्षरात्परतः प
र इत्यादौ किं प्रधानपुरुषौ प्रतिपाद्येते उत परमात्मेति संशयः प्रधानपुरुषाविति पूर्वपक्षः पृथिव्याद्यचेतनगतदृश्यत्वादीनां
प्रतिषेधात् तज्जातीयमचेतनं प्रधानमिव भूतयोन्यक्षरमिति प्रतीयते तथा चाक्षरात्परतः पर इति च तस्याधिष्ठाता पुरु
12 ष एवेति राद्धांतस्तु उत्तरत्रयः सर्वज्ञः सर्वविदिति प्रधानपुरुषयोरसंभावितं सर्वज्ञत्वमभिधाय तस्मादेतद्ब्रह्म नामरूपम
न्नं च जायत इति सर्वज्ञात्सत्यसंकल्पाज्जगदुत्पत्तिश्रवणात् पूर्वोक्तमदृश्यत्वादिगुणकः परमात्मा सार्वज्ञ्यादितद्धर्मोक्तेः ॥
विशेषणभेदव्यपदेशाभ्यां च नेतरौ विशिनष्टि हि प्रकरणं प्रधानात् भूतयोन्यक्षरमेकविज्ञानेन सर्वविज्ञानादिना त
थाक्षरात्परतः पर इत्यक्षराद्व्याकृतात् परत्वोपस्थितात् पुरुषात्पर इति पुरुषाच्च व्यासभूतयोन्यक्षरस्य भेदो व्यपदिश्यते
अतश्च न प्रधानपुरुषौ अपि तु परमात्मैवात्र निर्दिष्टः रूपोपन्यासाच्च । अग्निर्मूर्द्धेत्यादिना समस्तस्य चिदचिदात्मक राम
प्रपंचस्य भूतयोन्यक्षररूपत्वेनोपन्यासाच्चायमदृश्यत्वादिगुणकः परमात्मा ॥ वैश्वानरः साधारणशब्दविशेषात् छां २३
दोग्ये आत्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्यारभ्य यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानर

स्वगताकाशे परिच्छिन्नसुखविशिष्टं परं ब्रह्मैव॰ श्रुतोपनिषत्कगत्यभिधानाच्च॰ श्रुतोपनिषत्कैरधिगन्तव्यस्वरूपापात्मेयर्ब्रह्मप्रा
प्त्युपायगतिरर्चिरादिकाधिगन्तव्यत्वेनावगता श्रुतं तत्रैतस्याक्षोहाहित्वपुरुषं श्रुतवतोऽधिगन्तव्यतयार्चिषमेवाभिसंभवन्तीत्या
दिनाभिधानादक्षिपुरुषः परमात्मा॰ अनवस्थितेरसंभवाच्च नेतरः॰ परमात्मन इतरो जीवादिकः तस्याक्षिणि नियमेनान
वस्थितेरमृतत्वसंयद्वामत्वादीनां चासंभवान्नासावक्ष्याधारः॰ अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात्॰ बृहदारण्यके
यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इ
त्यादिषु सर्वेषु पर्यायेषु श्रूयमाणोऽन्तर्यामी किं प्रत्यगात्मोत परमात्मेति संशयः॰ प्रत्यगात्मेति पूर्वपक्षः॰ वाक्यशेषे द्रष्टा श्रोता मं
न्तेति द्रष्टृत्वादिश्रुतेः॰ नान्योऽतोऽस्ति द्रष्टेति द्रष्टन्तरनिषेधाच्च॰ राद्धान्तस्तु पृथिव्याद्यात्मपर्यन्तसर्वतत्त्वानां सर्वैरेभिरदृष्टेनैकेन नि
यमनं नाम निरुपाधिकामृतत्वादिकं च परमात्मन एव धर्मः॰ इत्यन्तर्यामी परमात्मा॰ अदृष्टत्वादि अरूपादिसाक्षात्कारस्य च प्रयोजनस्य चक्षुस्सम्ब
न्धात्मकत्वं इत्यादिना च परमात्मनोऽप्यस्ति नान्योऽतोऽस्ति द्रष्टेति जीवेनादृष्टोऽन्तर्यामी द्रष्टेति॰ अन्तर्यामिणोऽन्यद्रष्टृद्रष्टन्तरनिषेध
परः॰ सूत्रार्थः॰ अधिदैवाधिलोकादिपदचिह्नितेषु वाक्येषु श्रूयमाणोऽन्तर्यामी परमात्मा सर्वान्तरत्वसर्वविदितत्वसर्वशा
रीरकत्वसर्वनियमनत्वसर्वात्मत्वामृतत्वादिपरमात्मधर्माणां व्यपदेशात्॰ न च स्मार्तमतद्धर्माभिलापाच्छारीरश्च सां
ख्यप्रधानं शारीरः प्रत्यगात्मा स्मार्तं च शारीरश्च नान्तर्यामी तयोरसंभावितात्मधर्माभिलापात्॰ यथा स्मार्तसांख्येतन्न सा

वे०प०
२५

विधं पुरुषेऽन्तः प्रतिष्ठितं वेदेति वैश्वानरस्य पुरुषशरीरांतःप्रतिष्ठितत्वं प्रतीयतेऽत एतैर्लिंगैर्वैश्वानरस्य जाठराग्नित्वप्रतीतेर्नायं परमा
त्मेति शंकानिरासाय इति चेन्न तथा दृष्ट्युपदेशात् दृष्टिरूपासनं तयोपासनोपदेशादित्यर्थः जाठराग्निशरीरतया वैश्वानरस्य परमात्
मन उपासनमात्रोपदिश्यते अयमग्निर्वैश्वानरः पुरुषेऽन्तः इत्यादौ कथमवगम्यत इति चेदसंभवात् केवलजाठराग्नेस्त्रैलोक्यशरीर
त्वासंभवात् पुरुषमपि चैनमधीयते च शाखिनः प्रसिद्धा वाजसनेयिनस्तत्रैव स एषोऽग्निर्वैश्वानरो यत्पुरुष इत्यनेन वैश्वानरं पुरुषमप्य
धीयते पुरुषश्च परमात्मैव पुरुष एवेदं सर्वं पुरुषान्न परं किंचिदित्यादिश्रुतिप्रसिद्धेः अत एव न देवता भूतं च यतस्त्रैलोक्यशरी
रोऽसौ वैश्वानरः यतश्च निरुपाधिकपुरुषशब्दनिर्दिष्टः अत एव नाग्न्याख्या देवता महाभूतं तृतीयश्च वैश्वानरः शंकनीयः साक्षा
दप्यविरोधं जैमिनिः अग्निशरीरतया वैश्वानरस्योपासनार्थमग्निशब्दस्याग्रनयनादिना योगेन साक्षात्परमात्मनि वर्तनेन क
श्चिद्विरोध इति जैमिनिराचार्यो मन्यते यस्त्वेतमेवं प्रादेशमात्रमभिविमानं वैश्वानरमिति द्युप्रभृतिपृथिव्यंतः प्रादेशसंबंधिन्या
13
मात्रयावच्छिन्नस्यैव परमात्मनो वैश्वानरस्य कथमुपपद्यत इत्याह अभिव्यक्तेरित्याश्मरथ्यः अनवच्छिन्नस्यैव परमात्म
न उपासकाभिव्यक्त्यर्थं द्युप्रभृति प्रादेशपरिच्छिन्नत्वमित्याश्मरथ्य आचार्यो मन्यते द्युप्रभृति प्रादेशावच्छेदेनाभिव्यक्त
स्य परमात्मनोऽग्निद्युभ्वादित्यादीनां मूर्द्धाद्यवयवकल्पनं किमर्थमिति चेत्तत्राह अनुस्मृतेर्बादरिः अनुस्मृतिरूपा।
सनं ब्रह्मप्राप्तये तयोपासनार्थं मूर्द्धप्रभृतिपादांतदेहपरिकल्पनमिति बादरिराचार्यो मन्यते अयं वैश्वानरः परमा राम
त्मैव त्रैलोक्यशरीर उपास्य उपदिश्यते चेदुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्य इत्यादिना उपासकशरीरावयवानां २५

मुपास्ते इत्यत्र किमयं वैश्वानर आत्मा परमात्मेति शक्यनिर्णय उत नेति संशये अशक्यनिर्णय इति पूर्वःपक्षः वैश्वानरशब्दस्य जा
ठराग्नौ महाभूताग्नौ देवताविशेषे परमात्मनि च वैदिकप्रयोगदर्शनात् अस्मिन्प्रकरणे सर्वेषां लिंगोपलब्धेश्चारम्भात्तु को
न्वात्मा किं ब्रह्मेति सर्वेषां जीवानामात्मभूतं ब्रह्म तत्किमिति उपक्रमादुत्तरत्र चात्मानं वैश्वानरमिति ब्रह्मणश्च स्थाने सर्वत्र वै
श्वानरप्रयोगाद्वैश्वानर आत्मा सर्वेषां जीवानामात्मभूतं परं ब्रह्मेति विज्ञायते सिद्धान्तार्थः वैश्वानरशब्दनिर्दिष्टः परमा
त्मा वैश्वानरशब्दस्यानेकार्थसाधारणत्वेऽपि अस्मिन्प्रकरणे परब्रह्मासाधारणविशेषणैः सर्वात्मत्वादिभिर्विशेष्यमाणत्वात्
विशेष्यते इति विशेषः स्मर्यमाणमनुमानं स्यादिति । स्मर्यमाणं प्रत्यभिज्ञायमानं अनुमीयतेऽनेनेत्यनुमानं इति शब्दः प्रका
रवचनः इत्थंरूपं स्मर्यमाणं वैश्वानरस्य परमात्मत्वेऽनुमानं स्यात् द्युप्रभृतिपृथिव्यन्तरमवयवविभागेन वैश्वानरस्वरूपमि
होपदिष्टं अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ द्यौ मूर्धानमस्य विप्रा वदन्तीति च श्रुतिस्मृतिप्रसिद्धं परमपुरुषरूपमिह प्रत्यभिज्ञाय
मानं वैश्वानरस्य परमपुरुषत्वे लिंगं स्यादित्यर्थः अनिर्णयमाशंक्य परिहरति शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथा
दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते शब्दादिभ्यः शब्दस्तावद्वाजिनां वैश्वानरविद्याप्रकरणे स एषोऽ
ग्निर्वैश्वानर इति वैश्वानरशब्दसमानाधिकरणोऽग्निशब्दस्तस्मिन्प्रकरणे च हृदयं गार्हपत्य इत्यारभ्य वैश्वानरस्य हृ
दयादिस्थानस्याग्नित्रयपरिकल्पनं प्राणाहुत्याधारत्वमित्यादि प्रतीयते वाजिनामपि स यो हवैतमेवमग्निं वैश्वानरं पुरुष

द्याद्यं परमात्मा॰ नानुमानमतच्छब्दात्॰ अनुमानगम्यं प्रधानं यथा न तन्नि प्राणभृन्मात्रवादिहतम् एतेन तथा प्राणभृदपि सर्वं अ
वे॰ प॰ तश्चाद्यं परमात्मा॰ भेदव्यपदेशाच्च॰ अनीशया शोचति मुह्यमानः जुष्टं यदा पश्यत्यन्यमीशमित्यादिना जीवात् भेदेन व्यपदेशाद्द्या
२५ द्यं परमात्मा॰ प्रकरणात्॰ अथ परा यया तदक्षरमधिगम्यते इत्यादिना परमात्मन एव प्रकृतत्वात् स्थित्यदनाभ्यां च॰ तयोरन्यः पि
प्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति कर्मफलमनश्नतः परमात्मनो दीप्यमानतया स्थितेर्जीवस्य कर्मपरवशतया फलादनाच्च
परमात्मनो जीवाद्भेदावगमात् अत्र न सेतुर्द्युभ्वाद्यायतनं न जीवः अल्पत्वादिगुणक इत्यनेन परमात्मत्वेऽस्यापि तेऽपि नाडीसंबंध
जायमानत्वलिंगात् प्राणकरणे विच्छेदाशंका सा निराकृता द्युभ्वाद्यायतनमिति वैश्वानरस्यैव त्रैलोक्यशरीरत्वादिना परमात्मत्वाभि
धानात् इति मध्ये वैश्वानरविद्यानिरूपणात्॰ भूमा संप्रसादादध्युपदेशात्॰ छांदोग्येऽपि यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजाना
ति स भूमेत्यत्र भूमशब्दनिर्दिष्टो निरतिशयवैपुल्यविशिष्टसुखस्वरूपः किं प्रत्यगात्मा उत परमात्मेति संशयः प्रत्यगात्मेति पू
र्वपक्षः तरति शोकमात्मविदिति प्रकृत्य नामादिपरंपरयोत्तरभूयस्त्वेन प्रश्नप्रतिवचनाभ्यां प्रवृत्तस्यात्मोपदेशस्य प्राणश
ब्दनिर्दिष्टे प्रत्यगात्मनि समाप्तिदर्शनात् प्रत्यगात्मन एव भूमसंशब्दनमिति प्राप्ते राद्धान्तस्तु पद्यति प्रश्नप्रतिवचनाभ्या
मुत्तरोत्तरभूयस्त्ववचनं प्राणपर्यवसितं तथापि प्राणवेदिनोऽतिवादित्वमुक्त्वा एष तु वा अतिवदति यः सत्येनातिवदतीति तु
शब्देनोपासकभेदं प्रतिपाद्य तस्य सत्योपासकस्य पूर्वस्मादाधिक्योपदेशात् सत्यशब्दाभिधेयं परं ब्रह्मैव भूमा विशि राम
ष्टमिति सूत्रार्थस्तु भूमगुणविशिष्टं परं ब्रह्मैव संप्रसादादध्युपदेशात् स एष संप्रसादः प्रत्यगात्मा स एव संप्रसा। २५

गार्हपत्यादिपरिकल्पनं किमर्थमित्यत्राह ॰ संपत्तेरिति जैमिनिः तथा हि दर्शयति ॰ वैश्वानरविद्यांगभूतायामुपासकैरहरहः क्रिय
माणायाः प्राणाहुतेरग्निहोत्रत्वसंपादनाय गार्हपत्यादिपरिकल्पनमिति जैमिनिराचार्यो मन्यते तथा ह्यग्निहोत्रसंपत्तिमेवद(
र्शयति श्रुतिः प्राणाहुतिविधायाय य एवं विद्वानग्निहोत्रं जुहोतीत्युक्तानामर्थानां पूजितत्वस्थापनायाचार्यग्रहणम् आम
नंति चैनमस्मिन् एतं परमपुरुषं वैश्वानरं द्युभ्वादिमूर्धादिदेहमस्मिन्नुपासकदेहे प्राणाग्निहोत्राराध्यतयामनंति हि तस्य ह वा
एतस्य मूर्द्धैव सुतेजा इत्यादिना उपासकस्य मूर्द्धादिपादान्तानेव द्युप्रभृतयः परमपुरुषस्य मूर्द्धादय इति प्राणाग्निहोत्रवेलायामनुसं
धेय इत्यर्थः ॥ ८ ॥ इति श्रीभगवद्रामानुजाचार्यविरचिते वेदान्तदीपे प्रथमाध्यायस्य द्वितीयः पादः ॥२॥ द्युभ्वाद्यायतनं स्वशब्दा
त् ॰ आथर्वणे यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैः सर्वैस्तमेवैकं जानथ आत्मानमित्यत्र पृथिव्यादीनामायतनं किं जी
व उत परमात्मेति संशयः जीव इति पूर्वपक्षः मनःप्रभृतीन्द्रियाधारत्वश्रुतेः उत्तरत्र नाडीसंबंधात् जायमानत्वश्रुतेश्च राद्धान्त(
स्तु निरुपाधिकात्मत्वामृतसेतुत्वयोः परमात्मधर्मयोः श्रवणात् परमात्मैवायं सर्वनियंतृतयात्मशब्दोऽतीति स्यात्मागमत्स(
प्रापकतया सेतुश्च स एव नाडीसंबंधो बहुधा जायमानत्वं च संततं नाडीशिराभिस्तत्त्वमाकाशसत्त्वमजायमानो बहुधा विजा(
यते इत्यादिकं सर्वसमाश्रयणीयत्वादजहात्स्वभावस्यैव परमात्मनो दृश्यते सूत्रार्थस्तु द्युपृथिव्यादीनामायतनं परमात्मा स्व
शब्दात् स्वाधारणात्मादिशब्दात् ॰ मुक्तोपसृप्यव्यपदेशाच्च ॰ तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति तथा विद्वा
न्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यं पुण्यपापे विधूय नामरूपाद्विमुक्त इति च ॰ बंधान्मुक्तस्य प्राप्यतया व्यपदेशा

वर्तयति वाक्यशेषः सहैतेङ्क्षेत्यादिना सर्वैरेवादृष्टमेतद्दृष्टं सर्वं सद्दृष्टेत्यादिना प्रधानजीवयोरसंभावनीयार्थप्रतिपादनात् ॥१२॥
वे०प० ईक्षतिकर्म्मव्यपदेशात्सः आथर्वणिकानां सत्यकामप्रश्ने यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परमपुरुषमभिध्यायीत स सा
२६ म्भिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत इत्यत्र ध्यायतीक्षतिकर्मतयाव्यपदिष्टः
परमपुरुषः किं हिरण्यगर्भः उत परब्रह्मेति संशयः हिरण्यगर्भ इति पूर्वपक्षः पूर्वत्रैकमात्रप्रणवमुपासीनस्य
मनुष्यलोकप्राप्तिफलं द्विमात्रप्रणवमुपासीनस्यान्तरीक्षलोकप्राप्तिं च फलमभिधायानन्तरं यः पुनरेतं त्रिमात्रेणेति त्रिमा
त्रप्रणवमुपासीनस्य फलत्वेनाभिधानाद् ब्रह्मलोकस्य पुरुषेक्षणं कर्म्मभूतस्य चतुर्मुखस्यैवेति ज्ञायते मनुष्यलोकान्तरीक्षलो
कसाहचर्यात् ब्रह्मलोकोऽपि चतुर्मुखलोक इति निश्चयात् राद्धान्तस्तु परात्परं पुरिशयं पुरुषमीक्षत इतीक्षतिकर्मतयानिर्दिष्ट
25 परमपुरुषविषये श्लोके तमोंकारेणैवायतनेनान्वेति विद्वान् यत्तच्छान्तमजरममृतमभयं परं चेति निरुपाधिकशान्तत्वा
दिव्यपदेशात्परमात्मैवायमिति निश्चीयते एवं परमात्मत्वे निश्चिते ब्रह्मलोकशब्दश्च तत्स्थानमेवाभिदधातीत्यवग
म्यते तद्विषयोदाहृते च श्लोके यत्तत्कवयो वेदयन्ते तद्विष्णोः परमं पदं सदा पश्यन्ति सूरय इत्येवमादिभ्य इतीक्षतेरभिन्नविष
यवचनं तदेव द्रष्टयति सूत्रार्थस्तु ईक्षतिकर्म्म स परमात्मा ध्यायतीक्षत्योरेकविषयत्वेन ध्यायतिकर्म्मापि स एवेत्यर्थः राम २६
व्यपदेशात् तद्विषयतयाशान्तमजरममृतमभयं परं चेति परमात्मधर्म्माणां व्यपदेशात् दहर उत्तरेभ्यः छान्दोग्ये अथ यद

दोस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसंपद्येत्युपनिषत्प्रसिद्धेः एष तु वा अतिवदति प्रत्यगात्मनोधिकतयोपदेशात् अतिवादित्वं हि
स्वोपास्याधिक्यवादित्वं॰ धर्म्मोपपत्तेश्च॰ स्वाभाविकामृतत्वस्वमहिमप्रतिष्ठितत्वसर्वात्मत्वसर्वोत्पत्तिहेतुत्वादीनां भूम्नि श्रूयमाण
नां धर्म्माणां परस्मिन्नेव ब्रह्मण्युपपत्तेश्च भूमा परं ब्रह्मैव॰ अक्षरमंबरांतधृतेः वाजिनां गार्गीप्रश्ने स होवाचैतद्वै तदक्षरं गार्गी
ब्राह्मणा अभिवदंति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छायमित्यत्राक्षरशब्दनिर्दिष्टं प्रधानं जीवो वा उत परमात्मेति संश
यः प्रधानं जीवो वा न परमात्मेति पूर्वपक्षः कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेत्युक्ते आकाशाधारतयोक्तमानमक्षरं प्रधानं जीवो वा
प्रधानस्य विकारास्पदत्वात् जीवस्याचित्सूक्ष्माधारत्वात् राद्धान्तस्तु यदूर्ध्वं गार्गि दिव इत्यारभ्य कालत्रयवर्तिकृत्स्नस्याधारतया निर्दि
ष्टः आकाशोऽव्याकृतमेव न वायुमानाकाशः ततः एतस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति प्रष्टे आकाशाधारतयोक्तमा
नमेतदक्षरं न प्रधानं भवितुमर्हति नापि जीवः एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचंद्रमसौ विधृतौ तिष्ठत इत्यारभ्य प्रशासना
त्सर्वाधारत्वश्रुतेः सूत्रार्थस्तु एतद्वैतदक्षरं गार्गीति निर्दिष्टमक्षरं परमात्मा अंबरांतधृतेः अंबरं वायुमानाकाशः अंबरांतः अंबराधार
भूतः अंबरकारणमिति यावत् कारणावधिरेव हि कार्यस्यांतः सचांबरांतोऽव्याकृतं प्रधानं तस्य धृतेः धारणात् अव्याकृतस्यापि धृते
रक्षरं परमात्मैवेत्यर्थः एवं तर्हि जीवो भवितुमर्हति तस्य प्रधानधृत्युपपत्तेरित्याशंक्याह॰ सा च प्रशासनात्॰ सा चांबरांतधृतिरेत
स्याक्षरस्य प्रशासने गार्गीति प्रशासनाच्छ्रूयते प्रशासनं प्रकृष्टं शासनं अप्रतिहताज्ञा अप्रतिहताज्ञया कृत्स्नस्य चिदचिदा
त्मकस्य जगतो धृतिर्जीवे उपपद्यते अतो न जीवः अन्यभावव्यावृत्तेश्च अन्यभावो अन्यत्वमस्याक्षरस्य परमपुरुषादन्यत्वं सा

दादाविर्भूतगुणकः प्रजापतिवाक्ये प्रतिपादितः दहराकाशस्तु आविर्भूततिरोहितत्वनिरुपाधिकापहतपाप्मत्वादिकः प्रत्यगात्मत्वसंभावनी
वे०सू० २१ यज्जगद्विधारणसमस्तचिदचिद्वस्तुनियमनादिपरं तद्गुणक इति पत्र इति नापि प्रत्यगात्मा दहराकाशः अपितु परमात्मैवेति मन्यते सू
त्रार्थस्तु दहराकाशः परं ब्रह्मोत्तरेभ्यो वाक्यगतेभ्यो पहतपाप्मत्वादिपरमात्मासाधारणधर्मेभ्यो हेतुभ्यः गतिशब्दाभ्यां तथाहि दृष्टं
लिंगं च अस्मिन्दहराकाशे सर्वासां प्रजानां तमजानन्तीनामहरहर्गतिः अपि तेयद्दहराकाशपरामर्शरूपेण तच्छब्दस
मानाधिकरणतया प्रयुक्तो ब्रह्मलोकशब्दः साभ्यां दहराकाशः परं ब्रह्मेत्यवगम्यते तद्यथापि हिरण्यनिधिं निहितं क्षेत्रज्ञा उपर्युपरि
संचरन्तो न विन्देयुरेवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति अनृतेन हि प्रत्यूढा इति तथाहि दृष्टं तथा अन्यत्र
१६ परस्मिन्ब्रह्मण्येवं स्वसंगमनं दृष्टं एवमेव खलु सोम्येमाः सर्वाः प्रजाः सति संपद्य न विदुः सति संपद्यामह इति सत आगम्य न
विदुः सत आगच्छामह इति तथा ब्रह्मलोकशब्दस्य परस्मिन्ब्रह्मणि दृष्टः एष ब्रह्मलोकः सम्राडिति होवाचेति लिंगं च माभू
दन्यत्र दर्शनं अस्मिन्प्रकरणे सर्वासां प्रजानां श्रूयमाणमहरहर्गमनं ब्रह्मलोकशब्दश्च दहराकाशस्य परमात्मत्वे पर्याप्तं
लिंगं च शब्दो वधारणे एतदेव पर्याप्तमित्यर्थः धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः अस्य धृत्याख्यस्य परमात्मनो महिम्नो
ऽस्मिन्दहराकाश उपलब्धेरयं परमात्मा धृतिर्जगद्विधरणं परमात्मनो महिमेत्यन्यत्रावगम्यते एष सर्वेश्वर एष भूता राम
धिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदायेति स चास्मिन्दहराकाश उपलभ्यते अथ य आत्मा स १५

दिदमस्मिन्ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नंतराकाशस्तस्मिन्यदंतस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्यत्र दहरपुंडरीकमध्यव
र्तिदहराकाशः श्रूयमाणः किंभूताकाशः उत जीवः अथ परमात्मेति संशयः प्रथमं तावद्भूताकाश इति युक्तमाश्रयितुमिति पूर्वपक्षः भू
ताकाशे प्रसिद्धिप्राचुर्यात् आकाशांतर्वर्तिनो वस्तुनोऽन्वेष्टव्यताप्रतीतेश्च राद्धांतस्तु किं तदत्र विद्यते यदन्वेष्टव्यमिति चोदितो यावान्
यमाकाशस्तावानेषोऽन्तर्हृदयाकाश इत्यारभ्य एतत्सत्यं ब्रह्मपुरमित्यंतेन दहराकाशस्यातिमहत्त्वसर्वाश्रयत्वाजरत्वसत्यत्वाद्यभिधा
यास्मिन्कामाः समाहिता इत्याकाशांतर्वर्तिनोऽन्वेष्टव्याः कामा इति प्रतिपाद्य कोऽयं दहराकाशशब्दनिर्दिष्टः के तदाश्रयाः कामा इत्य
पेक्षायां एष आत्मापहतपाप्मेत्यारभ्य सत्यसंकल्प इत्यंतेनाकाशशब्दनिर्दिष्ट आत्मा कामाश्चापहतपाप्मत्वादयस्तद्विशेषणभूता
इति प्रतिपाद्य तद्वाक्यमपहतपाप्मत्वादिविशिष्टमात्मानमाह अत उपक्रमे चान्वेष्टव्यतया प्रतिज्ञातः आकाशस्थ आत्मा एतद्विशेष
णभूताश्चापहतपाप्मत्वादयः कामा इति ज्ञापयद्वाक्यमिदमथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लो
केषु कामचारो भवति इत्युपसंहरति अत्रायं दहराकाशोऽपहतपाप्मत्वादिविशिष्टः परमात्मेति निश्चीयते न भूताकाशादिरि
ति एवं तर्हि अस्मिन्वाक्ये य एष संप्रसादोऽस्माच्छरीरात्समुत्थायेति प्रत्यगात्मनः प्रतीतेः तस्य चोत्तरत्र प्रजापतिवाक्येऽप
हतपाप्मत्वादिगुणकत्वावगमात् प्रत्यगात्मैव दहराकाश इति पूर्वपक्षो मन्यते राद्धांतस्तु प्रत्यगात्मा कर्मपरवशात्तया जा
गरितस्वप्नसुषुप्त्याद्यवस्थादिभिस्तिरोहितापहतपाप्मत्वादिकः प्रत्यगात्मात्मस्वभाव परमात्मानमुपसंपन्नस्तत्र सा

अनुकृतेरनुकारस्य परमात्मनोऽनुकाराद् जीवस्याविर्भूतस्वरूपस्यापहतपाप्मत्वादिगुणकत्वं अनुकर्तुर्जीवादनुकार्यः परब्रह्मभूतोद
वे॰प॰ हराकारस्य परमात्मनोऽनुकाराद्धि जीवस्याविर्भूतस्वरूपस्यापहतपाप्मत्वादिगुणकत्वं अनुकर्त्ता शोर्पांतरभूत एव तदनुकारश्च
१८ तत्साम्यापत्तिः अयमेव च यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं सा
च म्यमुपैतीति अपि स्मर्यते स्मर्यते च तदुपासनात् तत्साम्यापत्तिरूपानुकृतिर्जीवस्य इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः स
र्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति चेति ॥ शब्दादेव प्रमितः ॥ कठवल्लिष्वाम्नायते अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति ई
शानो भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत् अंगुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः तथोपरिष्टात् अंगुष्ठमात्रः
17 पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्ट इत्यत्रांगुष्ठप्रमितो जीवात्मा उत परमात्मेति पूर्वपक्षः अन्यत्र स्पष्टजीवभावे पुरु
षेऽङ्गुष्ठप्रमितत्वश्रवणे प्राणाधिपः संचरति स्वकर्मभिरङ्गुष्ठमात्रो रवितुल्यरूप इति राद्धान्तस्तु तत्र स्वकर्मभिरिति जीवत्वनि भाव
श्चयवदत्रापि ईशानो भूतभव्यस्येति ईशित्वदर्शनात् परमात्मैवेति सूत्रार्थस्तु शब्दादेव प्रमितः अंगुष्ठप्रमितः परमात्मैव ई
शानो भूतभव्यस्येति परमात्मवाचिशब्दात् कथमनवच्छिन्नस्य परमात्मनोऽवच्छिन्नत्वमित्याशंक्याह हृद्यपेक्षया तु मनुष्याधि राम
कारत्वात् उपासनार्थमुपासकहृदये वर्तमानत्वात् उपासकहृदयस्यांगुष्ठमात्रत्वात् तदपेक्षयेदमंगुष्ठप्रमितत्वं मनुष्याणामे १८
वोपासकत्वसंभावनया मनुष्यानधिकृत्य प्रवृत्तत्वाच्छास्त्रस्य मनुष्यहृदयापेक्षयेदमुक्तं स्थितं तावदुत्तरत्र समापयिष्यते ॥

सेतुर्विधृतिरेषां लोकानामसंभेदायेति प्रसिद्धेश्च कोह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् सर्वाणि ह वा इमानि भू-
तान्याकाशादेव समुत्पद्यन्ते इत्यादिषु आकाशशब्दस्य परस्मिन्ब्रह्मणि प्रसिद्धेराकाशशब्दस्य परस्मिन्ब्रह्मणि प्रसिद्धेराकाशश-
ब्द एव परमात्मधर्मविशेषितो भूताकाशशंकां निवर्तयतीत्यर्थः इतरपरामर्शात्स इति चेन्नासंभवात् परमात्मन इतरो जी-
वः तस्य य एष संप्रसादोस्माच्छरीरात्समुत्थायेति जीवस्य परामर्शात्स एव दहराकाश इति चेन्न पूर्वोक्तानां गुणानां तस्मि-
न्नसंभवात् उत्तराच्चेदाविर्भूतस्वरूपस्तु उत्तरात्प्रजापतिवाक्यादपहतपाप्मत्वादिगुणको जीवोवगम्यते इति चेन्न जागरिता-
द्यवस्थाभिरनादिकालप्रवृत्ताभिः पुण्यपापकर्ममूलाभिस्तिरोहितगुणकः परब्रह्मोपासनजनिततदुपसंपत्त्याविर्भूतस्वरूपो।
सौ जीवस्तत्र प्रजापतिवाक्येऽपहतपाप्मत्वादिगुणकः कीर्तितः दहराकाशस्त्वतिरोहितस्वरूपापहतपाप्मत्वादिगुणकः इ-
त्यतोस्मिन्दहराकाशे न जीवाशंका दहरवाक्ये जीवपरामर्शः किमर्थमिति चेत्तत्राह अन्यार्थश्च परामर्शः अस्माच्छ-
रीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति परंज्योतिः स्वरूपदहराकाशोपसंपत्त्यास्य जीवस्यातिरो-
हितस्वरूपस्य स्वरूपाविर्भावो भवतीति दहराकाशस्य जगद्विधारणादिवत्तज्जीवस्वरूपाविर्भावापादनरूपसंपद्विशेषप्रतिपाद-
नार्थो जीवपरामर्शः अल्पश्रुतेरिति चेत्तदुक्तम् दहरोस्मिन्नित्यल्पपरिमाणश्रुतिराराग्रोपमितस्य जीवस्यैवोपपद्यते न
तु सर्वस्माज्ज्यायसो ब्रह्मण इति चेत्तत्र प्रत्युत्तरं वक्तव्यं तत्पूर्वमेवोक्तमिति निचाय्यत्वादेवं व्योमवदित्यनेन अनुकृतेस्तस्य च

क्तिमतां सोभरिप्रभृतीनां युगपदनेकशरीरप्रतिपत्तिदर्शनात् शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां विरोध इति वर्त्तते माभू
त्कर्म्मणि विरोधः शब्दे तु वैदिके विरोधः प्रसज्येत विग्रहवत्वे हि तेषामवयववत्वेनोत्पत्तिविनाशयोगात् उत्पत्तेः प्राग्विनाशादूर्ध्वं च
वे॰प॰ २९ वैदिकानामिन्द्रादिशब्दानामर्थशून्यत्वमनित्यत्वं वा स्यात् इति चेत्तन्न अतः प्रभवात् अतो वैदिकादेव शब्दादिन्द्रादेः प्रभ
वात्पूर्वपूर्वेन्द्रादौ विनष्टे वैदिकादिन्द्राद्याकृतिविशेषवाचिनः शब्दादिन्द्राद्याकृतिविशेषं स्मृत्वा तदाकारमपरमिन्द्रादि
कं सृजति प्रजापतिरिति वैदिकशब्दस्य न कश्चिद्विरोधः नहि देवदत्तादिवदिन्द्रादिशब्दाः व्यक्तिविशेषसंकेतपूर्वकाः प्रवृ
त्ताः अपि तु गवादिशब्दवदाकृतिविशेषवाचिन इति तेषामपि नित्य एव वाच्यवाचकभावः वैदिकादिन्द्रादिशब्दात् तदर्थ
18 विशेषं स्मृत्वा कुलालादिरिव घटादिकं प्रजापतिः सृजतीति कुतोवगम्यते प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामित्यर्थः ।।
श्रुतिस्तावत् वेदेन नामरूपे व्याकरोत् सतासती प्रजापतिः स भूरिति व्याहरत् स भूमिमसृजतेत्यादि स्मृतिरपि
नामरूपं च भूतानां कृत्यानां च प्रपञ्चनं वेदशब्देभ्य एवादौ देवादीनां चकार स इत्यादिका अत एव च नित्यत्वं यतः प्रजापति
वैदिकाच्छब्दादर्थाकारं स्मृत्वा तदाकारं सर्वं सृजति अत एव वसिष्ठविश्वामित्रादीनां मंत्रसूक्तादिकर्तृत्वेपि मंत्रादिमयस्य वेदस्य नि। राम २९
त्वसिष्ठस्येव प्रजापतिर्हि नैमित्तिकप्रलयानंतरं मंत्रकृतो वः इति विश्वामित्रस्य सूक्तं भवतीत्यादिवेदशब्देभ्यो नष्टानां मंत्रादिदर्शनश
क्तवसिष्ठाद्याकृतिविशेषं स्मृत्वा वसिष्ठादिपदप्राप्तयेनुष्ठितकर्म्मविशेषाननुस्मृत्य तदाकारान् सान्वसिष्ठादीन् सृजतीति

तदुपर्यपि बादरायणः संभवात् मनुष्याधिकारं ब्रह्मोपासनशास्त्रमित्युक्ते तत्प्रसंगेन देवादीनामपि ब्रह्मविद्यायामधिकारो।
स्ति नेति चिंत्यते तेन देवादीनामधिकारोस्तीति पूर्वपक्षः परिनिष्पन्ने ब्रह्मणि शब्दस्य प्रामाण्यसंभवेपि देवादीनां विग्रहादिम
त्त्वे प्रमाणाभावात् मंत्रार्थवादादीनामपि विधिशेषतया विग्रहादिसद्भावपरत्वाभावाच्च विग्रहवन्निर्वर्त्याहरहरनुष्ठीय
मानविवेकादिसाधनसंपन्नकसंस्कृतमनोनिष्पाद्योपासननिर्वर्तने तेषां सामर्थ्याभावात् राद्धांतस्तु जगत्सृष्टिप्रकरणेषु ना।
मरूपव्याकरणश्रुत्यैव देवादीनां विग्रहवत्त्वं सिद्ध्यति देवादीनां देहेन्द्रियादिकरणमेव हि नामरूपव्याकरणं मंत्रार्थवादयो
श्चानुपलब्धेस्तयोरनुष्ठेयप्रकाशनस्तुतिपरत्वेपि तत्तदुपपत्तये तत्सद्भावे प्रामाण्यमतो देवादीनां विग्रहादिमत्त्वसिद्धिः नहि
विग्रहादिमत्तया स्तुतिः प्रकाशनं च तत्सद्भावे संभवति अतस्तत्सामर्थ्यसंभवात्तेषामप्यधिकारः सूत्रार्थस्तु तदुपर्यपि तेभ्यो म
नुष्येभ्यः उपरि वर्तमानानां देवादीनामप्यधिकारोस्ति तेषामपि ब्रह्मस्वरूपतदुपासनप्रकारज्ञानतदर्थित्वतदुपास
नसामर्थ्यसंभवात् पूर्वोपार्जितज्ञानाविस्मरणात् ज्ञानसंभवः तापत्रयाभिहितिपूर्वकब्रह्मगुणज्ञानाच्चार्थित्वसंभवः
सृष्टिवाक्यमंत्रार्थवादेषु विग्रहादिमत्त्वदर्शनात् सामर्थ्यसंभव इति भगवान्बादरायणो मन्यते विरोधः कर्मणीति चेन्नानेक
प्रतिपत्तेर्दर्शनात् कर्मणि यागादौ विग्रहवत्त्वे सत्येकस्य युगपदनेकयागेषु सन्निधानानुपपत्तेर्विरोधः प्रसज्यत इति चेत्तन्न अश।

णां भोग्यत्वेनाभिधायतैर्भुज्यमानाकारेणादित्यांशानुपास्यानुपदिश्य तानेवादित्यांशांस्तथाभूतान् प्राप्यानुवदति एवमादिषू
वे०प० पासने वस्वादित्यादीनामधिकारोऽस्ति नेति संशयः नास्त्यधिकार इति पूर्वपक्षः वस्वादीनामुपास्यान्तर्गतत्वेन कर्मकर्तृभावविरो
२० धात् प्राप्यस्य वसुत्वादेः प्राप्तत्वाच्च राद्धांतस्तु ब्रह्मण एव तत्तद्वस्वाद्युपास्यत्वाद् वस्वादीनामतत्त्वावस्थापन्नब्रह्मानुसंधानावि
रोधात् कल्पान्तरे वसुत्वादेः प्राप्यत्वाविरोधाच्च वस्वादीनामप्यधिकारः संभवतीति सूत्रार्थस्तु मधुविद्यादिषु वस्वादीनाम
नधिकारं जैमिनिर्मन्यतेऽसंभवात् वसूनामेवोपास्यानामुपासकत्वासंभवात् वसुत्वादेः प्राप्तत्वादेव प्राप्यत्वासंभवाच्च ॥
ज्योतिषि भावाच्च तद्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृतमिति ज्योतिषि परस्मिन् ब्रह्मणि देवमनुष्ययोरधिकारसाधारण्ये
19 सत्यपि ज्योतिषां ज्योतिः परं ब्रह्म देवा उपासत इति विशेषवचनं वस्वादीनां कर्मकर्तृभावविरोधात् तेषु तेषामनधिकारं द्यो
तयति देवा इति समानवचनं च वस्वादिविशेषविषयमित्यवगम्यते अन्येषामपि विरोधात् भावं तु बादरायणोऽस्ति हि०
तु शब्दः पक्षं व्यावर्तयति वस्वादीनां मधुविद्यादिष्वधिकारसद्भावं भगवान् बादरायणो मन्यते अस्ति हि वस्वादीनामेवोपास
त्वं प्राप्यत्वं च इदानीं वस्वादीनामेव सतां कल्पान्तरे वसुत्वस्य प्राप्य प्राप्यत्वसंभवात् प्राप्यत्वं संभवति स्वात्मनः ब्रह्मभावा
नुसंधानसंभवात् उपास्यत्वं च संभवति य एतामेवं ब्रह्मोपनिषदं वेदेति कृत्स्नाया मधुविद्याया ब्रह्मविद्यात्वमवगम्यते ॥ राम
शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ब्रह्मविद्यायां शूद्रस्याप्यधिकारोऽस्ति नेति संशयः नास्तीति पूर्वपक्षः अर्थि २०

चानधीत्यैव वेदैकदेशभूतं मंत्रादीन् स्वरतो वर्णतश्चास्खलितान् पठंति तेषां मंत्रादिष्वपि वेदनित्यत्वहेतुपपत्तेः प्रजापतिश्रुतिषु सर्वे
षु तत्त्वेषु व्याकृतपदार्थेषु अव्याकृतपरिणामरूपशब्दमयेषु च विनष्टेष्वाकृतसृष्ट्यावृत्तौ कथं वेदस्य नित्यत्वमित्यत आह समाननाम
रूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च आकृतसृष्ट्यावृत्तावपि सृष्टानां समाननामरूपत्वादेव न कश्चिद्विरोधः आदिसर्गे वि
हि परमपुरुषः पूर्वसंस्थानं जगत्स्मरन् तथैव सृजति वेदांश्च पूर्वानुपूर्वीविशिष्टानाविःकृत्य हिरण्यगर्भाय ददाति पूर्वसंस्थान
मेव जगत्सृजतीति कथमवगम्यते दर्शनात्स्मृतेश्च दर्शनं श्रुतिश्च होरात्राणि विदधद्विश्वस्य मिषतो वशी सूर्याचंद्रमसौ धा
ता यथापूर्वमकल्पयत् दिवं च पृथिवीं चांतरिक्षमथो सुवरिति यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा इ
ति च स्मृतिरपि यथा त्वृतुष्वृतुलिंगानि नानारूपाणि पर्यये दृश्यंते तानि तान्येव तथा भावा युगादिषु इति एतदेव वेदस्य नित्य
त्वं यत्पूर्वपूर्वोच्चारणक्रमविशेषं स्मृत्वा तेनैव क्रमेणोच्चार्यमाणत्वं परमपुरुषोपि स्वस्वसंस्काराधनतत्फलपाया
त्पाववाधि वेदस्य स्वरूपवन्नित्यमेव पूर्वानुपूर्वीविशिष्टं आविष्करोति देवादीनां ब्रह्मविद्याधिकारे न कश्चिद्विरोधः ।
मध्वादिष्वसंभवादनधिकारं जैमिनिः छांदोग्ये असौ वा आदित्यो देवमधु इत्युपक्रम्य तद्यत्प्रथमममृतं तद्वसव उपजी
वंतीत्युक्त्वा स एतदेवममृतं देव वसूनामेको भूत्वाग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यतीत्यादि ऋग्यजुस्सामादिवेदोदि
तकर्मसंपाद्यरसाधारतया मधुमयस्यादित्यस्य पूर्वदक्षिणपश्चिमोत्तरोर्ध्वांशान् वसुरुद्रादित्यमरुत्साध्यानां देवग

पक्रमे हि बहुदायी स्यादि नाद्यानपतिर्बहुतरस्य क्रान्नदापिवद् त्वे प्रैषणे बहुग्रामप्रदाने रस्य जानश्रुतेः शूद्रशब्दः क्षत्रि
वे०प० २१ यत्वं प्रतीतं उत्तरत्र चैत्ररथेन लिङ्गात् उपरि छान्दोग्ये संवर्गविद्यायां ब्राह्मणे क्षत्रिययोरेवान्वयो दृश्यते अथ ह शौनकं
च कापेयमभिप्रतारिणं चेत्यादौ अभिप्रतारी हि चैत्ररथः क्षत्रियः अभिप्रतारिणश्चैत्ररथत्वं क्षत्रियत्वं च कापेयसाहचर्या
ल्लिङ्गादवगम्यते एककरणं तेषां हि कापेयसहचारिणश्चैत्ररथत्वं क्षत्रियत्वं चावगतं एते नवै चैत्ररथं कापेया अयाजयन्नि
ति तस्माच्चैत्ररथ एकः क्षत्रपतिर्जायत इति श्रुतेः संवर्गविद्यायामन्वितेऽब्राह्मणादि तरो जानश्रुतिरपि क्षत्रिय एव भवितुमर्ह
ति संस्कारपरामर्शात्तदभावाभिलापाच्च विद्योपदेशे उपनयानेऽप्युपनयनसंस्कारपरामर्शात् शूद्रे तदभाववचना
20 धिकारः शूद्रेण पातकं किंचिन्न च संस्कारमर्हतीति निषिध्यते तदभावनिर्धारणे च प्रवृत्तेः नैतदब्राह्मणो विवक्तुम
र्हतीति समिधं सौम्याहरेति शूद्रत्वाभावनिर्धारणे वोपदेशप्रवृत्तेर्नाधिकारः शूद्रस्य श्रवणाध्ययनार्थप्रतिषेधात्॥
शूद्रस्य श्रवणाध्ययनादीनि हि प्रतिषिध्यन्ते तस्माच्छूद्रसमीपे नाध्येतव्यमिति अनुपशृण्वतो नाध्ययनादि संभ
वति स्मृतेश्च स्मर्यते च शूद्रस्य वेदश्रवणादौ दण्डः अथ हास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रपूरणमुदाहरणे राम
जिह्वाच्छेदो धारणे शरीरभेद इति प्रासंगिकं समाप्य प्रकृतं समापयति कंपनात् अङ्गुष्ठमात्रप्रकरणमध्येय २१

त्वसामर्थ्यसंभवात् शूद्रस्यानग्निविद्यात्वेपि मनोमात्रनिर्वर्त्यत्वादुपासनस्य संभव इति हि सामर्थ्यं ब्रह्मतत्त्वस्य तं न उपासनप्रका
रज्ञानं चेतिहासपुराणश्रवणादेव निष्पद्यते अस्ति हि शूद्रस्यापीतिहासपुराणश्रवणानुज्ञा श्रावयेच्चतुरो वर्णान् कृत्वा ब्रा(
ह्मणमग्रतः इति तथा तत्रैव विदुरादीनां ब्रह्मनिष्ठत्वं दृश्यते उपनिषत्स्वपि आजहारेमाः शूद्र अनेनैव मुखेनालापयिष्या
इति शूद्रशब्देनामंत्रणं ब्रह्मविद्योपदेशदर्शनात् शूद्रस्याप्यधिकारः सूच्यते राद्धांतस्तु उपासनस्य मनोवृत्तिमात्रनिर्वर्त्य
त्वेप्यनधीतवेदस्य शूद्रस्योपासनोपायभूतज्ञानासंभवात्तत्सामर्थ्यसंभवः कर्मविधिवदुपासनविधयोपि त्रैवर्णिकवि
षया अध्ययनगृहीतस्वाध्यायोत्थज्ञानमेवोपासनोपायतया स्वीकुर्वंते इतिहासाध्ययनस्य ध्यायसिद्धमेव ज्ञानमुपबृं
हयतीति न तेषां विनास्य ज्ञानलाभः श्रवणानुज्ञा तु पापक्षयादिफला विदुरादीनां तु भवान्तरवासनया ज्ञानलाभात् ब्रह्म(
निष्ठत्वं शूद्रेत्यामंत्रणमपि न चतुर्थवर्णैकगोचरं ब्रह्मविद्याविकलत्वात् शुगस्य संजातेत्यतो न शूद्रस्याधिकारः सूत्रा
र्थस्तु ब्रह्मविद्याविकलत्वेन हंसोक्त्यानादरश्रवणात् तदैवाचार्यं प्रत्याद्रवणाच्चाचार्येणास्य शुक् शूद्रो विद्यालाभकृताश्च
कृ सूच्यते हि हंसोपस्मादस्य शुक् सूच्यते अतः शोचनात् शूद्र इति रैक्वाख्याचार्येण रैक्वः जानश्रुतिं शूद्रेत्यामंत्रयते न जा
तियोगेनेत्यर्थः क्षत्रियत्वावगतेश्च अस्य शुक्सूत्रोः क्षत्रियत्वावगतेश्च न जातियोगेन शूद्रेत्यामंत्रणं प्रकरणे

वे०पा०
२२

मेव सर्वज्ञतया भेदेन व्यपदेशाच्च जगदात्मनो ऽन्तर्यामिभूतः एव परमात्मा यस्मादिति शब्देभ्यः परि सुञ्जके प्राज्ञे प्रत्यगात्मभ्यः यस्मादिति श
देभ्यः प्रत्यगात्मनो ऽन्तर्यामिभूतः सर्वाधिपतिः सर्वस्य वशी सर्वस्येशान इत्यादौ ऐक्योपदेशभेदव्यपदेशौ तु ब्रह्म कार्य्यत्वानि
बन्धाविति तज्जलानिति सर्वं खल्विदं ब्रह्म ऐतदात्म्यमित्यादिश्रुतिभिरेव व्यक्तौ इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे प्रथमा
ध्यायस्य तृतीयः पादः ॥ ३ ॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च कठवल्लीषु इन्द्रि
येभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः महतः परमव्यक्तमव्यक्तात्पुरुषः परः पु
रुषान्न परं किंचित्सा काष्ठा सा परा गतिरित्यत्र किं सांख्याभिमतं प्रधानमव्यक्तशब्दाभिधेयमुत नेति संशयः प्रधानमिति पूर्व
पक्षः महतः परमव्यक्तमित्यादिना तत्तन्त्रप्रक्रियाप्रत्यभिज्ञानात्पुरुषान्न परं किंचिदिति पंचविंशकपुरुषातिरिक्ततत्त्वनि
षेधाच्च राद्धान्तस्तु नाव्यक्तशब्देन प्रधानमिह गृह्यते पूर्वत्रात्मानं रथिनं विद्धि शरीरं रथमेव चेत्यादिनोपासननिर्वृत्त्ययेव
शेन्द्रियत्वापादनायात्मशरीरबुद्धिमनइन्द्रियविषयरथिरथसारथिप्रग्रहहयगोचरत्वेन रूपिता तेषु वशीकार्य्यत्वेन प
रा इन्द्रियेभ्यः परा इत्यादिनोच्यन्ते तत्रेन्द्रियादयः स्वस्वशब्देनैव गृह्यन्ते रथत्वेन रूपितं शरीरमिहाव्यक्तपरिणामत्वेना
व्यक्तशब्देन गृह्यत इति नेह तत्तन्त्रप्रक्रियाप्रत्यभिज्ञा गंधः अव्यक्तात्पुरुषः परः इति च न पंचविंशकः अपि तु प्राप्यः परमा
त्मा सर्वान्तर्यामि तया उपासनस्याप्युपायभूत इति सहृदय वशीकार्य्यकाष्ठात्वेन पुरुषान्न परं किंचिदित्युक्तेः सूत्रार्थस्तु ए । राम
२२

21

दिदं किंच जगत्सर्वं प्राण एजति निःसृतं महद्भयं वज्रमुद्यतं भयादस्याग्निस्तपतीत्यादौ प्राणशब्दनिर्दिष्टोऽङ्गुष्ठप्रमित भयनिमित्तत्वादग्निवा
युसूर्यप्रभृतिरूपस्य जगतः कंपनाच्छ्रूयमाणोऽङ्गुष्ठप्रमितः परमात्मैवेति निश्चीयते ज्योतिर्दर्शनात् तस्मिन्नेव प्रकरणे तत्संबंधितया
न तत्र सूर्यो भातीत्यारभ्य तस्य भासा सर्वमिदं विभाति सर्वेषां द्योतकस्यानवधिकातिशयस्य भाःशब्दाभिहितस्य ब्रह्मभूतस्य परस्य
ज्योतिषो दर्शनात् चाङ्गुष्ठप्रमितः परमात्मा ॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् छांदोग्ये आकाशो ह वै नामरूपयोर्निर्वहिता यदंत
रा तद्ब्रह्म तदमृतं स आत्मेत्यत्राकाशशब्दनिर्दिष्टः किं मुक्तात्मा उत परमात्मेति संशयः मुक्त इति पूर्वपक्षः धूत्वा शरीरमकृतं कृता
त्मा ब्रह्मलोकमभिसंभवामीति मुक्तस्यानंतरप्रकृतत्वात् राद्धांतस्तु नामरूपयोर्निर्वहिता तेन यदंतरेति स्वयमस्पृष्टनामरू
पयोर्निर्वोढृत्वेन श्रूयमाणोऽयमाकाशो बद्धमुक्तावस्थाप्रत्यगात्मनोऽर्थान्तरत्वात् परमात्मैव सूत्रार्थस्तु आकाशः प
रमात्मा अस्य नामरूपयोर्निर्वोढृत्वतदस्पृष्टत्वलक्षणार्थान्तरत्वव्यपदेशात् प्रत्यगात्मनो ह्यर्थान्तरभूत एव नामरूपयोर्निर्वोढा बद्धस्ता
वन्नामरूपाभ्यां स्पृष्टत्वात्परवशत्वेन न निर्वोढा मुक्तस्यापि जगद्व्यापाररहितत्वान्न निर्वोढृत्वं आदिशब्देन निरुपाधिकब्र
ह्मत्वामृतत्वात्मत्वादीनि लिङ्गानि गृह्यन्ते तानि निरुपाधिकानि मुक्तस्यापि न संभवंति तत्त्वमस्यादिनैकत्वोपदेशान्नेह नानास्तीति
भेदप्रतिषेधाच्च न प्रत्यगात्मनोऽर्थान्तरं परमात्मेत्याशंक्याह सुषुप्त्युत्क्रान्त्योर्भेदेन व्यपदेशादिति वर्तते तेन प्राज्ञेनात्म
ना संपरिष्वक्तः प्राज्ञेनात्मनान्वारूढ इति सुषुप्त्युत्क्रान्त्योर्लुप्तसकलविशेषज्ञानात् प्रत्यगात्मनस्तदानीमेव सर्व

द्व्यक्तस्यापि ज्ञेयत्वं वक्तव्यं न त्वव्यक्तमिह ज्ञेयत्वेनोक्तं अव्यक्तस्याव्यवहिततं च प्रक्रियागंधः वदतीति चेन्न प्राज्ञो हि प्रकरणात् अ
वे०प०
२३ शब्दमस्पर्शमित्युपक्रम्य महतः परमं ध्रुवं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति प्रधानस्यैव ज्ञेयत्वमनन्तरमेव वदतीयं श्रुति
रिति चेन्न तत्र अशब्दमस्पर्शमित्यादिना प्राज्ञः परमपुरुष एव ह्यत्रोच्यते सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदं एष स
र्वेषु भूतेषु गूढोत्मा न प्रकाशत इति प्राज्ञस्यैव प्रकृतत्वात् त्रयाणामेवमुपन्यासः प्रश्नश्च अस्मिन्प्रकरणे येयं प्रेते विचिकि
त्सा मनुष्ये इत्यारभ्य आसमाप्तेः परमपुरुषोपासनोपासकानां त्रयाणामेव ज्ञेयत्वेनोपन्यासः प्रश्नश्च दृश्यते न प्रधानादेस्तांत्रि
22 कस्यापि अतश्च न प्रधानमिह ज्ञेयत्वेनोक्तं महद्वच्च यथा बुद्धेरात्मा महान् पर इत्यात्मशब्दसामानाधिकरण्यान्महच्छब्दे
न न तांत्रिकं महत्तत्त्वं गृह्यते एवमव्यक्तशब्देनापि न तांत्रिकं प्रधानं चमसवदविशेषात् अजेत्यनेन अजामेकां लोहि
तशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः इत्यत्र किम
जाशब्देन तंत्रप्रसिद्धा प्रकृतिरभिधीयते उत ब्रह्मात्मिकेति संशयः तंत्रप्रसिद्धेति पूर्वपक्षः अजामेकामित्यस्याः अकार्यत्वप्रतीतेः
बह्वीनां प्रजानां स्वातंत्र्येण कारणत्वश्रवणाच्च ब्रह्मात्मकत्वं न तु तंत्रसिद्धायाः प्रकृतेरत्र ग्रहणं जननविरहश्रवणमात्रेण तंत्रप्र रा० २३
सिद्धायाः प्रतीतिनियमाभावात् नहि यौगिकानां शब्दानामर्थप्रकरणादिभिर्विशेषव्यवस्थापकैर्विनार्थविशेषवृत्ति

केषांकठानां शाखायामानुमानिकं प्रधानं जगत्कारणत्वेन महतः परमव्यक्तमित्याम्नायते इति चेन्न अव्यक्तशब्देन श
रीररूपकविन्यस्तगृहीतेः पूर्वमात्मानं रथिनं विद्धि शरीरं रथमेव त्वित्यादि रूपकविन्यस्तेषु रथत्वेन रूपितस्य शरीरस्यात्राव्यक्तशब्देन
गृहीतेरित्यर्थः अस्तो वशीकार्यत्वे परादि हेतुश्चानेन दर्शयतीत्येवं समर्थमस्मिन्वाक्ये विशेषः इन्द्रियादीनां नियमनप्रका
रं दर्शयितुं यच्छेद्वाङ्मनसी इत्यादिकथमव्यक्तशब्दस्य शरीरं वाच्यं भवतीत्याशंक्याह सूक्ष्मं तु तदर्हत्वात् सूक्ष्म
ावधारणे सूक्ष्ममव्यक्तमेवोवस्थान्तरापन्नं शरीरं भवति तदवस्थैव कार्यं तदर्हत्वात् पादरूपकविन्यस्तात्माद
यएव वशीकार्यत्वे परादिन्द्रियेभ्यः परा इत्यादिना गृह्यन्ते न ह्यव्यक्तात्पुरुषः परः पुरुषान्न परं किंचिदिति पुरुषगृह
णं किमर्थमित्यत्राह तदधीनत्वादर्थवत् अस्तत्पर्यामिरूपेणावस्थित पुरुषाधीनत्वात् आत्मादि सर्वं रथित्वादिरू
पितमर्थवत्प्रयोजनवत् भवति ततः उपासननिर्वर्तनो वशीकार्यकाष्ठा परमपुरुष इति तदर्थमिह रूपकविन्यस्तेषु
गृहमाणेषु परस्य पुरुषस्य ग्रहणं उपासननिर्वर्त्यमुपायकाष्ठा पुरुषः प्राप्य इति पुरुषान्न परं किंचित्सा काष्ठा साव
रा गतिरित्युक्तं भाष्यप्रक्रियापि भावानेयमिदं सर्वं परमपुरुषशरीरं तया तदधीनत्वात् भूतसूक्ष्ममव्याकृतमर्थ
वदिति तादृशाव्यक्तशब्देन गृह्यते तेनानात्मकं त्वानिष्टं तन्त्रप्रसिद्धमिति ज्ञेयत्वावचनाच्च यदि तन्त्रप्रक्रियेहाभिप्रेता

ल्पनोपदेशाच्च मध्वादिवदविरोधः कल्पना सृष्टिः सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयदित्यादिदर्शनात् अस्मान्मायी
वे०प० सृजते विश्वमेतदिति हि सृष्टिरिहोपदिश्यते प्रलयवेलायामेषा प्रकृतिः परमपुरुषाश्रयाकारणावस्था अतिसूक्ष्मा शक्तिरू
२४ पेणावतिष्ठते तदवस्थाभिप्रायेणाजाम्नातं सृष्टिवेलायां पुनस्तच्छरीरात् ब्रह्मणः स्थूलावस्था जायते तदवस्थाऽपि त्रिरूपक्र
माइति न कश्चिद्विरोधः मध्वादिवत् यथादित्यस्यैकस्यैव कार्यावस्थायामसौ वा आदित्यो देवमध्विति वस्वादिभोग्यरसाधा
रतया मधुत्वं तस्यैवावस्थान्तरे उद्येति मुदेत्यैवादि नानात्वमेतो कालरावमध्ये स्थितेत्यादिना नामरूपग्रहाणेन कारणावस्थायां सद्
23 सैकस्यैवावस्थानेन विरुध्यते तद्वत् न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च० वाजसनेयके यस्मिन् पंच पंचजना
आकाशश्च प्रतिष्ठितः तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतमिति मन्त्रः किं सांख्योक्तानि पंचविंशति तत्त्वानि प्रतिपादयन्त
उत नेति संशयः तान्येवेति पूर्वपक्षः पंच पंचजना इति पंचसंख्याविशिष्टाः पंचजनाः पंचविंशति संपद्यते कथं पंचज
ना इति समाहारविषयो यं समासः पंचपूल्य इतिवत् पंचभिर्जनैरारब्धः समूहः पंचजनः पंचजनास्तथा लिंगव्यत्ययः छांद
सः पंचजना इति बहुवचनात् समूहबहुत्वं चावगम्यते ते च कतीत्यपेक्षायां पंच पंचजना इति पंचशब्दविशेषिताः पं राम
चजनसमूहा इति पंचविंशति तत्त्वानि मंत्रे निर्दिष्टानि मोक्षाधिकाराणां तानि कारायेवेति ति ग्नायंते एवं निश्चिते सति तन्मेवं २५

नियमसद्भावः न चास्याः स्वातंत्र्येण सृष्टिहेतुत्वमिह प्रतीतमपि तु सृष्टिहेतुत्वमात्रं तद् ब्रह्मात्मिकाया अस्मन्न विरुद्धं अत्र तु ब्रह्मा
त्मिकाया एव शाखांतरसिद्धाया एतत्स्वरूपमंत्रोदितायाः प्रत्यभिज्ञानात् सैवेति निर्णीयते सूत्रार्थस्तु नायमजाशब्दस्तंत्र
सिद्धप्रधानविषयः कुतश्चमसवदविशेषात् अर्वाग्बिलश्चमस इति मंत्रे यद्वत् साधनविपोगेन प्रवृत्तस्य चमसशब्दस्य
शिरसि कृतौ यथेदं तच्छिर एष ह्यर्वाग्बिलश्चमस इति वाक्यशेषविशेषो दृश्यते तथा अजामेकामित्यजाशब्दस्यातंत्रसि
द्धप्रधानेपरतो विशेषाभावात् न तंत्रगृहणं त्वायं अस्ति तु ब्रह्मात्मिकाया एव ग्रहणे विशेष इत्याह ज्योतिरूपक्रमात् त
था ह्यधीयते एके ज्योतिर्ब्रह्म यस्याउपक्रमः कारणं साज्योतिरूपक्रमा न तु शब्दो वधारणे ब्रह्मकारणे केवेषाजात्या
ह्यधीयते एके यथारूपोयमजायाः प्रतिपादको मंत्रः तथारूपमेव मंत्रं ब्रह्मात्मिकायास्तस्याः प्रतिपादकमधीयत एक
के शाखिनः अणोरणीयान्महतो महीयान् इत्यादिना ब्रह्म प्रतिपाद्य सप्त प्राणाः प्रभवंति तस्मात्सप्तार्चिषः समिधः स
प्तजिह्वाः सप्त इमे लोका येषु चरंति प्राणा गुहाशया निहिताः सप्त सप्त यतः समुद्रा गिरयश्च सर्वे इत्यादिना ब्रह्मण उत्पन्नत्वेन प्रसात्म
कतया सर्वानुसंधानविधानसमयेऽजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः जनयंतीं सरूपामिति प्रतिपाद्यमानाया ब्रह्मात्मि
केवेति तन्मंत्रप्रत्यभिज्ञानादिहाप्यजाया ब्रह्मात्मिकैवेति निर्णीयते अजा तु ज्योतिरुपक्रमा तु चकारार्थे शब्दे एव येतें इत्यत आह क

शब्दे वाक्योपक्रमगतेनानन्तरे वाक्ये ज्योतिषां ज्योतिः शब्देन पंचजना इन्द्रियाणीति विज्ञायन्ते कथं ज्योतिषां ज्योतिरिति ब्रह्मणि नि
र्दिष्टे प्रकाशकानां प्रकाशकं ब्रह्मेति प्रतीयन्ते केन प्रकाशकाद्यपेक्षायां पंच पंचजना इति असति तत्त्वविशेषाः पंच सं
वे०प० ख्याताः प्रकाशकानि पंचेन्द्रियाणीत्यवगम्यन्ते यतो यस्मिन्पंच पंचजना आकाशश्च प्रतिष्ठित इतीन्द्रियाणि भूतानि
२५ च ब्रह्मणि प्रतिष्ठितानीति न तांत्रिकतत्त्वगंधः कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः जगत्कारणवादीनि वे
दांतवाक्यानि किं प्रधानकारणवादैकांतानि उत ब्रह्मकारणवादैकांतानीति संशयः प्रधानकारणवादैकांता
नीति पूर्वपक्षः सदेव सोम्येदमग्र आसीदिति क्वचित्सत्पूर्विका सृष्टिराम्नायते अन्यत्र असदेव सोम्येदमग्र आसीत् तथा असद्
२४ वा इदमग्र आसीत् तथा तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियतेति अव्याकृतं हि प्रधानं अतः प्रधानका
रणवादनिष्ठप्रधानदैकांतान्येव राद्धांतस्तु सत्यं ज्ञानमनंतं ब्रह्मेत्युपक्रम्य तस्माद्वा एतस्मादात्मन आकाशः संभूतः तदैक्षत
बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेत्यादिषु सर्वज्ञस्य परस्य ब्रह्मणः कारणत्वप्रतिपादनात् तस्यैव ब्रह्मणः कारणत्वस्यायां
नामरूपविभागासंबंधितया सद्भावाभावादसदव्याकृतादिशब्देन व्यपदेशः इति ब्रह्मकारणवादैकांतान्येव सूत्रार्थ राम
स्तु आकाशादिषु पदार्थेषु निर्दिष्टेषु तस्माद्वा एतस्मादात्मन आकाशः संभूत इत्यादिषु सर्वेषु सृष्टिवाक्येषु यथाव्यप २५
दिष्टस्यैव कारणत्वेनोक्तेः ब्रह्मकारणवादैकांतानि यथा अपदिष्टे सर्वज्ञादिगुणकतया अस्माभिर्व्यपदिष्टं तथास

मन्यआत्मानंविद्वान्ब्रह्मामृतोमृतमितिपंचविंशकमात्मानंब्रह्मभूतोविद्वानमृतोभवतीति राद्धांतस्तुयस्मिन्पंचपंचजनाआ
काशश्चप्रतिष्ठितइतियच्छब्दनिर्दिष्टब्रह्माधारत्वात् अधेयानांतत्त्वानांब्रह्मात्मकत्वमवगम्यतेयच्छब्दनिर्दिष्टमेवतमेवं
मन्यआत्मानंविद्वान् ब्रह्मामृतोमृतमितितच्छब्देनपरामृश्यब्रह्मामृतमितिनिर्देशात् ब्रह्मात्मनिनिर्दिश्यतेअतोनतत्त्वातिरेकप्र
संगः सत्त्वार्थस्तुपंचपंचजनाइत्यत्रपंचविंशतिसंख्योपसंग्रहणादपिनतांत्रिकाणीमानितत्त्वानियस्मिन्नितियच्छ
ब्दनिर्दिष्टब्रह्माधारतयातांत्रिकेभ्योनानाभावादेषांतत्त्वानांपृथग्भावादित्यर्थः अतिरेकाच्च तांत्रिकेभ्यस्तत्त्वातिरेकप्र
तीतेश्चयस्मिन्नितिनिर्दिष्टमतिरिक्तमाकाशश्चनसंख्योपसंग्रहादपीत्यपिशब्देनसंख्योपसंग्रहोनभवतीत्याह॰
आकाशस्यपृथग्निर्देशात् अतःपंचजनाइतिनसमाहारविषयःसमासदिक्संख्येसंज्ञायामितिसंज्ञाविषयः पंच
जनसंज्ञिताःकेचित्तेचपंचैवसप्तर्षयइतिवत् प्राणादयोवाक्यशेषात् पंचजनसंज्ञिताःपंचपदार्थाःप्राणाद
यइतिवाक्यशेषादवगम्यतेप्राणस्यप्राणमुतचक्षुषश्चक्षुःश्रोत्रस्यश्रोत्रमन्नस्यान्नंमनसोयेमनोविदुरितिब्र
ह्मात्मकानीन्द्रियाणिपंचपंचजनाइतिनिर्दिष्टानिजननाच्चजनाःकाण्वपाठेत्वन्नवर्जितानांचतुर्णांनिर्दिष्टंपंच
जनसंज्ञितानीन्द्रियाणीतिकथंज्ञायतइत्यत्राह ज्योतिषैकेषामसत्यन्ने एकेषांकाण्वानांवाक्यशेषेऽन्नस्यासत्यन्न

न्यार्थं तु जैमिनिः प्रश्नप्रतिवचनाभ्यामपि चैवमेके ॥ तु शब्दः शंकाव्यावृत्त्यर्थः जीवसंकीर्तनमन्यार्थं जीवातिरिक्तब्रह्म
सद्भावप्रतिबोधनार्थमिति प्रश्नप्रतिवचनाभ्यामवगम्यते प्रश्नस्तावज्जीवप्रतिपादनादुपरितनः क्वैष एतद् बाला
वे०प० २६ के शयिष्टेत्यादिकः सुप्तजीवाश्रयविषयतया प्राणः परमात्मपर इति निश्चितः प्रतिवचनमपि यास्मिन्प्राण एवैकधा
भवतीत्यादिकं परमात्मविषयमेव सुप्तपुरुषाश्रयतया प्राणशब्दनिर्दिष्टपरमात्मैव सता सोम्य तदा संपन्नो भवती
त्यादिभ्यः जैमिनिग्रहणं उक्तस्यार्थस्य पूज्यत्वाय अपि चैवमेके वाजसनेयिनः बालाकिजातशत्रुसंवादगतप्रश्न
७S प्रतिवचनरूपं वाक्यं परमात्मविषयं स्पष्टमधीयते क्वैष एतदित्यादि य एषोन्तर्हृदय आकाशस्तस्मिन्शेते इत्यंतं वा
क्यान्वयात् बृहदारण्यके मैत्रेयीब्राह्मणे न वा अरे पत्युः कामाय पतिः प्रियो भवति आत्मनस्तु कामायेत्यारभ्य आ
त्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादौ द्रष्टव्यतया निर्दिष्टस्तत्र सिद्ध उत परमात्मेति संशयः तंत्र।
सिद्धः पंचविंशक एवेति पूर्वपक्षः पतिजायापुत्रवित्तमित्रपश्वादिप्रियसंबंधात्मानं परमात्मानं भवितुमर्हतीति स एव
आत्मा वारे द्रष्टव्य इति प्रतिपाद्यते राद्धांतस्तु न वा अरे पत्यादीनां कामायेत्यादयः प्रियो भवति आत्मनस्तु कामायेत्युक्ता। राम २६
आत्मा वारे द्रष्टव्य इति निर्दिष्टः आत्मा जीवातिरिक्तः सत्यसंकल्पः परमात्मा आत्मज्ञानेन सर्वज्ञानादयो विवक्ष

त्य असद्वा इदमग्र आसीदिति किं ब्रवीतीत्यत आह समाकर्षात् सोऽकामयत बहु स्यां प्रजायेयेति बहुभवनसंकल्पपूर्वकं जगत्स्र
ष्टुर्ब्रह्मणः सर्वज्ञस्यासद्वा इदमग्र आसीदित्यत्रापि समाकर्षात्कारणावस्थायां नामरूपसंबंधित्वाभावेनासदिति ब्रवीति
एवं तद्धेदं तर्ह्यव्याकृतमित्यादिषु स एष इह प्रविष्ट आनखाग्रेभ्यः पश्यंश्चक्षुरित्यादि पूर्वापरपर्य्यालोचनया तत्र तत्र सर्व
ज्ञस्य समाकर्षो द्रष्टव्यः जगद्वाचित्वात् कौषीतकीनां बालाक्यजातशत्रुसंवादे ब्रह्म ते ब्रवाणीत्युपक्रम्य यो वै बालाक ए
तेषां पुरुषाणां कर्त्ता यस्य चैतत्कर्म्म स वै वेदितव्य इत्यत्र वेदितव्यतयोपदिष्टः किं सांख्यतंत्रसिद्धः पुरुषः उत परमात्मेति संशयः
पुरुष एव प्रकृतिवियुक्त इति पूर्वपक्षः यस्य चैतत्कर्म्मेति पुण्यपापरूपकर्म्मसंबंधितया उपलक्षितत्वात् राद्धांतस्तु॥
यस्य चैतत्कर्म्मेति कर्म्मशब्दस्य क्रियते इति व्युत्पत्त्या जगद्वाचित्वात्कृत्स्नं जगद्यस्य कार्यं स परमपुरुष एव वेदित
व्यतयोपदिष्टो भवति सूत्रमपि व्याख्यातम् जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातम् एवमेव प्रज्ञात्मैतैरात्मभि
र्भुंक्ते इत्यादि भोक्तृत्वरूपजीवलिंगात् अथास्मिन्प्राण एवैकधा भवतीति मुख्यप्राणलिंगाच्च नायं परमात्मेति चे
त्तस्य परिहारः प्रतर्दनविद्यायामेव व्याख्यातः प्रकरणपूर्वापरपर्य्यालोचनया परमात्मपरत्वाद्वाक्यमिति निश्चिते स
त्यन्यलिंगानि तदनुगुणतया नेतव्यानीत्यर्थः नैह सुप्तं पुरुषमाजग्मतुरिति प्राणनामभिरामंत्रणाश्रवणाद्यष्टिघा
तोत्थापनादिना शरीरेन्द्रियप्राणातिरिक्तजीवात्मसद्भावप्रतिपादनपरं वाक्यमिति गम्यते इत्यत उत्तरं पठति अ

ब्रह्मज्ञानेन सर्वज्ञानप्रतिज्ञानात् यथा सोम्यैकेन मृत्पिण्डेनेति मृत्तत्कार्यदृष्टान्तेन तदुपपादनाच्च जगदुपादानकारणमपि
वे० प० २२ ब्रह्मैवेति विज्ञायते प्रमाणान्तरानवसितमखिलवस्तुविलक्षणस्य शास्त्रैकाधिगमस्य परब्रह्मणः सर्वज्ञस्य सर्वशक्तेः कार्य।
कारणोभयावस्थायामपि स्वशरीरभूतचिदचित्प्रकारतया बहुस्यामिति संकल्पस्यैकस्यैव निमित्तत्वमुपादानत्वं चाविरुद्धं शरीरभू
तचिदचिद्वस्तुगता विकारा इति कार्यावस्थस्यापि शरीरिणः परमात्मनो विकारित्वाभावमेव चिदचिद्वस्तुशरीरस्य ब्र।
ह्मण एवोपादानत्वेपि ब्रह्मण एव पुरुषार्थविकाराद्यस्पर्शप्रदर्शनाय हि अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मा
यया संनिरुद्ध इति व्यपदेशः प्रतिज्ञादृष्टान्तानुपरोधादुपादानं च ब्रह्मैवेति सूत्रार्थः अभिध्योपदेशाच्च सोऽकामयत बहु
२६ स्यां प्रजायेयेति स्रष्टुर्ब्रह्मणः स्वस्यैव जगदाकारेण बहुभवनचिन्तनोपदेशाज्जगदुपादानं निमित्तं च ब्रह्मैवेति निश्ची
यते साक्षाच्चोभयाम्नानात् किंस्विद्वनं क उ स वृक्ष आसीदित्यादीनां जगदुपादाननिमित्तादौ पृष्टे ब्रह्म वनं ब्रह्म स वृक्ष
आसीद्ब्रह्माधितिष्ठदित्युपादानं निमित्तं चोभयं ब्रह्मैवेति हि साक्षादाम्नायते अतश्चोभयं ब्रह्म आत्मकृतेः तदात्मानं
स्वयमकुरुतेति स्रष्टुरात्मन एव जगदाकारेण कृतिरुपदिश्यते अतश्चोभयं नामरूपभावाभावात्मकस्य कर्मकर्तृ
भावो न विरुध्यते यथात्मानमेव ब्रह्म जगदाकारं करोति तर्हि ब्रह्मणोऽपहतपाप्मत्वादिकमनवधिकातिशयानन्द राम २२
स्वरूपत्वसर्वज्ञत्वमित्यादि सर्वं विरुध्येत अज्ञत्वासुखित्वकर्मवश्यत्वादिविपरीतरूपत्वाज्जगतः इत्यत उत्तरं पठ

माणः परमात्मन्येव संभवंति सूत्रार्थस्तु वाक्यस्य कृत्स्नस्य परमात्मन्येवान्वयात् श्रूयमाणो निर्दिष्टः आत्मा परमात्मैवा
मृतस्य तु नाशास्तित्वेन आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञाते इदं सर्वं विदितं इदं सर्वं यदयमात्मा तस्य ह वा एतस्य मह
तो भूतस्य निश्वसितमेतत् यदृग्वेदः पुरुषाणां वेदं येनेदं सर्वं विजानाति तं केन विजानीयात् इति हि कृत्स्नस्य वाक्यस्य परमा॥
त्मन्यन्वयो दृश्यते एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति जीवलिंगस्य मतान्तरेण निर्वाहमाह प्रतिज्ञासि
द्धेर्लिंगमाश्मरथ्यः एकविज्ञानेन सर्वविज्ञानप्रतिज्ञासिद्ध्यै जीवस्य परमात्मकार्यत्वेन परमात्मनोऽनन्यो जीव इति जीवश
ब्देन परमात्मनोऽभिधानमित्याश्मरथ्यमतं उत्क्रमिष्यत एवंभावादित्यौडुलोमिः परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यत इति शरीरादुत्क्रमिष्यतो जीवस्य परब्रह्मभावाज्जीवशब्देन परमात्माभिधानमित्यौडुलोमिराचार्यो मेने अव॥
स्थितेरिति काशकृत्स्नः य आत्मनि तिष्ठन् इत्यादिभिर्जीवात्मन्यात्मतः परमात्मनो वास्थितेर्जीवात्मशब्दस्य परमात्म
निपर्यवसानात् जीवात्मशब्देन परमात्मनोऽभिधानमिति काशकृत्स्न आचार्यो मन्यते इदमेव सूत्रकारमतमित्य
वगम्यते त्रयाणामन्योन्याविरोधादितः परमवचनाच्च प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात् परब्रह्म किं जगतो निमित्त
कारणमतोपादानकारणमपीति संशयः निमित्तमात्रमिति पूर्वपक्षः मृत्कुलालादौ निमित्तोपादानयोर्भेददर्शनात्॥
अस्मान्मायी सृजते इत्यादिभिर्भेदप्रतिपादनात् ब्रह्मणोऽविकारित्वश्रुतिविरोधाच्च राधांतस्तु येनाश्रुतं श्रुतमिति

दांतवेद्यार्थस्य दुर्ग्रहत्वेनाल्पश्रुतैर्मंदमतिभिराप्तप्रणीतस्मृत्युपबृंहणेन विना निश्चयो नोपपद्यते कपिलादिस्मृतेः केवलतत्व
वे०दी० २८ परत्वेनैवैवमुपबृंहणं स्यात् अन्यथाप्तप्रणीतायाः केवलतत्वपरायास्तस्या अनवकाशप्रसंगादिति वेदांतवेद्यं जगत्कारणं प्र
धानं राद्धांतस्तु वेदांतसोपबृंहणापेक्षत्वेपि आप्ततममन्वादिस्मृतिभिर्वेदांताविरोधिनीभिरेवोपबृंहणं न्याय्यं अन्यथा तासा
वस्तीनामनवकाशप्रसंगो महानयं दोषः स्यात् न च तासां धर्मप्रतिपादनांशोपबृंहणत्वेन सावकाशत्वं यतो धर्मात्म
पि स्वरूपं परब्रह्मभूतपरमपुरुषाराधनत्वेन दृष्टपूर्वं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वा
27 युस्तत्सूर्यस्तदु चंद्रमा यस्ते स्वनिष्ठ्य सेनिन्तं सर्वदैव मयो ह्यसौत्यादिभिः सूत्रमपि व्याख्यातं अनीन्द्रियार्थसाक्षात्कारस
मर्थस्य कपिलस्य वेदान्तानां परब्रह्मपरत्वानुपलब्धेः प्रधानपरत्वमाश्रयणीयमिति उत्तरम् इतरेषां चानुपलब्धेः इ
तरेषां मन्वादीनां वेदविदग्रेसराणां सर्वार्थसाक्षात्कारसमर्थानां प्रधानपरत्वानुपलब्धेः ब्रह्मपरत्वेवाश्रयणीयं वेदांतप्र
तिपन्नार्थविरुद्धायास्तु कपिलोपलब्धेर्भ्रान्तिमूलत्वं कल्पनीयम् एतेन योगः प्रत्युक्तः किं वेदांतानां योगस्मृत्युपबृंहणं मा
ण्यं उत नेति संशयः स्यादिति पूर्वपक्षः कृत्स्नवेदप्रवर्तनाधिकृतहिरण्यगर्भप्रणीतत्वाद्योगस्येश्वरसद्भावाभ्युपगमाच्च
अतो योगस्मृत्युपबृंहितत्वेन वेदांतानां प्रधानोपादानपरत्वं राद्धान्तस्तु कपिलस्मृतिवद्वेदविरुद्धत्वाविशेषादनादरः राम २८
हिरण्यगर्भस्यापि देवत्रसत्वेन भ्रमसंभवात् योगस्मृतेरपि भ्रान्तिमूलत्वं सूत्रमपि व्याख्यातं न विलक्षणत्वादस्य तथात्व

लिंगपरिणाममात्रं अस्य ब्रह्मविवर्तवादे हि तद्ब्रह्मैव अज्ञानस्य तत्कार्यरूपानंतापुरुषार्थस्य च वेदांतजन्यज्ञाननिवर्त्यस्य ब्रह्म
ऐक्यवाक्यपात् तदाशास्त्रस्य भ्रांतिजल्पिता. उपादानत्वं अविभक्तनामरूपातिसूक्ष्मचिदचिद्वस्तुशरीरकस्य ब्रह्मणो विभक्तना
मरूपाभ्यां व्याकृत यत इत्येवमादिभिः अपि तु कार्यविकाराश्च शरीरभूतचिदचिद्वस्तुगताः कारणावस्थायां कार्यावस्थायां चात्म
भूतं ब्रह्माप्रहतपाप्मत्वादिगुणकमेव स्थूलसूक्ष्मावस्थस्य कृत्स्नचिदचिद्वस्तुनो ब्रह्मशरीरत्वं ब्रह्मणात्मत्वं च यस्य पृ
थिवी शरीरं यस्यात्मा शरीरं यस्याव्यक्तं शरीरं यस्याक्षरं शरीरं एष सर्वभूतांतरात्मापहतपाप्मा इत्येवमादिश्रुतिशतसमधिग
तं अतः सर्वमनवद्यम् योनिश्च हि गीयते यद्भूतयोनिं परिपश्यंति धीराः कर्तारमीशं पुरुषं ब्रह्मयोनिमित्यादिषु सर्व
स्य भूतजातस्य परमपुरुषः योनित्वेन गीयते हि हेतौ यस्माद्योनिरिति गीयते तस्माच्चोपादानमपि ब्रह्म योनिशब्दश्च
उपादानकारणपर्यायः एतेन सर्वे व्याख्याता व्याख्याताः यतो वा इमानि इत्यादिबृहदादौ तेषु वाक्येषु जन्माद्यस्य यतः इ
त्यादिनोक्तेन न्यायकलापेन सर्वे वेदांता ब्रह्मपरा व्याख्याताः पदाभ्यासोध्यायपरिसमाप्तिद्योतनार्थः इति श्रीभगवद्
रामानुजविरचिते वेदांतदीपे प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः प्रथमोध्यायश्च समाप्तः ॥१॥ स्मृत्यनवकाशदोषप्र
संगात् वेदांतानां समस्तचिदचिद्विलक्षणसमस्तहेयगंधसर्वज्ञाद्यनंतकल्याणगुणाकरब्रह्मैकपरत्वं प्रतिपादितं कापिला
दिस्मृतिविरोधेन चालयितुं शक्यमुत नेति संशयः शक्यमिति पूर्वपक्षः श्रुतिकल्पा याः स्मृतेरनादरणीयत्वे स्थितेपि वे

वे॰टी॰
२९

भवति असदिति चेन्न प्रतिषेधमात्रत्वात् यदि कार्यस्य कारणाद्विलक्षणद्रव्यत्वमभ्युपगम्यते तर्हि कारणे कार्यं असद्भवतीति अस
त्कार्यवादोऽभ्युपगतः स्यात् तथा सति सर्वं खल्विदं ब्रह्मेत्यादि सामानाधिकरण्यव्यपदेशो न घटत इति चेन्न कार्यकारणयोः साल
क्षण्यनियमप्रतिषेधमात्रत्वात् अस्माभिः पूर्वमभिहितं कार्यकारणयोरेकद्रव्यत्वं स्वीकृत्यमेव कारणावस्थद्रव्यं कार्यावस्थां भजमा
नं सल्लक्षणावस्थामपि भजते विलक्षणावस्थामपीत्यर्थः अपीतौ तद्वत्प्रसंगादसमञ्जसम् यदि ब्रह्मैव सर्वज्ञं सत्यसंकल्पं निरस्तनिखिलावा
द्यमपहतपाप्मत्वादि स्वरूपं तद्विपरीतं जगदवस्थानं भजते तर्हि पिंडत्वघटत्वावस्थस्य मृद्द्रव्यवत् सर्वज्ञत्वमपहतपाप्मत्वादित्वं कर्म
वश्यत्वं ब्रह्मणः प्रसज्येत इति विरुद्धार्थाभिधानात् वेदान्तवाक्यमसमञ्जसं स्यात् अपीतावित्यस्यार्थः अपिशब्दनार्थः जगतो ब्रह्मण
उत्पत्तावपीत्यर्थः अपीतिरित्यर्थः नतु दृष्टान्तभावात् न ब्रह्मण्येतत्वादयः प्रसज्येरन् अत एव न वेदान्तानामसामञ्जस्यं तु शब्दः
प्रसक्तस्यासंभावनीयतां द्योतयति एकस्यैवावस्थाद्वयान्वयेपि गुणदोषव्यवस्थायां दृष्टान्तसद्भावात् यथा मनुष्यो जातो बालो युवा
स्थविरो भवतीत्यत्र मनुष्यशरीरकस्य चेतनस्यैव सर्वावस्थान्वयेपि जन्मबालत्वयुवत्वस्थविरत्वादीनि नात्मनि संगच्छन्ते
यथा ज्ञानसुखादयश्च न शरीरे एवं चिदचिद्वस्तुशरीरस्य परस्य ब्रह्मणः कार्यकारणोभयावस्थान्वयेपि कर्मवश्यत्वा
ज्ञत्वादयः शरीरभूतचिदचिद्वस्तुगताः अपहतपाप्मत्वसर्वज्ञत्वादयः परमात्मन्यात्मभूतेवतिष्ठंते सर्वावस्थस्य चिदचि राम
द्वस्तुनो ब्रह्मशरीरत्वं ब्रह्मणश्च तदात्मत्वं यस्य पृथिवी शरीरमित्याद्यन्तर्यामिब्राह्मणादिषु अवगतमिति न कश्चिद्विरोधः स्व २९

78

चशब्दात् किं वेदान्तानां जगत्कारणत्वया प्रधानपरत्वं उत ब्रह्मपरत्वमिति संशयः प्रधानपरत्वमिति पूर्वपक्षः अज्ञत्वादिना।
जगतो ब्रह्मविलक्षणत्वेन ब्रह्मकार्यत्वप्रतिपादनासंभवात् सालक्षण्येन प्रधानप्रतिपादनपरत्वस्य च संभवात् शङ्खात्तुमाद्वि
कादिभ्यः क्रिम्यादीनां विलक्षणानामुत्पत्तिदर्शनात् ब्रह्मविलक्षणस्य जगतस्तत्कार्यत्वसंभवस्यैवेति सूत्रार्थस्तु अशुद्धत्वेनासु
खित्वेन चोपलभ्यस्याचिदचिन्मिश्रस्य जगतः सर्वज्ञाद्धेयप्रत्यनीकान्निरतिशयानन्दाद्ब्रह्मणो विलक्षणत्वेन जगतो ब्रह्मका
र्यत्वप्रतिपादनं वेदान्तानां न संभवति तथात्वविलक्षणत्वं च प्रत्यक्षादवगम्यते न केवलं प्रत्यक्षादुपलभ्यमविज्ञानं चाविज्ञा
नं चानीशत्वाशोचति मुह्यमानः अनीशश्चात्मा बध्यते भोक्तृभावादित्यादिः आपो वा काममयन्तं पृथिव्यब्रवीदित्यादौ पृथि।
व्यादेरपि ज्ञानकार्यत्वं व्यपदिश्यते तस्मात् अविज्ञानं चेति तदन्यपरं इत्यत उत्तरं अभिमानिव्यपदेशस्तु विशेषानु।
गतिभ्याम् तु शब्दः प्रोक्तं व्यावर्तयति पृथिव्याद्यभिमानिदेवतानामयं व्यपदेशः कुतो नु गम्यते विशेषानुगतिभ्यां वि
शेषणं विशेषः हन्ताहमिमास्तिस्रो देवता इत्यत्र पृथिव्यादेर्देवताशब्देन विशेषणं दृश्यते सर्वा हि वै देवता अहं श्रेयसे
विवदमाना इति च वागादिप्राणपर्यन्तस्य चानुगतिरनुप्रवेशः अग्न्यादित्यादेर्वागादिष्वनुप्रवेशो दृश्यते अग्निर्वाग्भूत्वा
मुखं प्राविशत् आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशत् वायुः प्राणो भूत्वा नासिके प्राविशदित्यादौ दृश्यते तु तु शब्दः पक्ष
व्यावर्त्यर्थः माक्षिकादिभ्यो विलक्षणानां क्रिम्यादीनामुत्पत्तिर्दृश्यते अतो ब्रह्मविलक्षणस्यापि जगतस्तत्कार्यत्वसं

प्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत इति श्रुतेः राज्ञां तु स्यादेव विभोगो जीवात् परस्मात् कर्मवश्यतया नहि शा-
वे॰ टी॰ ३० स्त्रप्रयुक्तः सुखदुःखभोगः अपि तु शास्त्रवश्यतया तदतिवर्तिकृतः स एकधा भवति इत्यादिनावगतशरीरस्य मुक्तस्य सशरीरस्या-
पि अशास्त्रवश्यतया निरस्तनिखिलदुःखदर्शनात् यथा लोके राजशासनवश्यानां सशरीराणां तच्छासनातिवर्तिनि प्र-
त्यदुःखान्वयेपि राज्ञः सशरीरस्य चापि प्रकारान्तरेण साधर्म्येपि स्वशासनावश्यतया न तदतिवर्तिकृतदुःखान्वयः सूत्रमसपि
आरम्भणम् तदनन्यत्वमारम्भणशब्दादिभ्यः किं ब्रह्मकार्यं जगद्ब्रह्मणोऽन्यदुतानन्यदिति संशयः अन्यदिति पूर्वपक्षः
तथोपलब्धेः नहि बुद्धिशब्दान्तरादयः कारणकार्ययोरनन्यत्वे कथंचिदुपपद्यन्ते कारकव्यापारवैयर्थ्यं चानन्यत्वे अतो व-
२३ स्तुविरोधादनन्यत्वश्रुतयो लक्षणया नेया राद्धान्तस्तु वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यं सदेव सोम्येदमग्र आ-
सीदेकमेवाद्वितीयं तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो सर्वं
खल्विदं ब्रह्म तज्जलानिति तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यां व्याक्रियत इत्यादि श्रुतिशतसिद्धं कार्यस्य जगतः कार-
णाद्ब्रह्मणोऽनन्यत्वं न चात्र वस्तुविरोधः कारणभूतमृदादिद्रव्याव पृथुबुध्नोदराद्यवस्थान्तरायस्मात्तु बुद्धिशब्दान्तरादयो
व्युपपद्यन्ते तत एव कारकव्यापारार्थवत्त्वं च एवं कारणस्यैव कार्यावस्थायामपि प्रत्यभिज्ञायमानस्यावस्थान्तरापत्तेव रा॰ ३०
सर्वेषूपपन्नेषु अनुपलब्धद्रव्यान्तरकल्पना न संभवति तस्माद्ब्रह्मकार्यं जगद्ब्रह्मणो नान्यदेव सूत्रार्थस्तु तस्माद्ब्रह्मणो।

पक्षदोषाच्च॰ नकेवलंब्रह्मकारणवादस्यनिर्दोषत्वयावत्साङ्ख्यप्रणीतप्रधानकारणवादेदोषाश्चतंपरित्यज्यसएवसमाश्रयणीयः प्रधा
नकारणवादिभिर्हिनिर्विकारस्यचिन्मात्रस्यपुरुषस्यप्रकृतिसन्निधानकृततद्धर्माध्यासमूलाज्ञानसंसृतिरभ्युपगम्यतेतत्रप्रकृतिसद्भा
वमात्रेसन्निधानेसतिमुक्तस्यापिधर्माध्यासप्रसंगः विकारविशेषेसतिसन्निधानेकृत्स्नस्यविकारस्याध्यासपूर्वकत्वान्नाध्यास
स्याविकारोहेतुरितिविरुद्धार्थाभिधानादसामंजस्यादिदोषइतिनतत्पक्षसंभवगंधः तर्काप्रतिष्ठानादपि कापिलतंत्रस्यतर्कमूल
त्वेनशाक्यादितर्कप्रतिहतत्वात्तस्यतर्कस्याप्रतिष्ठितत्वाच्चनतत्पक्षसंभवः अन्यथानुमेयमितिचेदेवमप्यनिर्मोक्षप्रसंगः इतःपूर्वं
विपमानेस्तत्कैरप्रतिहतत्वंयथासंभवतितथाप्रधानकारणवादमनुमास्यामहइतिचेत्तथापितर्काप्रतिष्ठानदोषादमोक्षो
दुर्वारस्तदधिककुतर्ककुशलिसद्भावसंभवात् एतेनशिष्टाःपरिगृहीतापिव्याख्याताः नपरिगृह्यन्तेवैदिकैरित्यपरिगृहीताः एतेन
तर्काप्रतिष्ठानलक्षणेनकपिलस्मृतिनिरसनहेतुनापरिशिष्टकणभक्षणादिस्मृतयोपिनिरस्ताव्याख्याताः परमाणु
कारणवादःसर्वसंमतइतिनतेषांतर्कस्याप्रतिष्ठानत्वंइत्यधिकाशंकातर्कमूलत्वाविशेषात्परमाणूनांप्रत्यक्षत्वात्द्व्यणुका
दिविवादत्वाच्चतर्कस्याप्रतिष्ठितत्वमेवेतिपरिहारः भोक्तृत्वापत्तेरविभागश्चेत्स्याल्लोकवत् सर्वात्मभूतब्रह्मणःस्वश
रीरभूताज्जीवान्निरतिशयानंदैकस्वभावतयायोविभागउक्तःसविभागःसंभवतिनेतिसंशयः नसंभवतीतिपूर्वपक्षः
सर्वंचिदचिद्वस्तुसशरीरत्वात्ब्रह्मणःसशरीरस्यचसुखदुःखयोर्भोक्तृत्वापत्तेस्तदापत्तिश्चनहवैसशरीरस्यसतःप्रिया

करणादिदोषप्रसक्तिः ब्रह्मणो जगत्कारणत्वं संभवति उत नेति संशयः न संभवतीति पूर्वपक्षः कुतः अयमात्मा ब्रह्म तत्त्वमसीति
सामानाधिकरण्येन जीवाद्ब्रह्मणोऽनन्यत्वावगमात् जगत्सर्गस्य च जीवदुःखहेतुत्वादात्महिताकरणाहितकरणादिदोषप्रसक्तेः सर्व
वे०दी० ज्ञस्य सत्यसंकल्पस्य ब्रह्मणो जगत्कारणत्वानुपपत्तेः जीवपरयोर्भेदवादिन्यः श्रुतयोऽनन्तो ब्रह्मणोऽनन्यत्ववदनात्त्वयैव परित्यक्ताः
३१ भेदे सत्यनन्यत्वासिद्धेः औपाधिकभेदविषया भेदश्रुतयः स्वाभाविकाभेदविषया अभेदश्रुतय इति चेत् तत्रेदं वक्तव्यं स्वभावतः
स्वस्मादभिन्नं जीवं किमनुपहितं जगत्कारणं ब्रह्म जानाति न वा न जानातीति चेत् सर्वज्ञत्वहानिः जानातीति चेत् स्वस्मादभिन्नजीवस्य दुः
खं स्वदुःखमिति जानतो ब्रह्मणो हिताकरणादिदोषप्रसक्तिरनिवार्या जीवब्रह्मणोरज्ञानकृतो भेदः तद्विषया भेदश्रुतय इति
चेत् तत्रापि जीवाज्ञानपक्षे पूर्वोक्तविकल्पः तत्फलं च तदवस्थमेव ब्रह्माज्ञानपक्षे स्वप्रकाशरूपस्य ब्रह्मणो ज्ञानसाक्षित्वं न तत्कृता जग
त्सृष्टिर्न संभवतीति अज्ञानेन प्रकाशस्तिरोहित इति तिरोधानस्य प्रकाशनिवृत्तिकरत्वेन प्रकाशस्यैव स्वरूपत्वात् स्वनिवृत्तिरेवेति
30 स्वरूपनाशादयो दोषा भाष्ये प्रपञ्चिताः राद्धान्तस्तु अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया संनिरुद्धः तयोरन्यः पिप्पलं
स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति प्रधानक्षेत्रज्ञपतिर्गुणेशः पृथगात्मानं प्रेरितारं च मत्वा जुष्ट इत्यादिभिः प्रत्यगात्मनोऽर्थान्तरभूतं
ब्रह्मेत्यवगमात् जीवकर्मानुगुणजगत्सर्गस्य च ब्रह्मणो लीलाप्रयोजनत्वात् जगत्कारणत्वं संभवत्येव तत्त्वमस्यादिसामानाधिकर राम
ण्येन निर्देशो यस्यात्मा शरीरमित्यादिश्रुतेर्जीवस्य ब्रह्मशरीरत्वात् शरीरतया जीवप्रकारब्रह्मप्रतिपादनपरः सूक्ष्मचिदचिद्वस्तुश ३१
रीरं ब्रह्म कारणावस्थं स्थूलचिदचिद्वस्तुशरीरं ब्रह्मैव कार्यावस्थमिति कार्यकारणयोरनन्यत्वमेवमपि शरीरभूतयोश्चिदचिद्

नन्वयं कार्यस्य जगतः आरंभणशब्दादिभ्यो वाचोऽभ्यनृतत्वमुपपाद्य तदुपपद्यते वाचारंभणं इति शब्दग्रादिवेषां पूर्वोक्तिनां वाकानां
नास्यारंभणशब्दादीनि नानि सन्नन्यत्वमुपपादयन्ति भावे चोपलब्धेः घटादिकार्यभावे च तदेवेदं नद्द्वयमिस्त्यमवस्थितमिति
कारणस्योपलब्धेश्च कारणानन्यत्वं कार्यस्योपपादयन्ति तस्य वा तत्त्वमुपपद्यतां तस्याविशिष्टस्य सत्त्वाद्वापरस्य ग्रपरस्य कार्यस्य
कारणे सत्त्वाच्च कारणादनन्यत्वं कार्यस्य सर्वमिदं घटशरावादिकार्यं पूर्वान्ते सदेवासीदिति कारणे कार्यमुपलभ्यते घटशरावादिसं
स्थानसंस्थितमेवमद्वयं पूर्वकाले पिंडाकारमुपलभ्यमिति तथा ग्रस्य प्रदव[illegible]न्नेतिचेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दा
न्तराच्च ०ग्रसदेवेदमग्रआसीदित्यादिषु कारणावस्थायां कार्यस्यासत्कारणे कार्यं सदिति व्यपदेशो वयपद्यते इतिचेतन्न सदिति
व्यपदेशहेतुभूतनामरूपावस्थाविशेषविरुद्धावस्थाधर्मान्तरेण योगादसदिति व्यपदिश्यते कथमिदमवगम्यते वाक्यशे
षाद्युक्तेः शब्दान्तराच्च वाक्यशेषस्तावत् तदसदेव सन्मनोकुरुत स्यामिति ग्रसदिति व्यपदिष्टस्येव मनस्कारत्वप्रतिपादनेना
सद्व्यपदेशो धर्मान्तरयोगनिमित्त इत्यवगम्यते युक्तिश्च धर्मान्तरयोगमेवासद्व्यपदेशहेतुमवगमयति घटोऽस्ति घटो नास्ति
सदसतव्यपदेशयो र्घटत्वकपालत्वयोः परस्परविरोधिधर्मयोरेव हेतुत्वे सिद्धे तदतिरिक्तानुपलब्धत्तुच्छत्वस्य हेतुत्वकल्प
नानुपपत्तेः तथा शब्दान्तरं च सदेव सोम्येदमग्रआसीदिति समानप्रकरणस्यम् सच्छब्द धर्मान्तरयोगनिमित्तमवगमय
ति पटवच्च यथा तन्तवएव व्यक्तिभेदविशेषभाजः पटइति नामरूपकार्यान्तरादिकं भजते तद्वद्ब्रह्मापि यथाच वायुरेक एवश
रीरे वृत्तिविशेषं भजमानः प्राणापानादि नामरूपकार्यान्तराणि भजते तद्वद्ब्रह्मापीति तदनन्यत्वं च जगतः सिद्धम् इतरव्यपदेशादि

स्तं तिन्तथा ब्रह्मापि देवादेः शक्त्या वस्येयशक्तित्वाद् ब्रह्मतन्तुल्लवैपित्यमसुखग्रहणायेति मंतव्यम् कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो
वा॰ ब्रह्मणो जगत्कारणत्वं संभवतीति निश्चयः न संभवतीति पूर्वपक्षः निरवयवस्य ब्रह्मणो जगदुपादानत्वे कृत्स्नस्य ब्रह्मणो जग
वे॰दी॰ दाकारेणोपयोगप्रसंगात् सति जिहीर्षया सावयवत्वाभ्युपगमे सदेव सोम्येदमग्र इत्यादिकारणावस्थायां निरवयवत्वावादिशास्त्र श
३२ ब्दो बाध्येत यद्यपि सूक्ष्मचिदचिद्वस्तुशरीरं ब्रह्म कारणं स्थूलचिदचिद्वस्तुशरीरं ब्रह्म कार्यमित्यभ्युपगम्यते तथापि शरीरांश
स्यापि कार्यत्वाभ्युपगमात् कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा सिद्धान्तस्तु सकलेतरविसजातीयं श्रुत्येकसमधिगम्यं सर्व
शक्तियुक्तं ब्रह्म निरवयवमपि कार्यं च भवति अन्यच्च भवतीति परिमितशक्ति वस्तु चोद्यं तत्र न प्रसज्यते यथा जातिवादिनो जाति
रेकैव भूत्वा शिंशपामुंडादिष्वनंतविलक्षणेष्वनंतेष्वपि व्यक्तिषु सप्राप्ये वर्तते न तत्रेतरवस्तुचोद्यमिति जगत्कारणत्वं संभवत्येव सूत्रा
31 र्थस्तु ब्रह्मकारणत्वे कृत्स्नस्य ब्रह्मणः कार्यत्वेनोपयोगप्रसंगः निरवयवत्वशब्दकोपो वा सावयवत्वे निरवयवत्वादिशब्दबाधप्र
संग इत्यर्थः श्रुतेस्तु शब्दमूलत्वात् तु शब्दः पक्षव्यावृत्त्यर्थः श्रुतेः श्रुतिप्रामाण्यान्नैवं प्रसज्यते शब्दमूलत्वात् शब्दैकमूलत्वे
न सकलेतरविसजातीयत्वादित्यर्थः आत्मनि चैवं विचित्राश्च हि आत्मनि चैवं जीवात्मन्यचेतनधर्माः प्रशक्तिश्चैवं अचेतन
न विसजातीयत्वादेवेत्यर्थः विचित्राश्च हि अचेतनेषु विसजातीयेष्वग्निजलादिषु विचित्रा हि शक्तयोपि दृश्यंते स्वपक्षदोषाच्च
प्रधानादिकारणपक्षे दोषाच्च ब्रह्मैव कारणं तत्र हि लौकिकवस्तुसजातीयत्वेन प्रधानादेः कृत्स्नप्रसक्त्यादिदोषान्यथ प्रसज्येरन् सर्वोपेता च तद् राम
दर्शनात् न केवलं सकलेतरविसजातीयत्वेन सर्वशक्त्युपेता परादेवतोच्यते तद्दर्शनाच्च सर्वशक्तियोगः श्रुतेरित्यर्थः दर्शयति तद्दश ३२

स्तुनोः शरीरिणो ब्रह्मणश्च दुःखित्वपरिणामित्वे हेयप्रत्यनीककल्याणगुणाकरत्वस्वभावाः स्वरूपविवेकविषयाः श्रुतिसिद्धास्तथै
व अवस्थिता इति ब्रह्मणो जगत्कारणत्वं संभवत्येव सूत्रार्थस्तु इतरो जीवः ब्रह्मणो जीवतया व्यपदेशात् जीवस्य च दुःखित्वात्तद्धि
तरूपजगदकरणमहितस्य जगत्कारणमित्यादिदोषप्रसक्तिर्ब्रह्मणो न जगत्कारणत्वं न संभवतीत्यर्थः अधिकं तु भेदनिर्देशात्
तुशब्दः पक्षव्यावृत्त्यर्थः प्रत्यगात्मनोऽधिकमर्थान्तरभूतं ब्रह्म कुतो भेदनिर्देशात् करणाधिपाधिपः प्रधानक्षेत्रज्ञपतिर्गुणेशः पृथ
गात्मानं प्रेरितारं च मत्वा इत्यादिभिः प्रत्यगात्मनो जीवात् ब्रह्मणो हि भेदो निर्दिश्यते अश्मादिवच्च तदनुपपत्तिः अश्मकाष्ठ
लोष्टतृणादेरिवानंतदुःखाकरजीवस्य निरतिशयानंदसत्यसंकल्पब्रह्मभावानुपपत्तिः न केवलं भेदश्रुत्यार्थान्तरत्वमव
गम्यते वस्त्वनुपपत्त्या चेत्यर्थः जीवसामानाधिकरण्यनिर्देशो य आत्मा शरीरमित्यादिश्रुतिसिद्धजीवप्रकारब्रह्मप्रतिपाद
नपर इत्यवस्थितेरिति काशकृत्स्न इत्यत्रैव प्रतिपादितः उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ब्रह्मणो जगत्कारणत्वं संभव
तीनेति संशयः न संभवतीति पूर्वपक्षः कुतः लोके कार्यजननसमर्थस्यापि वस्तुनः स्वकार्यजनने अनेककारकोपसंहारद
र्शनात् विचित्रजगज्जननसमर्थस्यापि ब्रह्मणोऽसहायस्य जनयितृत्वानुपपत्तेः राद्धान्तस्तु क्षीरस्य दधिभावे अन्यानपेक्ष
त्वदर्शनात् उपसंहरणनियमो न दृश्यते इति ब्रह्मणोऽन्यानपेक्षस्यैव कारणत्वं संभवत्येव सूत्रं तु निगदव्याख्यातं क्षीरव
द्धीति प्रसिद्धवन्निर्देशश्चोद्यमांद्यपरः देवादिवदपि लोके यथा देवादयः स्वे स्वे लोके स्वापेक्षितानि स्वसंकल्पादेव वस्तू

भवतीत्याशङ्क्याह वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथा हि दर्शयति ईश्वरस्य जगत्स्रष्टुर्देवादिवैषम्यपक्षपातो दुःखगर्भजगत्सर्गनै
र्घृण्यं च न संभवति: वैषम्यादावीश्वरस्य क्षेत्रज्ञकर्मसापेक्षत्वात् क्षेत्रज्ञानां पूर्वपूर्वकर्म पर्यालोच्य तत्तत्कर्मानुगुणं विषमं ज
वे॰ दी॰ गत्सृजतीति तत्कर्मैव वैषम्यादिहेतुरित्यर्थः तथा हि दर्शयति श्रुतिः साधुकारी साधुर्भवति पापकारी पापो भवतीति॰ न क
३२ र्म्माविभागादिति चेन्नानादित्वात् उपपद्यते चाप्युपलभ्यते च॰ सदे॰ः प्राक् कर्म न विद्यते क्षेत्रज्ञाभावात् तदभावश्च सदेव सोम्येदम
ग्र आसीदित्यवधारणावगतादविभागादिति चेन्नानादित्वात् क्षेत्रज्ञानां तत्कर्मप्रवाहाणां च उपपद्यते चानादित्वं क्षेत्रज्ञस्वरू
पानादित्वेपि नामरूपविभागाभावात् अविभागश्रुतिः अन्यथा अकृताभ्यागमकृतविप्रणाशप्रसंगात् उपलभ्यते च श्रुतिस्मृ
त्योः क्षेत्रज्ञानादित्वम् तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियतेहि नामरूपव्याकरणमात्रश्रवणात् क्षेत्रज्ञानां स्वरूपा
32 नादित्वसिद्धेः प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि इति अविभागश्रुतिरपि नामरूपविभागाभावादुपपद्यत इत्यभिप्रायः सर्वधर्म्मो
पपत्तेश्च॰ प्रधानपरमाण्वादिष्वनुपपन्नानां स्वपक्षदोषादिष्वादिसूक्तानां सर्वेषां धर्म्माणां कारणत्वोपपादकानां ब्र
ह्मण्युपपत्तेश्च ब्रह्मैव कारणं प्रधानपरमाण्वादीनां परिमितशक्तित्वात् लोके दृष्टवस्तुसजातीयत्वाच्चानुपपत्तयः स
हस्रशः संति ब्रह्मणः शास्त्रैकसमधिगम्यतया सकलेतरविसजातीयत्वेनाचिंत्यशक्तित्वात् सर्वशक्तित्वश्रुतेश्च राम
सर्वमुपपन्नमित्यर्थः इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे द्वितीयाध्यायस्य प्रथमः पादः ॥१॥ रचनानुप ३२

नं श्रुतिः परास्य शक्तिर्विविधैव श्रूयते इत्यादिका विकरणत्वान्नेति चेन्न तदुक्तम् उक्तस्यार्थस्य दृढीकरणाय चोद्यपूर्वकं पूर्वोक्तं॥
स्मारयति विकरणत्वात् कारणविरहितत्वात् ब्रह्मणः कारणमिति चेन्न तस्य कार्यं करणं च विद्यते इति श्रूयते तदुक्तं तत्र यदुक्तं
तत्पूर्वमेवोक्तं शास्त्रमूलत्वाद्धि चिन्त्याहि इत्ययमेव परिहारः शब्दैकमूलत्वेन सकलेतरविसजातीयत्वात् ब्रह्मणः विसजातीया
नां च शक्तिवैचित्र्यस्य लोके दृष्टत्वात्सर्वमुपपन्नमित्यर्थः न प्रयोजनवत्त्वात् ब्रह्मणो जगत्कारणत्वं संभवति नेति संश
यः न संभवतीति पूर्वपक्षः बुद्धिपूर्वारंभाणां सप्रयोजनत्वात् ईश्वरस्य च स्वतएवावाप्तसमस्तपूर्णकामस्य जगत्सर्ग
रंभप्रयोजनाभावात् गर्भवासादिदुःखरूपत्वात्स्वेः परानुग्रहेणापि न प्रयोजनत्वं शङ्क्यं नन्तु परिपूर्णस्यापी
श्वरस्य केवललीलार्थे प्रयोजनाय जगतः सृष्ट्यारंभः संभवति यथा लोके सप्तद्वीपवतीमेदिनीमधितिष्ठतो
महाराजस्य परिपूर्णस्यापि केवललीलार्थं कंदुकाद्यारंभा दृश्यन्ते तद्वदीश्वरस्यापि लीलाप्रयोजनाय जगत्सर्ग
रंभः संभवति सत्यार्थस्तु प्रयोजनवत्त्वात्स्वेश्वरस्य स्वतः परिपूर्णस्य प्रयोजनाभावान्न सृष्टत्वम् लोक
वत्तु लीलाकैवल्यम् लीलाकैवल्यं लीलायाः प्रयोजनत्वे कैवल्यं संभवति केवलाया लीलायाः सृष्ट्यार
भप्रयोजनत्वं संभवतीत्यर्थः लोकवत् यथा लोके राज्ञः कंदुकाद्यारंभाः देवमनुष्यादिविषमसृष्ट्यापत्त्या पात
प्रसंगात् दुर्विषहदुःखगर्भत्वेन नैर्घृण्यप्रसंगात् न च परमकारुणिकस्य परमपुरुषस्य लीलार्थमपि जगत्सर्गो निसं

व्यतिरेकेण प्रतिसर्गावस्थायाः अनवस्थितिप्रसंगाच्च केवलं प्रधानं न कारणं अन्यानपेक्षत्वात् प्रधानस्य सर्वदैव सृष्टिः
वे॰दी॰ प्रसज्येत अन्यत्राभावाच्च न तृणादिवत् धेन्वादिनोपभुक्तं हि तृणादिकं स्वयमेव क्षीराकारेण परिणमते न तु प्रधा-
३५ नमपीति च वक्तुं न शक्यते धेन्वादिनोपभुक्तस्यापि तृणादेः क्षीराकारेण परिणामः प्राज्ञाधिष्ठितत्वादेव भवती-
त्यभ्युपेयं कुतः अन्यत्राभावात् अनडुहाद्युपभुक्तस्य प्रहीणस्य वा तृणादेः क्षीराकारेण परिणामाभावात् पुरुषाश्म-
वदिति चेत् तथापि॰ प्राज्ञानधिष्ठितमपि प्रधानं चैतन्यमात्रवपुर्निष्क्रियः पुरुषः सन्निधिमात्रेण सर्गादौ प्रवर्तय-
ति यथा दृक्शक्तियुक्तो गमनशक्तिविकलः पंगुः पुरुषोऽन्धं दृक्शक्तिविकलं प्रवृत्तियुक्तं स्वसन्निधानात्प्रवर्तयति।
33 यथा वाऽयस्कान्तोऽश्मा स्वसन्निधानादयः प्रवर्तयति तद्वदिति चेत् परिहरति तथापीति तद्वदपि प्रधानस्य प्रवृत्तिर्नोप-
पद्यते तत्र हि पंगोः पुरुषस्य गमनशक्तिविकलस्यापि मार्गोपदेशादिव्यापारः कादाचित्को दृश्यते ऽयस्कान्तस्याप्ययसा-
रविरहेऽपि उपदेशादिग्रहणमात्रेण न धर्मोऽस्ति अयस्कान्तमहोरध्व्यः प्रवर्तने कादाचित्कमयःसन्निधानं विद्यते
इह तु सन्निधिमात्रातिरेकी नादृशः कश्चिद्विशेष उभयत्रापि न विद्यते पुरुषसन्निधानस्य नित्यत्वेन नित्यसर्गप्रस- राम
क्तिः तथा सति प्रतिसर्गाभावोऽपवर्गाभावश्च अंगित्वानुपपत्तेश्च इतश्च गुणानामुत्कर्षापकर्षरूपांगांगिभावे। ३५

पत्तेश्च नानुमानम् सांख्यतंत्रसिद्धः प्रधानकारणवादः किं समीचीनयुक्तिमूलः उत नेति संशयः समीचीनयुक्तिमूलः इति पूर्व
पक्षः घटादिवद्विचित्रसन्निवेशं जगत्कार्यत्वेन स्वसरूपकारणविशेषारब्धं सुखदुःखमोहरूपतया सत्त्वाद्यात्मकं जगत्
सत्त्वरजस्तमोमूलं तत्र महदादिषु परिच्छिन्नानां घटादिवत् परिमितत्वेनापरिमितजगदुपादानाशक्तेस्तन्न्यूनातिरिक्तानि सा
म्यावस्थान्यपरिमितानि सत्त्वरजस्तमांसि अव्यक्तप्रधानादिशब्दाभिधेयानि जगत्कारणम् राद्धान्तस्तु रथप्रासादादिनि
र्माणहेतुभूततक्षादिवदचेतनं प्रधानं स्वस्वभावाद्यभिज्ञचेतनानधिष्ठितं विचित्रजगद्रचनासमर्थमिति केवलं प्रधा
नमकारणं सूत्रार्थस्तु अनुमीयते इत्यनुमानं तस्याचेतनस्य प्राज्ञानधिष्ठितस्य विचित्रसन्निवेशजगद्रचनानुपपत्तेः तत्का
रणं च कारात् सत्त्वादीनां द्रव्यगुणत्वेन शौक्ल्यादेरिवोपादानकारणत्वासंभवं समुच्चिनोति सत्त्वादयो हि कार्यगतलाघवप्र
काशादिहेतुभूताः कारणभूतद्रव्यादिगतास्तत्स्वभावविशेषाः एवं तेषां रचनानुपपत्तेरिति वर्तते प्राज्ञानधिष्ठितस्य प्रधानस्य
विचित्रजगद्रचनानुगुणपरिस्पन्दरूपप्रवृत्त्यनुपपत्तेश्च प्रधानमकारणम् पयोम्बुवच्चेत्तत्रापि पयसोम्बुनश्च प्राज्ञा
नधिष्ठितस्यैव दध्यादिभावेन नालिकेररसादिविचित्ररूपेण च परिणामो दृश्यते तद्वत्प्रधानस्यापि केवलस्य जगदाकारेण प
रिणाम उपपद्यते इति चेत्परिहरति तत्रापीति तत्रापि पयोम्बुन्यपीत्यर्थः यत्र रथादावचेतनस्य प्राज्ञाधिष्ठितत्वं दृष्टं तद्व्यति
रिक्ते हि सर्वं पक्षीकृतमेव योऽप्सु तिष्ठन्नित्यादिश्रुतेस्तदपि प्राज्ञाधिष्ठितम् व्यतिरेकानवस्थितेश्चानपेक्षत्वात् सर्ग

वे॰ दी॰ ३५ न्तः परमाणुकारणवादः समीचीनयुक्तिमूलः उत नेति संशयः समीचीनयुक्तिमूल इति पूर्वपक्षः अवयवसंयोगादवयव्युत्पत्ति
दर्शनात् अवयवावयवत्वस्य चाणुपर्यन्तं सर्षपमहीधरवैषम्यदर्शनात् अवयवावयवत्वकाष्ठावश्यमभ्युपगमनीयेति परमाणुसिद्धिः
ते कार्यानुगुण्येन चतुर्विधाः परमाणवो विपाकदशापन्नचेतनादृष्टसचिवाः परमेश्वराधिष्ठिता द्व्यणुकादिक्रमेण ज
गदारभन्ते इति राद्धान्तस्तु अवयवाः स्वकीयैः षड्भिः पार्श्वैः संयुज्यमानास्स्वस्मान्महान्तमवयविनमुत्पादयन्तीति पर
माणूनामपि तथैवोत्पादकत्वमभ्युपेत्य तथा सति परमाणवोऽपि सांशाः स्वकीयैरवयवैरिति न क्वचित् कारणव्यवस्थि
34 तिः सूत्रार्थस्तु महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्यां असमञ्जसमिति निवर्तते वा यद्वक्ष्यार्थो ह्रस्वपरिमण्डलाभ्यां द्व्यणुकप
रमाणुभ्यां महद्दीर्घवत् अणुकद्व्यणुकोत्पत्तिवदन्यत्तदभ्युपगतं सर्वमसमञ्जसं द्व्यणुकादिक्रमेणारम्भकत्वं कारण
नवस्थितेरसमञ्जसं किमत्रास्मत्समञ्जसमित्यत्राह उभयथापि न कर्मातस्तदभावः परमाणूनामाद्यकर्म तददृ
ष्टकारितमित्यभ्युपगम्यते न तददृष्टं किमणुगतमुत देवगतं उभयथाप्यदृष्टस्य कादाचित्कत्वेन सर्वदोत्पादक
त्वप्रसंगात् कादाचित्कं कर्म न संभवति अतः कर्मणोऽपरमाणुसंयोगाभावः विपाकापेक्षत्वेऽपि नानाविधा राम ३५
नां तादृशानामेकदैकरूपविपाकश्च न संभवति अनुमानेनेश्वरासिद्धेरीश्वरेच्छयापि नियमो न संभवति॥

नजगन्न वृत्तिरनुमितौ प्रति सर्गावस्थायां साम्यावस्थानामेकस्योत्कर्षरूपं गितानुपपत्तेश्च न संभवति तत्राप्युत्कर्षोस्तीति वे
त्सर्वदा सर्गप्रसंगः अन्यथानुमितौ च व्याप्तिशक्तिवियोगात् उक्तप्रकारा घति रिक्तप्रकारांतरेण प्रधानानुमितौ च व्याप्तिशक्ति
वियोगात् रचनानुपपत्त्यादयो दोषास्तदवस्थाः अभ्युपगमे व्यवस्थाभावात् प्रधानानुमित्यभ्युपगमेपि प्रधानेन प्रयो
जनाभावात् न तदनुमेयं पुरुषस्य भोगापवर्गार्थं तत्पाहि प्रधानप्रवृत्तेः सप्रयोजनत्वं चेत् तन्न मात्रवपुषो निष्क्रियस्य
नित्यं निर्विकारस्य इतरेतराध्यासकृतप्रकृतिदर्शनरूपभोगस्तद्विवेकरूपोपवर्गासिद्धिः विप्रतिषेधाद्यासमंज
सम् एवं प्रवृत्तिविधिं दूचेदं सांख्यानां दर्शनं प्रकृतेः परार्थतया पुरुषोऽसौ भोक्ताधिष्ठातेत्याहुः प्रकृतेश्च पुरुषस्य भोगा
पवर्गार्थतया सप्रयोजनत्वं प्रकृत्यैव साधनभूतया पुरुषो भोगमपवर्गं चाप्नयते इति चोक्तं पुरुषस्यैव तन्मात्रवपु
र्नित्यो निर्विकारेण द्रष्टा न भोक्ता न कर्तेति च अत एव पुरुषो न बध्यते नत्व मोक्षसाधनमनुतिष्ठतीति न मुच्यते इति व
दंति प्रकृतिरचेतना भूतेव पुरुषसंनिधानात् पुरुषधर्मं चेतनत्वं स्वस्मिन्स्वधर्मं कर्तृत्वं पुरुषे चानुसंधाय ब
ध्यते मोक्षसाधनमनुतिष्ठति मुच्यते इति चाहुः अध्यासरूपमनुसंधानं हि चेतनधर्मः तथा प्रकृतिरनुपका
रिणः पुरुषस्य भोगापवर्गरूपं प्रयोजनं साधयंती उपकारिणीति चाहुः अध्यासरूपं बंधादयः पुरुषस्य न संतीति च
क्तस्योपकारः एवमाद्यन्योन्यविरुद्धभाषणादसमंजसम् महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्याम् किंकरणद

वे वे०द्वा०
१ २६
35

तु सर्वज्ञम्मन्यवादिनो माध्यमिकस्य तत्त्वापेक्षया सर्वस्य ह्याभावमभ्युपगच्छतो जगदुत्पत्तिप्रकारो लोकव्यवहारश्च किं सूपपा
दः । उत दुरूपपाद इति संशयः । सूपपाद इति पूर्वपक्षः । तथा हि पार्थिवाप्यतैजसवायवीयाणां धातुपुद्गलाः परमाणवः
चयविशेषादिरूपेण संहता भवन्तीति ते भूतभौतिकशरीरेन्द्रियविषयलक्षणसंघाताः । तत्रान्तर्विज्ञानसंतानो ग्राहकाभिमा
नारूढ आत्मत्वेनावतिष्ठते एवं क्षणिकेष्वपि स्थिरत्वादिगोचरभ्रान्त्याविद्यया सर्वमुपपद्यत इति जगदुत्पत्ति
र्लौकिकव्यवहारश्चोपपद्यते । राद्धान्तस्तु क्षणप्रध्वंसिनः परमाणवः कदा संहतौ व्याप्रियन्तां संहन्यन्ते संहतौ व्याप्रियन्तां तस्मिन्ने
व क्षणे विनष्टाश्चेत्केन पुनः संहन्यन्ते एवं विज्ञानान्यपि कदा के विषयं स्पृशन्ति कश्च कदा कं जानाति कश्च कदा कमर्थ
मुपादत्ते स्प्रष्टा नष्टः स्पृश्यं च नष्टं वेदिता च नष्टः वेद्यं च नष्टं कथमन्येन स्पृष्टमन्यो जानाति कथं वान्येन विदितमन्य
उपादत्ते संतानैकत्वसिद्धेऽपि संतानिभ्यः संतानस्य परमार्थतो वस्त्वन्तरत्वानभ्युपगमात् संतानैकत्वपरमार्थिकमकिंचि
त्करं स्थिरत्वाद्यविद्ययापि संघतोत्पत्तिर्न संभवति नहि शुक्तिकादिषु रजताद्यविद्यया शुक्तिकारजताद्युत्पत्तिसंभवः वि राम
दुषश्च पूर्वस्य नष्टत्वेन उत्तरेणाविदुषा पूर्वविनष्टेन विदुषा न संहितार्थोपादानं न संभवति संस्काराश्रयत्वेन च २६
एकोऽर्थस्थिरो नोपगम्यते अतो जगदुत्पत्तिर्लौकिकव्यवहारश्च दुरुपपाद एव सूत्रार्थस्तु उभयहेतुकेऽपि समुदाये समु

समवायाभ्युपगमाच्चसाम्यादनवस्थितेः समवायाभ्युपगमाच्चासमंजसंसमवायोहिजातिगुणादीनांद्रव्यविशेषादपृथक्सिद्धेहे
तुत्वयाभ्युपगम्यते समवायस्यापितथाभावेहेत्वपेक्षासाम्यादनवस्थितेः समवायस्यतथाभावस्वाभाविकइतिचेत् जातिगु
णादीनामप्येषएवस्वभावइतियुक्तम् नित्यमेवचभावात् इतश्चसमवायसंबंधस्यानित्यत्वाभ्युपगमात्संबंधिनित्यत्वमं
तरेणतदनुपपत्तेरवयवावयविनोरुभयोरपिनित्यमेवभावात् कार्यकारणभावएवनसिद्ध्यति रूपादिमत्वाच्चविपर्य
योदर्शनात् परमाणूनांनित्यत्वनिरवयवत्वादिविपर्ययश्चस्यात्रूपादिमत्वात्तेषांघटादिवद्रूपादिमत्सुतथादर्शनात्
दर्शनादेवहिभवदभिमतंपरिकल्प्यते उभयथादोषात् अनित्यत्वादिभयात्परमाणूनांरूपादिशून्यत्वेकार्यगुणस्यका
रणगुणपूर्वकत्वासिद्धेः नत्सिद्धयेरूपादिमत्वेचानित्यत्वादिप्रसक्तिरित्युभयथाचदोषादसमंजसमेव अपरिग्रहाच्चा
त्यंतमनपेक्षा कापिलपक्षोहिश्रुतिन्यायविरुद्धोपिसत्कार्यवादित्वात् किंचिद्वैदिकैः परिगृह्यते काणादेस्तुकस्यचिदंशस्य
वैदिकैःपरिग्रहाभावादनुपपन्नत्वाच्चनिःश्रेयसार्थिभिरत्यंतमनपेक्षाकार्या समुदायउभयहेतुकेपितदप्राप्तिः सौ
गताश्चतुर्विधाः प्रत्यक्षसिद्धस्थूलद्रव्यवादिनःकेचिद्वैभाषिकाः अन्येविज्ञानानुमेयस्थूलद्रव्यवादिनःतेच
सौत्रांतिकाः परेनिरालंबविज्ञानमात्रसत्तांवदंतियोगाचरात्रयोप्येतेसर्वाभ्युपगतवस्तुनःक्षणिकत्वंवदंति अन्ये

रविच्छेदात् प्रतिसंख्याप्रतिसंख्यानिरोधयोः स्थूलसूक्ष्मविनाशयोरप्राप्तिरित्यर्थः स्थूलविनाशो मुद्गराभिघातानंतरभा
व्युपलब्धियोग्यः सूक्ष्मस्तु प्रतिक्षणभाव्युपलब्ध्यनर्हः तौ निरन्वयौ न संभवतः उत्पत्तिविनाशधर्मभागिनो द्रव्यस्याविच्छेदात्।
वै॰दी॰ दनन्यत्वमिति सत्कार्यवादस्योपपादितत्वादित्यभिप्रायः घटादौ कपालादिरूपावस्थायाः निरन्वयविनाशादर्शनात् प्रदी
२१ पनिर्वाणेपि सूक्ष्मावस्थाप्राप्तिरित्यविरोधः उभयथाचेदाबात् उत्पन्नस्य तु क्षायतोनुत्पादुत्पत्तौ चेत्तु भयप्रकारे च दोषात्ते
नसंभवतः उत्पन्नस्य तु क्षणावस्थानोपपत्तेनुत्पादुत्पद्यमानं जगत् क्षणिकमेव भवति सत्त्वं तु वर्णादिरूपमानं न सत्त्वं तु वर्णोपा
त्मकं घटमुकुटादिवत् अनन्तु क्षणावस्थितं तु उत्पत्तिश्च न संभवतः अकारणत्वाविशेषात् अकारणेन तु स्वरूपता न संभवति
36 अबाधितप्रतीतिसिद्धं पृथिव्यादिवदाकाशस्याबाधितप्रतीतेरविशेषात् प्रतीयते ह्याकाशरूपेण पततीत्यत्र गगनात् पततीति श्येना
देः पतनदेशत्वेन अनुस्मृतेश्च प्रत्यभिज्ञानाच्च घटादेः स्थायित्वं तदेवेदमिति हि प्रत्यभिज्ञायते प्रत्यभिज्ञा हि नामातीत
वर्तमानकालवर्त्येकवस्तुविषयमेकं प्रत्यक्षज्ञानं तस्य कालद्वयसंबंधविशिष्टमेकमेव वस्तु विषयः न च तदित्यंशः स्मर
णं इदमित्यंशः प्रत्यक्षग्रहणं अतीतकालसंबंधीन्द्रियसंप्रयोगाभावादिति वाच्यं तदिदमिति सामानाधिकरण्येन ग्रहणस्यैवण राम
केवलतत्र स्फुरणात् पूर्वानुभवजनितसंस्कारसचिवेन्द्रियसंप्रयोगज पुरुषस्य तथाग्रहणमुपपद्यत एव अन्वयव्यति २१
रेकाधीनं हि सर्वत्र सामग्रीपरिकल्पनं न च ज्वालादिवत् सादृश्यनिबंधनप्रत्यभिज्ञा वा शक्यते वक्तुं कालद्वयवर्तिनो द्वयोः

दायाप्राप्तिः परमाणुहेतुकः पृथ्व्यादिभूतहेतुकः शरीरेन्द्रियसमुदायश्चेत्युभयहेतुकोऽपि समुदायः क्षणिकत्वाभ्युपगमादु
केन न्यायेन न सिध्यतीत्यर्थः इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावनिमित्तत्वात् यद्यपि क्षणिकाः सर्वभावास्त
थापि अविद्यादीनामितरेतरहेतुकत्वादुपपन्नं लोकव्यवहारादिकं अस्थिरेषु स्थिरत्वबुद्धिरूपा अविद्या तत्र तत्र रागद्वे
षादयो जायंते इत्येवमादिपरंपरया पुनरप्यविद्येति चक्रवत्परिवर्तते इति चेन्न तदुपपद्यते संघातभावानिमित्तत्वात् अविद्यायाः
यद्यप्यविद्या अविपरीतबुद्धिः क्षणिकं स्थिरत्वेन विषयीकरोति तथापि नन्वं वस्तुतः स्थिरं भवति इति वस्तुतः स्थिरकार्यं न करो
ति अतः संघातभावो न सिध्यतीत्यर्थः अस्थिरे स्थिरत्वबुद्धियुक्तस्य विज्ञानात्मनस्तदैव नष्टत्वात् कस्य रागद्वेषादयो जायंत इ
ति रागद्वेषादिपरंपरा च न सिध्यतीत्यभिप्रायः उत्तरोत्पादे च पूर्वनिरोधात् इतश्चोत्तरघटोत्पत्तिवेलायां पूर्वस्य विनष्टत्वाद
भावस्यैव हेतुत्वेनाविशेषात् सर्वेषां सदोत्पत्तिः स्यात् कारणस्य सर्वस्य हेतुः स्यात् असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा पूर्वं क्ष
णवर्तिनो देशस्य हेतुत्वोपगमेऽपि देशादेर्विशेषकस्यास्थिरस्यैकस्यानभ्युपगमात् अविशेषेण उत्तरक्षणवर्तिनः त्रैलोक्यग
तस्य सर्वस्य हेतुः स्यात् असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा असत उत्पत्तौ प्रतिज्ञाविरोधः अभवतां अधिपतिसहका
र्यादीनां विज्ञानोत्पत्तिहेतुत्वप्रतिज्ञानात् अर्थान्तरमारिजिहीर्षया पूर्वघटक्षणास्तित्वे तत्तदा यौगपद्यं घटक्षण
द्वयोपलब्धिप्रसंगः न चोपलभ्यंते सतो निरन्वयविनाशोऽपि न संभवतीत्याह २० प्रतिसंख्याप्रतिसंख्यानिरोधाप्राप्ति

उपलभ्यते एवं छेदनादेरप्याकारो द्विधाभवनादिहेतुस्तथैव कर्तृगतस्योपलम्भात्तेन समूर्तानां क्रियादीनां कर्तृकर्मनिरूपणी
यत्वाकाराणां कर्माकारत्वमाशंक्योपपत्ते सूत्रार्थस्तु ज्ञानमतिरिक्तार्थाभावो न शक्यते वक्तुं उपलब्धेः घटमहं जानामीति
वे॰ दी॰ ३८ ज्ञानातेः कर्मतया कर्तृतया चोपलब्धेः वैधर्म्याच्च न स्वप्नादिवत् स्वप्नज्ञानादिवज्जागरितज्ञानानां न मिथ्यात्वं तद्वैधर्म्या
त् निद्रादिकारणदोषबाधकप्रत्ययरहितत्वादित्यर्थः चकारात्तान्यपि यथार्थानीत्यभिप्रायः नभावोनुपलब्धेः नकेव
लस्यार्थशून्यज्ञानस्याभावः संभवति क्वचिदनुपलब्धेः अबाधितप्रतीतिसिद्धस्यासद्भावे सति ज्ञानमात्रस्याप्यसद्भावो न शक्यो
37 निवारयितुमित्यभिप्रायः सर्वथाऽनुपपत्तेश्च माध्यमिकोक्तसर्वशून्यवादः संभवति नेति संशयः संभवतीति पूर्वपक्षः विज्ञानं
घटपटादयश्च सर्वे भावा न संति कुतः उत्पत्त्यनिरूपणात् घटादिभावानां भावानावद्भुत्पत्तिर्न संभवति घटादिरुत्पद्यमानो हि पिं
डादिकेनुपमृद्य तेनोत्पद्यते पश्चाद्भावादुत्पद्यमानो घटादिरभावात्मक एव स्यादिति सर्वशून्यत्वमेव युक्तम् राद्धान्तस्तु
लोके भावाभावशब्दयोस्तद्बुद्ध्योश्च प्रमाणेनोपलभ्यमानस्यैव वस्तुनोऽवस्थाविशेष एव भावाभावरूपो विषयः वर्तमानतयो
पलभ्यमानस्य घटबुद्धोदरावस्थाविशेषो भावबुद्धिविषयस्तद्विरोधिपिंडाकारावस्थाविशेषोऽभावबुद्धिविषयः अतो न कुतश्चि राम
त्वदभिप्रेतं तुच्छत्वं सिध्यति सूत्रार्थः सर्वथानुपपत्तेश्च सर्वशून्यवादी सदिति प्रतिज्ञाय स्वाभिप्रेतं साधयति उत असदिति ३८
प्रतिज्ञाय पक्षांतरेण सर्वथा सर्वशून्यत्वानुपपत्तेः स्वाभिमतासिद्धिः सद्भावासद्भावयोर्विद्यमानवस्तुधर्मत्वोपपाद

साऽऽस्यानुसंधातुः ज्ञातुरेकस्यानभ्युपगमात् पृथिव्यादिविज्ञानानुमेयबाह्यार्थवादिनं तु ज्ञानेन नीलपीतादिविचित्राकारं द्विष्ठज्ञानानां पूर्वं हि
एवार्पितं ज्ञाने स्वाकारसमर्पणं विना तथा तमर्थमनुमिनोमीति ब्रोतरम् नासतो हेतुत्वात् असतो धर्मिणो धर्मस्यान्यत्र संक्रमणं न संभ
वति नहि धर्मिणि विनष्टे तत्धर्मस्यान्यत्र संक्रमणं क्वचिद्दृष्टम् उदासीनानामपि चैवं सिद्धिः वैभाषिकसौत्रान्तिकयोर्द्वयोरपि
साधारणमिदं दूषणं एवं सर्वभावानां क्षणिकताभ्युपगमे सति उदासीनानां निष्प्रयत्नानामप्यैहिकामुष्मिकसर्वार्थसिद्धिः स्यात्
प्रयत्नाद्यनुत्पत्तेः तदानीमेव विनष्टत्वात् संस्कारादेरपि कस्यचित् स्थिरस्यानुवर्तमानस्यानभ्युपगमात् पश्चादागतानां सिद्धिरहेतु
कीति निष्प्रयत्नानामपि सर्वार्थसिद्धिः नाभावउपलब्धेः योगाचाराभिमतो ज्ञानमात्रसद्भाववादः किं समीचीनयुक्तिमूल उतने
ति संशयः समीचीनयुक्तिमूल इति पूर्वपक्षः बाह्यार्थसद्भाववादिनापि तत्तदर्थज्ञानस्य प्रकाशमानत्वमवश्यमभ्युपगमनीयं सर्वस्य व
स्तुनः प्रकाशमानस्य स्वासाधारणेनाकारेण प्रकाशदृष्टत्वेन तत्र घटपटादिज्ञानस्य घटपटाद्याकार एव स्वाकारः अन्यथा घट
पटसाधारण्ये च तत्तज्ज्ञानस्य न संभवति एकस्यैव आकारस्य उपलभ्यते अस्य अनुज्ञानस्यैव ते तदतिरिक्तार्थसद्भावो न संभवति ताव
न्नेव घटोऽयं ज्ञानमिति व्यवहारस्यानुपपद्यते न स्वबहिरिवावभासो निर्मूलत्वाद्भ्रमकृतः राद्धान्तस्तु घटमहं जानामीति स
कर्मकस्य सकर्तृकस्य ज्ञानार्थस्य छेदनादिवत् सर्वदेशकालव्यापि लौकिकसार्वत्रिकमुपलभ्यमानस्य कर्तृकर्मव्यतिरेकेण
केवलस्यैव सद्भावमनुन्मत्तः कोऽब्रवीति साधारणाकारस्य तत्तच्छेदनादिवत् तत्तदर्थव्यवहारयोग्यतापादनाकारेण

असंभवात् नजैनमतं युक्तं कुतः एकस्मिन् उक्तरीत्या युगपत् विरुद्धधर्मसमावेशासंभवात् अतः सूत्रविरुद्धं वेदांतवादिभिरपि भे
वे०दी० दाभेदसमाश्रयणम् एवं चात्माकार्त्स्न्यम् एवं ह्यात्मकार्त्स्न्यं चानुपपन्नं शरीरपरिमाणत्वे ह्यात्मनो बृहतः शरीरादल्पीयसि शरीरे प्र
२.१९ विशतोऽकार्त्स्न्यम् अपरिपूर्णत्वं प्रसज्यते तदानीमल्पपरिमाणत्वात् नच पर्यायादप्यविरोधो विकारादिभ्यः तथाविधात्मत्वावस्था
योगेनाप्यविरोधो न संभवति घटपटादेरिव विकारत्वप्रयुक्तदोषास्पदत्वप्रसंगात् अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः
जीवस्य यदंत्यं परिमाणं मोक्षस्थं तस्य यस्मादेकरूपेणावस्थितेस्तदेव स्वाभाविकपरिमाणमिति आत्मनस्तत्परिमाणस्य चोभयो
38 र्नित्यत्वात् पूर्वमपि न शरीरपरिमाणत्वसिद्धिरिति पूर्वावस्थायां न विशेषः अतोऽसंगतमेवेदं जैनमतम् पत्युरसामंजस्यात् पशु
पतिमतं निःश्रेयसार्थिभिरादरणीयमुत नेति संशयः आदरणीयमिति पूर्वपक्षः सकलसाधनावबोधित्वेन निखिलवस्तुसाक्षात्का
रसमर्थपशुपतिप्रणीतत्वात् राद्धान्तस्तु अनादिनिधनाविच्छिन्नपाठसंप्रदायनिरस्तप्रमादादिनिखिलदोषगंधवेदसिद्धपर
परत्वव्यत्ययप्रतिपादनात् वेदासामंजस्यात् निमित्तोपादानभेदाभिधानात् सुराकुंभस्थापनं तत्स्थदेवपूजा मुद्रिकाबन्ध
कविज्ञानतद्धारणविरुद्धाचारप्रतिपादनात् चासामंजस्यात् अनादरणीयमिति सूत्रार्थस्तु पत्युरसामंजस्यात् ॥ नैकस्मि
न्नसंभवादित्यतोऽनेनानुवर्तते न पत्युः पशुपतेर्मतं नादरणीयं कुतः वेदविरुद्धतत्त्वाचाराववोधित्वेनासामंजस्यात् अधिष्ठाना राम
नुपपत्तेश्च अनुमेयेश्वराभ्युपगमेन हि प्रधानस्याधिष्ठानमीश्वरस्योच्यते सशरीरस्यैव कुलालादेरधिष्ठानदर्शनात् अशरीर ३६

नात्र नैकस्मिन्नसंभवात् जैनमतं युक्तिमदुतनेति संशयः युक्तिमदिति पूर्वपक्षः जीवाजीवशब्दाभिलपनीयभोक्तृभोग्यात्मकं जगत
सत्वासत्वनित्यत्वानित्यत्वाभिन्नत्वैरनैकांतिकं षड्द्रव्यस्य तत्तत्पर्यायात्मनावस्थितत्वात् कृत्स्नस्य जगतो द्रव्यात्मना सत्वैकत्व
नित्यत्वान्युपपन्नानि पर्यायात्मना च विपरीतानि पर्यायाश्च घटत्वपटाद्यवस्थाविशिष्टा द्रव्यविशेषाः द्रव्यस्वरूपस्यैकत्वात् स्थि
रत्वात्सद्बुद्धिबोध्यत्वात्तेन रूपेण एकत्वादि युक्तं पर्यायशब्दाभिधेयावस्थाविशिष्टानामनेकत्वादस्थिरत्वादसद्बुद्धिबोध्यत्वात्ते
न रूपेणासत्वानित्यत्वनानात्वानि युक्तानि प्रतीतिव्यवस्थाप्यत्वात्सर्वस्य वस्तुनः उभयाकारप्रतीतेः उभयमुपपन्नम् सिद्धान्त
स्तु एकस्य द्रव्यस्यास्तित्वनास्तित्वादिभिरनैकांतिकत्वमयुक्तम् एकस्मिन् वस्तुन्यस्तित्वादेर्विरुद्धस्य छायातपवत् युगपद
संभवात् तथाहि द्रव्यस्य तद्विशेषणभूतपर्यायशब्दाभिधेयावस्थाविशेषस्य चेदमित्थमिति प्रतीतेः प्रकारिप्रकारत
या पृथक्पदार्थत्वात् नैकस्मिन् विरुद्धप्रकारभूतसत्वासत्वस्वरूपधर्मसमावेशो युगपत्संभवति उत्पत्तिविनाशा
ख्यपरिणामविशेषास्पदत्वं च द्रव्यस्यानित्यत्वं तद्विपरीतं च नित्यत्वं तदेकस्मिन् कथं समवैतीति विरोधिधर्माश्रयत्वं च भिन्न
त्वं तद्विपरीतं चाभिन्नत्वं कथं वा तस्मिन्समवैति तदेकस्मिन्समवैति यथा ह्यश्वत्वमहिषत्वयोर्युगपदेकस्मिन्नसंभवः एकस्य
पृथिवीद्रव्यस्य घटत्वाश्रयत्वं शरावाश्रयत्वं च प्रदेशभेदेन न त्वेकेन प्रदेशेनोभयाश्रयत्वं यथा एकस्यैव तस्योत्पत्तिविनाश
योगपत्वं कालभेदेन न त्वेतावता ह्यात्मकत्वमपि तु परिणामघटितयोग्यमात्रं अतो न युक्तिमज्जैनमतम् सूत्रार्थस्तु नैकस्मि

वे०दी०
४०

त्पत्तिश्रूयते विज्ञानादिभावे वा तत्प्रतिषेधः वाशब्दात्मनो विपरिवर्तित्वे विज्ञानं च तदादिश्च विज्ञानादिः संकर्षणादीनां (
ब्रह्मभावे सत्युत्पद्यमानो बहुधा विजायत इति श्रुतिसिद्धस्येच्छावतारस्यैवात्राभिधानात् तत्प्रतिषेधः प्रामाण्यप्रतिषेधः
प्रामाण्यप्रतिषेधः संकर्षणादीनां जीवादिसामानाधिकरण्यनिर्देशस्तेषामधिष्ठातृतयोपपद्यते विप्रतिषेधाच्च असि
न्नपि तन्त्रे जीवोत्पत्तिविप्रतिषेधाच्चाविरुद्धमिदं तन्त्रं आविष्टरूपेण सर्वं धत्ते साक्षात्पुरुषस्य वचनसमूहनादिदं तन्त्रं परमार्थेन
निश्चितः इति पुरुषोत्पत्तिः प्रतिषिध्यते इति श्रीभगवद्रामानुजाचार्यविरचिते वेदान्तदीपे द्वितीयस्याध्यायस्य द्वितीयः
39 पादः २ न वियदश्रुतेः वियदुत्पद्यते नेति संशयः नोत्पद्यते इति पूर्वपक्षः निरवयवस्य सर्वगतस्य तस्यात्मन इवोत्पत्त्यसंभ
वात् असंभावनीयस्य श्रवणं च न संभवति अतस्तदुत्पत्तिश्रुतिर्गौणीति राद्धान्तस्तु वियदुत्पद्यत एवोत्पत्तिश्रुतेः अती
न्द्रियार्थविषयायाः श्रुतेरभिहितेऽर्थे निरवयवत्वादिना सूत्रार्थस्तु वियन्नोत्पद्यते कुतः अश्रुतेः हेतुकं नानुत्पत्त्यनुमान
मुदेतुमलमात्मनोऽप्यनुत्पत्तिश्रुतेरेवं नित्यत्वं न निरवयवत्वादिना सूत्रार्थस्तु वियन्नोत्पद्यते कुतः अश्रुतेः श्रुतिश्रवण
मसंभावनीयस्य श्रवणाभावात् अस्ति तु अस्ति तु वियदुत्पत्तिः आत्मन आकाशः संभूत इति श्रुतेः अतीन्द्रियार्थविषयायाः श्रु
त्याप्रमाणान्तराऽप्रतिपन्नवियदुत्पत्तिप्रतिपादनं संभवत्येव नात्मनि नास्ति चेदितिवत् अयोग्यमिति भावः गौण्यसंभवाच्छब्दा
च्च न तेजोऽसृजतेति प्रतिपन्नस्तेजःप्राथम्यविरोधान्मुख्ये वियदुत्पत्तिर्न संभवतीत्युत्पत्तिश्रुतिर्गौणी वायुश्चान्तरिक्षं चैत राम ४०

स्यप्रधानाधिष्ठानानुपपत्तेश्चासमंजसं सशरीरत्वाभ्युपगमेपि तच्छरीरस्य सावयवस्यानित्यत्वे, नित्यत्वे च दोषः पूर्वोक्त इत्यभिप्रायः करण
त्वेन भोगादिषुः देवेन तस्य स्वकरणकलेवराधिष्ठानं वदुपपद्यते इति चेन्न पुण्यापुण्यरूपकर्मनिमित्तत्वात् देहाद्यधिष्ठानस्येश्व
रस्यापि तद्वत्तया तत्फलभोगादिनिखिलतत्स्वभावप्रसक्तेः अंततत्वमसर्वज्ञतानावा व्याघातश्चार्थतयापुण्यापुण्यवत्त्वे तत्र च स्वस्य सृष्टि
संहारादयस्य दक्षमसर्वज्ञत्वमन्यप्रसज्यते इत्यसमंजसमेवेदम् उत्पत्त्यसंभवात् सांख्यादिवत्पंचरात्रतंत्रमप्यप्रमाणमनुत्पन्नेनेति संशयः तत्र प्रमाणमि
ति पूर्वपक्षः वासुदेवात्संकर्षणो नाम जीवो जायते इति श्रुतिविरुद्धं जीवोत्पत्त्यादिप्रतिपादनात् चतुर्षु वेदेषु पुरुषार्थमलभमानः
त्रिवेदानादरश्रवणाच्च राद्धान्तस्तु संकर्षणप्रद्युम्नानिरुद्धानां परब्रह्मभावानामजायमानो बहुधा विजायते इति श्रुतिसिद्ध
छावतारप्रतिपादनात् न कश्चिच्छ्रुतिविरोधः जीवाहंकारशब्दाश्च तत्तच्छरीरकारणां संकर्षणादीनामेवाभिधायकाः न तेजोऽ
हत इति तेजः प्रभृतिशब्दवत् चतुर्षु वेदेषु पुरुषार्थमलभमान इति चानुदिनहोमनिंदावत् अग्नेर्वै अगवोध्येमीत्यादि
स्प चतुर्षु वेदेषु इतिहासपुराणमित्यादिना सर्वेषु विद्यास्थानेषु ज्ञातत्वे दनाभाववचनं च वक्ष्यमाणप्रसंशार्थं तत्र स्मि
न्वेदान्तोदितब्रह्मोपासनविधानात् वेदविरुद्धत्वदर्शनाज्ञविधानाच्चाऽवगम्यते इति प्रमाणमेव सूत्रार्थस्तु न जायते नित्य
त्वे इत्यादिश्रुतेर्जीवस्योत्पत्त्यसंभवात् जीवोत्पत्तिवचनान्न प्रमाणम् न च कर्तुः करणम् संकर्षणात्प्रद्युम्नसंज्ञमन उत्पद्यते इ
ति मनसः करणस्य कर्तुर्जीवात् उत्पत्तिः श्रुतिविरुद्धत्वान्न संभवति एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति मनसो ब्रह्मण उ

तत्तथा ह्याहेति वायोस्तेजस उत्पत्तिं वक्तुं प्रत्युपादानं असंभवस्तु सतोऽनुपपत्तेः नञ्शब्दोऽवधारणार्थः सतः परमकारण
वे॰ दी॰ ८२ स्य परस्यैव ब्रह्मण उत्पत्त्यसंभवः न त्वितरस्य कृत्स्नस्य एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुपपत्तेः संभवः उत्पत्तिरित्यभि
प्रायः तेजोऽतस्तथा ह्याह आकाशाद्वायुरित्यादिषु वह्नित्वकार्यत्वेन किं स्वानन्तरादाकाशादेः केवलादुत्पद्यते उत तच्छ
रीरात् परस्माद्ब्रह्मण इति संशयः स्वानन्तरादेवेति पूर्वपक्षः आकाशाद्वायुर्वायोरग्निरिति तस्मात्केवलादेवोत्पत्ति।
40 श्रवणात् एतस्माज्जायते प्राण इति परस्माद्ब्रह्मणः सर्वस्योत्पत्तिवादः परंपरयाप्युपपद्यते राद्धान्तस्तु तत्तेज ऐक्षत बहु
स्यां प्रजायेयेति ता आप ऐक्षन्त इति बहुभवनसंकल्पपूर्वकसृष्ट्युपदेशात् केवलस्य तादृशसंकल्पानुपपत्तेः यस्तेजसि।
तिष्ठन् यस्य तेजः शरीरं यस्याकाशः शरीरमिति सर्वेषां परब्रह्मशरीरत्वश्रवणाच्च तत्तच्छरीरकात् परस्माद्ब्र
ह्मण एव साक्षात्तेजःप्रभृतीनामपि सृष्टिः सूत्रार्थस्तु अतो वायोरेव केवलादुत्पद्यते तेजः तथा ह्याह वायोरग्नि।
रिति आपः अतस्तथा ह्याहेति वर्तते अतस्तेजस एव केवलादाप उत्पद्यन्ते तदपोऽसृजतेति ह्याह पृथिवी॰ एवं पृ
थिवी अद्भ्य उत्पद्यते॰ ता अन्नमसृजन्त इति ह्याह अन्नशब्देन कथं पृथिवी अभिधीयते इत्यत्राह अधिकाररूपश
ब्दान्तरेभ्यः अन्नशब्देन पृथिव्येवोच्यते महाभूतसृष्ट्यधिकारात् अन्यत्रापि महाभूतरूपकीर्तने यत्कृष्णं तदन्नस्येति रूपकीर्तना राम ८२
त्समानप्रकरणे अद्भ्यः पृथिवीति पृथिवीशब्दस्य श्रवणाच्च॰ तदभिध्यानादेव तु तल्लिङ्गात्सः तु शब्दः पक्षव्यावृत्त्यर्थः न तेजः

स्यतमित्यत्र तत्वप्रवणोऽर्थ स्यात्पृकस्य ब्रह्मण एव तत् आत्मन आकाशः संभूतः आकाशाद्वायुः वायोरग्निरित्यादिषु सर्वत्रानु
षक्तस्यैकसंभूतशब्दस्य आकाशो गौणो वा पादिषु मुख्यत्वेन च संभवति ब्रह्मण्येव तत् यथा एकस्य ब्रह्मशब्दस्य एकप्रकरणे श्रू
यमाणस्य तस्मादेतद्ब्रह्म नामरूपमन्नं च जायते इति प्रधाने गौणत्वं तपसा चीयते ब्रह्मेति ब्रह्मणि मुख्यत्वं च स्त्र वत्ता। तत्राविवा
तुषंगे प्यभिधानावृत्तेरनुसंयोगोपि तत्तुल्य इत्यभिप्रायः परिहरति प्रतिज्ञाहानिरव्यतिरेकात् येनाश्रुतं श्रुतमिति ब्रह्मज्ञानेना
काशादिसर्वविज्ञानप्रतिज्ञाया अहानिः आकाशस्यापि ब्रह्मणोऽव्यतिरेकादेव भवति शब्देभ्यः इदमग्र सदेव सोम्येदमग्र
आसीदैतदात्म्यमिदं सर्वमित्यादिभ्यो ब्रह्मणः प्राक्सृष्टेरेवैकत्वावधारणात् सर्वोत्पत्तिवादिभ्यः शब्देभ्यश्च वियदुत्पत्तिः प्रतीयते
तत्तेजोऽसृजतेत्यस्मिन्वाक्ये आकाशोत्पत्त्यवचनात् प्रतीयमानेऽतेजः प्राथम्य समानप्रकरणस्थैः प्रकरणान्तरस्थैश्च शब्दैः प्र
तीयमानामाकाशोत्पत्तिं निवारयतीत्यभिप्रायः यावद्विकारन्तु विभागो लोकवत् यद्यपि छांदोग्ये तत्तेजोऽसृजतेति वियदाकाशो
त्पत्तिः स्वरूपेणाभिधीयते तथापि तस्मिन्नेव वाक्ये तदात्म्यमिदं सर्वमित्याकाशादेः सर्वस्य वस्तुनो ब्रह्मविकारत्ववचनात् यावद्वि
कारं विभागउत्पत्तिरुक्तैवेति गम्यते लोकवत् यथा लोके सर्वे एते देवदत्तपुत्रा इत्यभिधाय तेषु केषांचिदेव देवदत्तादुत्पत्तिवचनं स
र्वेषां तदुत्पत्तिप्रदर्शनार्थं इति गम्यते आकाशस्यापि तद्वचनं देवदत्तादिवत् कालस्यापि तद्विषयमित्यभिप्रायः एतेन
मातरिश्वा व्याख्यातः अनेनैव न्यायेन मातरिश्वनोऽप्युत्पत्तिरुक्ता नापेक्ष्या पातितदेष्टुः अधिकाशंकाभावात् तत्तेजो

वे०टी०
५२
४1

श्रपः तदुपदेशस्तु छान्दोग्ये श्वेतकेतुमारुणिमुख्य एवं कृतस्तद्भावभाविताद् तेजः प्रभृति प्राणस्तदात्मभावभावितेन ते
जोवन्नादिशब्दानां वाचकभावस्थानेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति प्रस्तावात् कस्येव तेजः प्रभृति
रूपवत्त्वनामभावं च तस्येति तस्यैव वाचकाः तत्तात्म्यमात्मभावभावितेन सर्वस्य वस्तुनस्तच्छरीरतया तत्प्रकार
त्वात् तच्छब्दानां शब्दानां तत्तद्वस्तुविशेष्यपर्यवसानात् प्रकारवाचिनां हि शब्दानां प्रकारिणि पर्यवसायित्वेनाभ्यासेनाभ्यवादि
शरीरेषु सिद्धम्। नामरूपे निमित्तवाक्यताम्भः किमात्मोत्पद्यते नेति संशयः उत्पद्यत इति पूर्वपक्षः एकविज्ञानेन सर्ववि
ज्ञानप्रतिज्ञानादेः सोऽयं नजीवान् विससर्ज भूम्यां प्रजापतिः प्रजाः सृजते सादि सृष्टिवचनाच्चानित्यत्वादिश्रुतिः आकाशा
दिवत्तत्त्ववचनवैलक्षण्या शङ्कन्तु नात्मोत्पद्यतेऽनुपपत्तेः न जायते म्रियते वा विपश्चिदिति जीवोत्पत्तिः प्रति
षिध्यते अजो नित्यः नित्यो नित्यानाम् इत्यादिश्रुतिभ्यो नित्यतावगमात् जीवोत्पत्तिवदतेऽग्मकः नाम्यागमकत्वविप्र
णाशप्रसंगात् वैषम्यनैर्घृण्यप्रसंगाच्च जीवस्य सृष्टिवचनं भोक्तृत्वानुगुणस्थानप्रकाशाभिप्रायं स्वरूपः प्रागविभा
गवचनं नामरूपविभागवचनेनामरूपविभागाभावादुपपद्यत एवं सूत्रमपि व्याख्यातम् सोऽत एव किं जीवः चैत
न्यमात्रवपुः उतज्ञः स्वरूप एवागन्तुकचैतन्यगुणः उतज्ञातृत्वैकस्वरूप इति संशयः चैतन्यमात्रवपुरिति प्रथमपक्षः॥ राम ५२
विज्ञानं यज्ञं तनुते विज्ञानेति ज्ञानस्वरूपम् अनन्तं निर्मलमित्यादिश्रुतिभ्यः द्वितीयस्तु सुषुप्तिमूर्च्छादिषु सतोऽप्यात्म

स्मृति

प्रश्नतयः केवलाः स्वानंतराणां कार्याणां कारणानि इत्यपि तु तत्तच्छरीरः परमात्मैव कुतः परमात्मनः सृष्टिलिंगात्तथाविधा
भिधानात् यथैव हि तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजतेति तथा तत्तेज ऐक्षत बहु स्यां प्रजायेयेति बहुभवनसं
कल्परूपाभिधानं ईक्षणपते ईक्षणाभिधानं परमात्मन एव हि संभवति विपर्ययेण तु क्रमोऽत उपपद्यते च आकाशा
द्वायुर्वायोरग्निरिति पारंपर्यक्रमान्न विपर्ययेण तस्माज्जायते प्राणो मनः सर्वेंद्रियाणि सर्वेषां भूतानां तत्त्वरूपो यः क्रमः
स्वात एव तच्छरीराद्ब्रह्मणः सृष्टिरूपपद्यते अंतरा विज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात् विज्ञानसाधन
त्वेन इन्द्रियाणि प्राणश्च विज्ञानमित्युच्यंते एतस्माज्जायते प्राण इत्येतद्वाक्यमाकाशतन्मात्रपंचकयोरंतराले विज्ञान
मनसी क्रमेणोत्पद्येते इत्येतत्परं विज्ञानमनसी इति प्राणस्यापि प्रदर्शनार्थं यदि अप्सु प्रलीयते इत्यारभ्य वायुराकाशे प्रली
यते आकाश इन्द्रियेषु इन्द्रियाणि तन्मात्रेषु तन्मात्राणि भूतादाविति प्रलयक्रमप्रत्यभिज्ञानात् तल्लिंगादतो न भूतानंतरवि
रुद्धं साक्षाद्ब्रह्मणः सर्वेषां सृष्टिपरमिदं वाक्यमपि तु भूतान्तराविरुद्धपारंपर्यक्रमपरमिति चेन्न विरोधः इति न ह्यविशे
षात् भूततन्मात्रांतराले विज्ञानमनसोरुत्पत्तावपि तत्तच्छरीरकब्रह्माभिधायित्वात् भूतेन्द्रियमनःप्राणशब्दानां
सर्वेषां साक्षाद्ब्रह्मसविशेषात्तत्परमेवेदं वाक्यं लोके तु वस्तुवाचितया प्रसिद्धस्य शब्दजातस्य ब्रह्मणि वृत्तिरमुख्येत्याशं
क्याह चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् तुशब्दः शंकानिवृत्यर्थः स्थावरजंगमवस्तुवा

वे॰टी॰
८३

त्मेति हि म एव स्मात्मा प्रस्तुतः स्वशब्दोन्मानाभ्यां च एषोऽणुरात्मा यस्मिन् प्राणः पंचधा संविवेशेति साक्षादणुशब्दादुन्मानाच्चा
णुरेव उन्मानं उद्धमानं आराग्रमात्रो ह्यवरोपीत्याराग्रमुद्धृत्य तन्मानत्वं हि जीवस्य श्रूयते आत्मनोऽणुत्वे सति एकदेशस्थस्य सकलदेह
व्यापि वेदनाद्यनुभवः कथमित्यत्र मतांतरेण परिहारमाह अविरोधश्चंदनवत् यथा हरिचंदनबिंदुर्देहैकदेशव्याप्यपि सकलदे
हवर्तिनमाह्लादं जनयति तद्वदविरोधः अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि चंदनबिंदोर्देहैकदेशवि
शेषस्थितत्वे प्रत्यक्षतः प्रमाणभावः आत्मनस्तु न तथेति चेन्न आत्मनोऽपि तथाभावाभ्युपगमात् हृदि ह्येष आत्मा स्थित इति
42
श्रूयते योऽयं विज्ञानमयः प्राणेषु हृद्यंतर्ज्योतिरित्यादौ गुणाद्वा लोकवत् वाशब्दो मतांतरव्यावृत्त्यर्थः आत्मा स्वगुणेन
ज्ञानेन सकलदेहं व्याप्यावस्थितः यथा द्युमणिमणिप्रभृतीनामेकदेशवर्तिनामालोकस्तद्गुणोऽनेकदेशव्यापी दृश्यते
विज्ञानमयशब्देन तु तेन स्वरूपेण ज्ञानमेवात्मेति व्यपदिश्यते न स्वरूपं तत्राह व्यतिरेको गंधवत्तथा च दर्शयति ज्ञानमात्मा
त्मगुणत्वेन प्रतीति व्यतिरेकोऽभ्युपगमनीयः यथा गंधवतीं पृथिवीमनुपलभ्यापि गंधस्तद्गुणस्तस्य व्यतिरिक्तः दर्शयति च श्रु
तिः जानात्येवायं पुरुषः इति पृथगुपदेशात् न केवलं जानामीति पृथगुपलब्धिमात्रं आत्मनः पृथक्त्वेनोपदिश्यते ज्ञा
नेन हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते इति विज्ञानमात्मेति व्यपदेशः कथमुपपद्यते तदुक्तमाह तद्गुणसारत्वात्तु तद्व्यपदेशः प्रा
ज्ञवत् ज्ञानगुणसारत्वादात्मनो ज्ञानमिति व्यपदेशः यथा प्राज्ञः ब्रह्मणो विपश्चितो वा सर्वज्ञः सर्ववित् इति सर्वज्ञत्व एव ज्ञानगु

राम
८३

नचैतस्यानुपलब्धेर्जागतो वीन्द्रियव्यापाराच्च व्यतिरेकानुविधायित्वाच्चैतन्यस्य न प्रेत्यसंज्ञास्तीति मुक्तस्य चैतन्यप्रतिषे
धाच्च पाषाणकल्प एवागंतुकश्चैतन्यगुणः सर्वत्र कार्योपलब्धेः सर्वत्र संनिधानात् शरीरगमनेनैव कार्यसंभवे गतिक(
ल्पनायोगात्सर्वगतश्चेति राद्धांतस्तु अथ यो वेदेदं जिघ्राणीति स आत्मा मनसैतान्कामान्पश्यन् रमते न पश्यो मृत्युं
पश्यति सर्वं ह पश्यः पश्यति द्रष्टा श्रोता घ्राता रसयितेत्यादिश्रुतिभ्यो बद्धमुक्तोभयावस्थयोर्ज्ञानैवात्मा ज्ञानमात्रव्यपदेशस्तु
ज्ञानस्य प्रधानगुणत्वात्स्वरूपानुबंधित्वेन स्वरूपनिरूपकगुणत्वात् ज्ञानवत्स्वयंप्रकाशत्वाद्वाऽऽत्मन उपपद्यते सुषुप्ति
मूर्छादौ सदेव ज्ञानं कर्मणा संकुचितमनभिव्यक्तमपि जागरादौ विकासितमभिव्यज्यत इति न विरोधः न प्रेत्यसंज्ञास्ती
ति सांसारिकभेदप्रसरणविषयं तोयप्रज्ञानं स्मरन्निदं शरीरमित्यादिनैकार्थ्यात् सर्वगतत्वं चाणुत्वगत्यादिश्रुतेर्विरुद्धम
स्तत्रार्थस्तु स एव अतः श्रुतेर्नैव । उत्क्रान्तिगत्यागतीनां श्रुतेरिति निवर्तते तेन प्रद्योतेनैष आत्मा निष्क्रामति ये वै के(
चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंति पुनरेतस्माल्लोकाय कर्मणे इत्याद्युत्क्रांतिगत्यागतीनां श्रुतेरणुर्जीवः स्वात्मना(
चोत्तरयोः चशब्दोऽवधारणार्थः उपपद्युक्तांतोऽस्य तस्य शरीरविश्लेषणं कर्तुं वित्तं सम्पादयति उत्तरयोर्गत्यागमनयोः स्वा
त्मनैव संबंधात्पदत्मवश्यमणुत्वं नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् योयं विज्ञानमयः प्राणेष्विति जीवं प्रकृत्य स वा एष महा
नज आत्मेति महत्वश्रुतेर्नाणुर्जीव इति चेन्नेतराधिकारात् जीवेतरपरमात्माधिकारात् यस्यानुवित्तः प्रतिबुद्ध आ

३३ नापि नानवस्था कर्ता शास्त्रार्थवत्त्वात् आत्मनो ज्ञातृत्ववत् कर्तृत्वमपि अस्ति नेति संशयः प्रधानस्यैव कर्तृत्वादात्म
नो न कर्तृत्वमस्तीति पूर्वपक्षः अहंकारविमूढात्मा कर्ताहमिति मन्यते नान्यं गुणेभ्यः कर्तारं इत्यादि गुणानामेव कर्तृत्व
वे॰टी॰ ५५ वचनात् राद्धान्तस्तु स्वर्गापवर्गसाधनानुष्ठानविधानशास्त्राणामर्थवत्त्वाय कर्त्रैवात्मा बोद्धुरेव हि शासनं नाचेतनस्य
प्रधानस्य यजेत उपासीतेति कर्तरि लकारः अतः कर्तारमेव बोधयति शास्त्रं सूत्रमपि व्याख्यातम् उपादानाद्विहारोपदे
शाच्च उपादानादुपदिश्यमानात् विहारोपदेशाच्च उपदिश्यते स्वोपादानं विहारश्च एवमेवैष एतान् प्राणान् गृहीत्वा स्वे शरी
रे यथाकामं परिवर्तते इत्युपादानविहारयोः कर्तृत्वोपदेशाच्च कर्ता व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः विज्ञानं यज्ञं
43 तनुते कर्माणि तनुतेऽपि चेति यज्ञादिकर्मस्वात्मनः कर्तृत्वव्यपदेशाच्च कर्ता विज्ञानशब्देन नात्मनो व्यपदेशः अपि तु अन्तःक
रणस्य बुद्धेरेवेति चेन्न यासति विज्ञानेनेति करणविभक्तिनिर्देशः स्यात् उपलब्धिवदनियमः प्रधानस्य कर्तृत्वेनाऽना
त्मनो भोक्तृत्वमेवेति पक्षे पूर्वोक्तोपलब्ध्यनियमवैवं भवेत् प्रधानस्य सर्वसाधारणत्वाद्भोक्तृत्वाऽनियमः अन्तःकरणभेदे
ऽपि सर्वेषामात्मनां सर्वगतत्वेन साधारणमनिवार्य्यं शक्तिविपर्य्ययात् बुद्धेः कर्तृत्वे कर्तुरन्यस्य भोक्तृत्वायोगात् भोक्तृत्वश
क्तिविपर्य्ययो हानिरित्यर्थः समाध्यभावाच्च प्रकृतेः कर्तृत्वे मोक्षसाधनभूतसमाध्यभावश्च स्यात् प्रकृतेरन्योऽस्मीति समाधौ राम ५५
प्रकृतेः कर्तृत्वायोगात् यथा च तक्षोभयथा आत्मनः कर्तृत्वे हि भोगवाञ्छायां करोति अन्यथा न करोतीत्युभयप्रकारत्व

णसारत्वात्सत्वं ज्ञानमितिव्यपदिश्यते यावदात्मभावित्वाज्ज्ञ न दोषस्तद्दर्शनात् ज्ञानस्य यावदात्मस्वरूपभावित्वाच्चेतनेतर
व्यपदेशान दोषः स्वेदादिषु न यावदर्शनात् यावत्स्वरूपभाविधर्मत्वेन गोत्वस्यागोरित्येवव्यपदेशो दृश्यते च कारात् आत्म
नोपि स्वप्रकाशत्वेन ज्ञानमितिव्यपदेशोन दोष इत्युच्यते सुषुप्त्यादिषु ज्ञानस्यानुपलब्धेर्न यावदात्मभावित्वमित्याशंक्या
ह पुंस्त्वादिवत्तस्य सत्तोऽभिव्यक्तियोगात् तु शब्दः शंकायामर्थः सुषुप्त्यादिष्वपि सतो ज्ञानस्यानभिव्यक्तस्य जागरादिष्व
भिव्यक्तिसंभवाद्यावदात्मभाव्येव ज्ञानं पुंस्त्वादिवत् पुंस्त्वमिति पुंस्त्वाऽसाधारणधातुरुच्यते यथा सप्तधातुमयत्वेन शरी
रस्य बाल्येपि सतोऽनभिव्यक्तस्य सप्तमधातोर्यौवनेऽभिव्यक्तिः एवमात्मनो ज्ञानत्वमणुत्वं चोक्तापत्त्यान्तरे दोषमाह नित्योप
लब्ध्यनुपलब्धिप्रसंगोऽन्यतरनियमो वान्यथा अन्यथा ज्ञानात्मवादे सर्वगतात्मवादे च उपलब्ध्यनुपलब्धी नित्यं स्यातां प्रसज्येयातां उपलब्ध्य
नुपलब्ध्योरन्यतरनियमो वा ज्ञानात्मवादे तावत् ज्ञानस्य स्वप्रकाशस्वभावत्वात् प्रकाशपर्यायोपलब्धेर्नित्यत्वप्रसक्तिः र
निवार्यत्वात्तेन विद्यमाने सति हेत्वन्तरेणानुपलब्धिजनकतायोगात् ज्ञानमेवानुपलब्धेरपि हेतुरित्यास्थेयं तत्ता तस्य सर्वदा
वर्तमानत्वात्सर्वदोभयप्रसक्तिः अयुगपद्विरुद्धकार्यजननायोगात् ज्ञानं [illegible] नुपलब्धेरपि हेतुरित्या[illegible] अन्यतर हेतु
रास्थीयते तदान्यतरनियमः स्यात्सर्वगतत्वपक्षे ज्ञानात्मवादिनस्तथैव हेतुर्जन्यज्ञानवादिनोपि सर्वेषामात्मनां सर्वगत
त्वे सर्वस्यात्मनः संयोगादेर्हेतोः सर्वेषां उपकारित्वात्तथैव प्रसक्तिः अदृष्टस्यापि हेतोरपि सर्वसाधारणत्वादसाधारणत्वाद॰

तिसामानाधिकरण्यंस्य मुख्यत्वात् शरीरशरीरिणो विशेषणविशेष्यभूतयोः स्वरूपस्वभावभेदेन च भेदश्रुतेश्च मुख्यत्वात्
वे०टी० ४५ विशिष्टवस्त्वेकदेशतया च विशेषणस्य परमात्मांशः जीवः नानाव्यपदेशात् भेदव्यपदेशादन्यथा च भेदव्यपदेशाच्चेत्युक्त
रीत्योभयमुख्यत्वापेत्यभिप्रायः ब्रह्मदासा ब्रह्म ब्रह्मदाशा इत्यादि दासकितवादित्वमप्यधीयत एके शाखिनः सर्वज्ञो
वव्याधित्वादभेदोपदेशस्य तत्रात्यादरः प्रतीयत इत्यर्थः मंत्रवर्णात् मंत्रवर्णोक्त्वांशएव जीवः पादोस्य विश्वाभूतानि
त्रिपादशब्दोंशवाची अपि स्मर्यते ममैवांशो जीवलोके जीवभूतः सनातनः इति जीवस्य परमात्मांशत्वं स्मर्यते च ए
44 कदेश्ये केदेशत्वेप्यंशत्वेऽतो जीवस्य ब्रह्मैकदेशत्वेन जीवदोषा ब्रह्मदोषा एवेत्याशंक्याह प्रकाशादिवन्नैवं परः तुश
ब्दः शंकानिवृत्यर्थः प्रकाशवतां मणिद्युमणीनां विशिष्टानां विशेषणाभूतः प्रकाशो यथांशः तद्वज्जीवशरीरित्तयाजी
वविशिष्टस्य ब्रह्मणोंशो जीवः विशिष्टवस्त्वेकदेशतया विशेषणस्य विशेषणं विशिष्टांशः आदि शब्दात् द्रव्यविशेषण
त्वैकस्वभावजातिगुणशरीराणि गृह्यन्ते विशेषणविशेष्ययोः स्वरूपस्वभावभेदात् विशेषणभूतो जीवो यस्य स्वरूपोय
स्वभावश्च नैवं परः सर्वज्ञः सत्यसंकल्पो निरवद्य इत्यर्थः स्मरंति च प्रकाशादिवज्जीवस्यांशत्वं पराशरादयः स्मरंति
एकदेशस्थितस्याग्नेर्ज्योत्स्ना विस्तारिणी यथा परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत् तथापरं प्रतिशरीरं च यत्किंचित् राम ४५
सृज्यते येन सत्वजातेन वैद्वितनस्य सत्यस्य संभूतेन सर्वं विहरेत्सनः इति ब्रह्मांशत्वेन तत्वेन च सर्वेषामात्मनांसम

स्योपपद्यते यथा तक्षा स्वकार्ये इच्छापाद्यवस्थितः बुद्धेः कर्तृत्वेन तस्मात् इच्छा प्रागभावाद्यवस्थानासिध्यतीत्यभिप्रायः परात्तु त
च्छ्रुतेः कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः जीवस्य कर्तृत्वं किं परमात्मायत्तं उत स्वायत्तं इति संशयः स्वायत्तमि
ति पूर्वपक्षः विधिनिषेधशास्त्रानर्थक्यप्रसंगात् यः स्वबुद्ध्यैव प्रवृत्तिनिवृत्तिसक्तः स एव हि नियोज्यो निग्रहानुग्रहास्पदं च भव
ति राद्धांतस्तु अंतः प्रविष्टः शास्ता जनानां सर्वात्मा आत्मानमंतरो यमयति इत्यादिश्रुतेः परमात्मायत्तमेव कर्तृत्वं न च जीवेन
स्वबुद्ध्या कृतं प्रयत्नमपेक्ष्य तदनुमतिदानेन तत्तद्विधिनिषेधावैयर्थ्यमत एव निग्रहानुग्रहास्पदं च जीव इति सूत्रद्वयस्यापि
व्याख्यानम् अंशो नानाव्यपदेशादन्यथा चापि दासकितवादित्वमधीयत एके किं जीवः परमात्मनोऽत्यंतं भिन्नः उत परमा
त्मैवाज्ञः उत परमात्मैवोपाधिसंबंधः परमात्मांशो वेति संशयः अत्यंतभिन्नः प्रथमः पक्षः पृथगात्मानं प्रेरितारं च मत्वा तयो
रन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति अनीशश्चात्मा बध्यते भोक्तृभावात् सर्वस्य वशी सर्वस्येशानः इत्यादिभेदश्रु
तेः जीवपरमात्मनोः कर्मपरतंत्रतातद्विपरीतत्वश्रुतेश्च अभेदश्रुतयो नरपतिरेव सर्वलोक इतिवदौपचारिकाः इति
भेदश्रुतीनां अविद्याविषयतया उपाधिसंबंधविषयतया वानुरूपवृत्तिसंभवात् अभेदश्रुतिमुख्यत्वादज्ञः पर
मात्मा उपाधिसंबंधो वा जीव इति युक्तं राद्धांतस्तु जनानां नानात्वव्यपदेशात् परमात्मनः सत्यसंकल्पत्वसर्वज्ञत्वनि
रवद्यत्वश्रुतेरज्ञत्वोपाधिसंबंधाद्यनुपपत्तेर्जीवशब्दस्य जीवशरीरकपरमात्मवाचित्वेन तत्त्वमस्ययमात्मा ब्रह्मे

वे॰दी
४६

त्यृषयो वाव तेऽग्रेऽसदासीत् प्राणा वा ऋषय इतीन्द्रियाणां तदानीं स्थितिः श्रूयते । राद्धान्तस्तु प्राक्सृष्टेरेकत्वावधारणादिन्द्रि
याणामेतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्युत्पत्तिश्रुतेरुत्पत्तिनिषेधनित्यत्ववचनाभावाच्च वियदादिवदुत्पद्यन्ते ।
प्राणा वा ऋषय इति प्राणशब्दनिर्दिष्टः परमात्माभिधीयते सूत्रार्थः तथा प्राणाः यथा जीवा नोत्पद्यन्ते तथैवेन्द्रियाण्यपि
गौण्यसंभवात् तत्प्राक्श्रुतेश्च चस्त्वर्थः तुशब्दान्वदो व्यावृत्तः इन्द्रियाण्युत्पद्यन्त एव कुतः तत्प्राक्श्रुतेः तस्य परमात्मन एव प्रा
गवस्थानश्रुतेः सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीत् एको ह वै नारायण आसीदिति प्राणशब्दस्य ।
45
प्राणमभिसंविशन्तीति परमात्मन्यपि प्रसिद्धेः कश्चित्त्विह बहुत्वं तत्तु तमेव संभवति वक्तृत्वासंभवाद्बहुवचनश्रुतिर्गौणी ।
णां प्रागवस्थानाऽसंभवात् तत्पूर्वकत्वाद्वाचः इतश्च वाचः परमात्मव्यतिरिक्तनामधेयस्य तत्पूर्वकत्वात् तद्वस्तु
सृष्टिपूर्वकत्वात् नेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यामित्यादिश्रुतेः परमात्मैव तदा प्राणशब्दनिर्दिष्टः सप्त गतेः ।
विशेषितत्वाच्च किमिन्द्रियाणि सप्तैव उत एकादशेति संशयः सप्तैवेति पूर्वपक्षः सप्त प्राणाः प्रभवन्तीत्यादिषु सप्तानामेव
जीवेनु सह संचारश्रवणात् यदा पंचावतिष्ठन्ते ज्ञानानि मनसा सह बुद्धिश्चेति सप्तानामेव योगकाले ज्ञानानीति विशेषित राम
त्वाच्च श्रोत्रादीनि ज्ञानेन्द्रियाणि मनो बुद्धिश्चेति सप्तैव राद्धान्तस्तु श्रोत्रादीनि ज्ञानेन्द्रियाणि वागादीनि च कर्मेन्द्रिया ४६
णि मन इत्येकादश वागादीनामपि श्रोत्रादिवत् कार्यभेदेन जीवोपकरणत्वाविशेषात् दशेमे पुरुषे प्राणा आत्मै

त्वादेर्दाध्ययनादौ केषांचिदनुज्ञा केषांचित्परिहारश्च कथमुपपद्यते तत्राह अनुज्ञापरिहारौ देहसंबंधात् ज्योतिरादिवत् ब्राह्म
णादिशुच्यशुचिदेहसंबंधादनुज्ञापरिहारावुपपद्येते यथा ज्योतिषोग्नेरन्नस्य च शुच्यशुचिदेहसंबंधादनुज्ञापरिहारौ तद्व
असंततेश्चाव्यतिकरः जीवात्मनः प्रतिशरीरं भिन्नत्वेनाणुत्वेन तत्र तत्रावच्छिन्नत्वाच्च भोगाव्यतिकरः अज्ञब्रह्मजीववादे उपाधि
संबंधिब्रह्मजीववादे वाऽनन्तत्वात् संबंधि संबंध्युपाधि च ब्रह्मैवेति भोगव्यवस्था न सिध्यतीत्यभिप्रायः आभासा एव च अज्ञब्र
ह्मजीववादेपि सर्वज्ञस्य ब्रह्मणोऽज्ञानकल्पना स्वरूपतिरोधानकल्पना हेतवः आभासा एव चकारान्निर्विषयत्वादिश्रु
तिविरोधश्च पारमार्थिकोपाधिसंबंधिब्रह्मजीववादे अनादिप्रवाहेनोपाधिप्रवाहानादित्वात् तत्संबंधिनिये दोषा
नते ब्रह्मणि प्रसज्यंते इत्यत आह अदृष्टानियमात् अदृष्टेस्तत्कृतोपाधिभिन्नब्रह्मणोऽच्छेदासंभवात् तत्कृतादेर्बाधा ब्रह्म
णि भवेयुः अभिसंध्यादिष्वपि चैवम् अदृष्टहेतुभूताभिसंध्यादिष्वप्युपाधिब्रह्मव्यतिरिक्तवस्त्वंतराभावात् पूर्वोप
धिपुरुषब्रह्मैवेति न कश्चिद्विशेषः प्रदेशभेदादिति चेन्नांतर्भावात् उपाधिब्रह्मप्रदेशसांशादनुपहितब्रह्मप्रदेशोऽभि
धीयते नो व्यवस्थेति चेन्न उपाधिषु गच्छत्सु पूर्वमनुपहितब्रह्मप्रदेशस्यांतर्भावात् इति श्रीभगवद्रामानुजविरचिते वे
दांतदीपे द्वितीयस्याध्यायस्य तृतीयः पादः ॥३॥ तथा प्राणाः किं जीववदिंद्रियाण्यपि नोत्पद्यंते उत वियदादिवदुत्पद्यंते इ
ति संशयः नोत्पद्यंत इति पूर्वपक्षः प्रलयकालेवस्थानश्रुतेः उत्पत्तिवादा जीवोत्पत्तिवादवन्नेयाः असद्वा इदमग्र आसी

वे० दी०
४८

निर्देशः प्राणाधीनवृत्तित्वेन तथा च श्रुतिः एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायन्त इति रूपमभवन् तदधीन
वृत्तयोऽभवन्नित्यर्थः सूत्रार्थः श्रेष्ठादन्यत्र ये प्राणास्त इन्द्रियाणि तेऽश्रेष्ठवत्तद्व्यपदेशादिन्द्रियव्यपदेशात् भेदश्रुतेर्वैलक्षण्याच्च ए
तस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति मनस इन्द्रियेभ्यो भेदेन प्राणस्य ख्यातिश्रुतेः इन्द्रियेषूपरतेष्वपि प्राणवृत्तेर्दर्शनेन प्राण
वृत्तिवैलक्षण्याच्च संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् किं प्रपंच व्यष्टिसृष्टिर्जीवभूताच्चतुर्मुखात् उत तच्छरीरकात्
परमात्मन एवेति संशयः केवलात् चतुर्मुखादिति पूर्वपक्षः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति व्यतिरे
47 कश्रुतेः जीवस्य परमात्मांशेन व्याकरवाणीत्युत्तमपुरुषनिर्देशोपि कथंचिदुपपद्यते राद्धान्तस्तु नामरूपे व्याकरवाणि तासां
त्रिवृतं त्रिवृतमेकैकं करवाणीति त्रिवृत्करणं कुर्वत एव नामरूपव्याक्रियोपदेशात् परमात्मन एव नामरूपव्याकरणरूपव्य(
ष्टिसृष्टिः त्रिवृत्करणं तु न चतुर्मुखेन कर्तुं शक्यं अण्डस्य पुरस्तात्कालभावित्वाच्चतुर्मुखोत्पत्तेः त्रिवृत्कृतैरेव तेजोबन्नैरण्डसृष्टि
संभवात् तदण्डमभवद्धैमं तस्मिन् जज्ञे स्वयं ब्रह्मेति हि स्मर्यते नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना नाशक्नुवन् प्रजाः स्र
ष्टुमसमागम्य कृत्स्नशः समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः महदाद्या विशेषान्ता ह्यण्डमुत्पादयन्तीति ते अतश्चतुर्मुखश(राम
रीरकात्परमात्मन एव व्यष्टिसृष्टिः एवं सति व्याकरवाणीत्युत्तमपुरुषनिर्देशः समंजसः अनेन जीवेनेति व्यतिरेकनिर्देशोपि(४८
जीवशरीरकेणात्मनेत्यन्वयात्समंजसः जीवशब्दस्तेजःप्रभृतिशब्दवज्जीवशब्दः शरीरकब्रह्मवाचीति ह्युक्तं जीवेना(

कादश इन्द्रियाणि दशैकं च इत्यादिश्रुतिस्मृतिभ्यश्च वागादीनां जीवेन सह गमनाभावात् सप्तानामेव गतिश्रवणं योगकाले वि
शेषणं च ज्ञानेन्द्रियाणां मनसस्तद्वृत्तिरूपबुद्धेश्च प्रधानात् सूत्रार्थः सप्तानामेव गतिश्रवणात् ज्ञानानि पंच मनो बुद्धिश्चेति
विशेषितत्वाच्च तानि सप्तैव हस्तादयस्तु स्थितेऽतो नैवम् नैवं न सप्तैवेन्द्रियाणीत्यर्थः श्रोत्रादीनि ज्ञानेन्द्रियाणि पंच हस्तादीनि
च कर्मेन्द्रियाणि पंच मन इत्येकादश तत्र श्रोत्रादीनि जीवेन सह शरीरान्तरगमनेऽपि गच्छति वाग्घस्तादीनि कर्मेन्द्रियाणि तु
स्थिते शरीरे नैवं सह गच्छति विनाशयोगीन्युपकारीणि अतो नैवमित्यन्वयः जीवे देहान्तरावस्थिते एषां भोगोपकारकत्वावि
शेषात् दशेमे ते प्राणा आत्मैकादश इत्यादिवचनाच्चेत्यभिप्रायः आत्मशब्दो मनोवाची इतोऽधिकव्यपदेशो मनोवृत्तिभेद
विषयः अणवश्च इन्द्रियाणि किं सर्वगतान्युत अणुपरिमाणानीति संशयः सर्वगतानीति पूर्वपक्षः त एते सर्व एव समाः
सर्वेऽनन्ता इति प्राणानामानन्त्यश्रवणात् राद्धान्तस्तु प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति प्राणानामुत्क्रान्तिश्रवणा
त्परिमितत्वसम्भवे सत्त्वादणवः आनन्त्यश्रुतिस्तु अथ यो हैतानन्तानुपास्ते इत्युपासनविधानात् उपासनफल
बाहुल्यविषयाः श्रेष्ठश्च श्रेष्ठः प्राण उत्पद्यते नावेत्यातिदेशः अधिकाशंकाऽभावात् उपयोगकरणं उत्तरवाचित्वा
र्थः श्रेष्ठः पंचवृत्तिः प्राणः श्रेष्ठश्चेत्यनु प्राणसंवादे तस्य श्रेष्ठत्वाभिधानात् न वायुक्रिये पृथगुपदेशात् किमयं श्रेष्ठः प्राणो
वायुमात्रमुत तत्क्रिया अथवा वायुरेव कंचन विशेषमापन्न इति संशयः वायुमात्र -मिति प्रथमः पक्षः यः प्राणः स वायुरि

निर्देशः प्राणाधीनवृत्तित्वेन तत्पात्वश्रुतिः तत एतस्यैव सर्वे रूपमभवन् तस्मादेत एतेनाख्यायंत इति रूपमभवन् तदधीन
वे०दी० वृत्तयोऽभवन् इत्यर्थः सूत्रार्थः श्रेष्ठादन्यत्र ये प्राणास्ते इन्द्रियाणि तेषु तद्व्यपदेशात् इन्द्रियव्यपदेशात् भेदश्रुतेर्वैलक्षण्याच्च ए
५८ तस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेति मनस इन्द्रियेभ्यो भेदेन प्राणस्योत्पत्तिश्रुतेः इन्द्रियेषूपरतेष्वपि प्राणवृत्तेर्दर्शनेन प्राण
वृत्तिवैलक्षण्याच्च संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् किं प्रपंचव्यष्टिसृष्टिर्जीवभूताच्चतुर्मुखात् उत तच्छरीरकात्
परमात्मन एवेति संशयः केवलात् चतुर्मुखादिति पूर्वपक्षः अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति व्यतिरे
47 कश्रुतेः जीवस्य परमात्मांशेन व्याकरवाणीत्युत्तमपुरुषनिर्देशोऽपि कथंचिदुपपद्यते राज्ञां तन्नामरूपे व्याकरवाणीतिवत् तासां
त्रिवृतं त्रिवृतमेकैकं करवाणीति त्रिवृत्करणं कुर्वत एव नामरूपव्याक्रियोपदेशात् परमात्मन एव नामरूपव्याकरणं रूपव्य।
ष्टिसृष्टिः त्रिवृत्करणं तु न चतुर्मुखेन कर्तुं शक्यं अंडसृष्ट्युत्तरकालभावित्वाच्चतुर्मुखोत्पत्तेः त्रिवृत्कृतैरेव तेजोबन्नैरंडसृष्टि
संभवात् तदंडमभवद्धैमं तस्मिन् जज्ञे स्वयं ब्रह्मेति हि स्मर्यते नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना नाशक्नुवन् प्रजाः स्र
ष्टुमसमागम्य कृत्स्नशः समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः महदाद्या विशेषांता ह्यंडमुत्पादयंतीति अतश्चतुर्मुखश। राम
रीरकात् परमात्मन एव व्यष्टिः सृष्टिः एवं सति व्याकरवाणीत्युत्तमपुरुषनिर्देशस्य सामंजस्यं अनेन जीवेनेति व्यतिरेकनिर्देशोऽपि। ५८
जीवशरीरकेणात्मनेत्यन्वयात् समंजसः जीवशब्दस्तेजः प्रभृतिशब्दवज्जीवशब्दः शरीरकब्रह्मवाचीत्युक्तं जीवेन।

मतोऽशरीरेन्द्रियशैथिल्याभिधानात्प्राणापानादीनामविभागे एक एव प्राण इत्याह पंचवृत्तिर्मनोवद्व्यपदिश्यते प्राणापानादिवृ
त्तिभेदात्प्राण एव पंचधा व्यपदिश्यते मनोवत् यथैकमेव मनः कामादिवृत्तिभेदेन नैकैः शब्दैरभिधीयते इति श्रुतिराह कामः सं
कल्प इत्यारभ्य ह्रीरित्येतत्सर्वं मन एवेति एवं प्राणापानादिसमानपर्यन्ताननुपदिश्य सर्वं प्राण एवेति व्यपदेशात् प्राणो
व पंचवृत्तिरिति निगम्यते अणुश्च किमयं प्राणः सर्वगतोऽणुरिति संशयः सर्वगत इति पूर्वपक्षः स एभिस्त्रिभिर्लोकैः समः
इत्यादिना प्राणस्यानन्त्यव्यपदेशात् राद्धान्तस्तु तमुत्क्रामन्तं प्राणोऽनूत्क्रामतीत्युत्क्रान्तिवचनादिन्द्रियवत् प्राणोऽप्यणुः एवमणुत्वे
ऽनित्यत्वेन सर्वस्य प्राणायत्तस्थितित्वेन विभववादः सूत्रमपि न व्याख्यातम् ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात् अग्
न्यादीनां जीवस्य चेन्द्रियाधिष्ठानं यस्मात्तापतामितिवरातुत श्रुतेरित्युक्तमेव स्मारयति विषयमाप्तितापनाय प्राणवता
जीवेन सह ज्योतिरादेरग्न्यादेर्वागाद्यधिष्ठानं तदामननात् भवति अभिमननं आभिमुख्येन मननं तत्संकल्पादेव भवतीत्यर्थः यो
ज्योतिष्ठन्नग्निमन्तरं यमयतीत्यादिश्रुतात् तस्य च नित्यत्वात् सर्वेषामात्मनतयानुप्रविश्य सर्वयमनस्यानित्यत्वात्तु परमात्मनो
नी ऽवगमयितव्यादित्यर्थः तस्य तु तत्तद्देवानुप्रावेशादिति श्रुतेः तदिन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् किं प्राणशब्दनिर्दिष्टाः सर्वे
एवेन्द्रियाणि उत श्रेष्ठव्यतिरिक्ताः प्राणा इति संशयः सर्वे एवेति पूर्वपक्षः सर्वेषामविशेषेण प्राणशब्दनिर्देशात्करणत्वाच्च ।
राद्धान्तस्तु श्रेष्ठव्यतिरिक्ताः प्राणा इन्द्रियाणि तेष्वेवेन्द्रियशब्दनिर्देशादिन्द्रियाणि दशैकं चेत्यादौ तेषामपि प्राणशब्द

वे०दी०
४८

त्वादः वैशेष्यं विशेषभावः त्रिवृत्कृतेष्वेकैकस्मिन् तत्र तत्रान्याधिक्यरूपविशेषभावात् तत्त्वादिवादः द्विरुक्तिरध्यायपरिसमा
प्तिद्योतनार्था इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तः ॥ तदन्तरप्रतिप
त्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् देहाद्देहान्तरगमने देहकारणभूतैर्भूतसूक्ष्मैः संपृक्तो गच्छति नेति संशयः न संपृ
क्तो गच्छतीति पूर्वपक्षः देहारंभाय तत्र भूतसूक्ष्माणां सुलभत्वात् राद्धान्तस्तु पंचाग्निविद्यायां वेत्थ यथा पंचम्यामाहुतावा
पः पुरुषवचसो भवन्तीति इति तु पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्नप्रतिवचनाभ्यामद्भिर्भूतान्तरसंसृष्टा
भिः सह जीवस्य गमनं प्रतीयते इति भूतसूक्ष्मैः सह गच्छति सूत्रार्थस्तु तदन्तरप्रतिपत्तौ संज्ञामूर्तिक्लृप्तिरित्यत्र मूर्तिशब्देन दे
हः प्रस्तुतस्तच्छब्देन देहः परामृश्यते तदन्तरप्रतिपत्तौ देहान्तरगमने रंहति संपरिष्वक्तः जीवो भूतसूक्ष्मैः संपरिष्वक्तो गच्छ
ति कुतः प्रश्ननिरूपणाभ्यां वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति पंचम्यामाहुतावापः पुरुषवचसो भवन्तीति
इति प्रश्नप्रतिवचनेन देहारंभिकाणामपां त्रिवृत्करणेन भूतान्तरसंसृष्टानां द्युपर्जन्यपृथिवीपुरुषाग्निषु जीवेन सह प्रवेशः पं
चम्यामाहुतावेवो विदन्ति प्रवेशावेलायां पुरुषशब्दाभिलपनीया भवन्तीति पुरुषाकारतां भजन्त इत्यर्थः ॥ अपां त्रिवृत्करणे राम
न आत्मकत्वादाप इति भूतान्तरसंसृष्टानामपामभिधीयते अपां भूयस्त्वादाधिक्यादप्शब्देनाभिधानम् प्राणगतेश्च ३ ४८

अतो जीवेन सह गमनं प्रतीयते कथमप्शब्देन सर्वेषामभिधानमित्याशंक्याह आत्मकत्वात्तु भूयस्त्वात् तु शब्दः शंकाव्यावृत्यर्थः २

48

त्मनेति सामानाधिकरण्यंच मुख्यं प्रविश्य नामरूपे व्याकरवाणीति समानकर्तृकत्वनिर्देशान्मुख्यः सूत्रार्थः तु शब्दः पक्षव्यावृत्त्य
र्थः नामरूपक्लृप्तिः परमात्मन एव कुतः त्रिवृत्करणं कुर्वत एव नामरूपव्याकरणोपदेशात् त्रिवृत्करणं तु परमात्मन एव कर्म ।
युक्तं अन्नमशितं त्रेधा विधीयते इत्यादिना चतुर्मुखस्थूलस्तु त्रिवृत्करणप्रकारो ह्युपदिश्यते अतश्चतुर्मुखेन केवलेन
तत्कथं कर्तुमित्याशंक्याह मांसादि भौमं यथाशब्दमितरयोश्च तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति निर्दिष्टं त्रिवृत्करणं ।
अन्नमशितं त्रेधा विधीयते इत्यादिनोपदिश्यते तु अन्नमशितं त्रेधेति प्रक्रमात् अन्नमयं हि सोम्य मनः इति वाक्यशेषाच्च
तेजोबलानां त्रिवृत्करणप्रकारे ह्युपदिश्यमाने मांसमनसोः पुरीषाद्भागादणुत्वेनाणीयस्त्वेनाप्यत्वं तैजसत्वं प्रसज्यते तथे
तरयोरपि पर्यायपोरापः पीतास्तेजोऽशितमिति पर्यायेणापां तां त्रेधा पाणां भागानां पर्यायप्रसङ्ग मन्ववने जस्त्वमेवोपदिश्य
ते तत्रापि त्वापः पीतास्तेजोऽशितमिति हि प्रक्रमः पुरीषमांसमनांसि पृथिवीविकाराः मूत्रलोहितप्राणा अब्विकाराः अस्थि
मज्जावाचस्तेजोविकारा इति प्रतिपत्तव्यं वाक्यशेषेऽपि आपोमयः प्राणः तेजोमयी वागिति प्रागुक्तं त्रिवृत्करणप्रकारेऽपि
त्रयाणामयोः स्थविष्ठत्वाणीयस्त्वाभ्यां भौमत्वतैजसत्वप्रसक्तिः तेजोऽशितमित्यत्रापि पूर्ववत् भौमत्वाप्यत्वासक्तिः अतोऽत्र प्रागेव त्रि
वृत्कृतस्यान्नादेः तस्यैव त्रेधा परिणामः उपदिश्यते तेन स्थूलः स्वविशेषभाजः तत्पुरीषं मध्यमयोः मध्यमस्तन्मांसं योऽणिष्ठस्तन्मनः ।
न इति मांसाद्यपि भौममेवोपदिश्यते प्रागेव त्रिवृत्कृतं चेत्कथं केवलान्नादिशब्दैः सूच्यन्त इत्यत आह वैशेष्यात्तु तद्वादस्त

जीवानां द्युलोकाधिगमनवत्पुनरावृत्तिप्रकारश्रुतौ ते रायः इति तत्संयुक्तो जीव एवोच्यते आकाशाच्चंद्रमसमेष सोमराजा तं देवा भक्ष
यंतीति धूमादिना गतस्य देवैर्भक्ष्यमाणत्वश्रवणात् जीवस्यानन्दनीयत्वाज्जीवसंयोग इत्याशंक्याह भाक्तं वानात्मवित्वात्तथा
हि दर्शयति वाशब्दः शंकाव्यावृत्त्यर्थः तं देवा भक्षयंतीति भक्षणवचनं भाक्तं केवलेष्टादिकारिणां अनात्मवित्वाद्देवोपकरणत्वा
भिप्रायं अनात्मविदः केवलेष्टादिदेवपाशिनो हि देवान् प्राप्य तदुपकरणं भवंति तथा हि दर्शयति श्रुतिः यथा पशुरेवं स देवानामिति
अतो भक्तस्तैः संपरिष्वक्तो जीवो रंहति कृतात्ययेनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च धूमादिना गत्वा निवर्तमानो जीवः सानु
शयो निवर्तते उत नेति संशयः नेति पूर्वपक्षः अनुशयो हि भुक्तशिष्टं कर्म यावत्संपातमुषित्वा प्राप्यांतं कर्मण इत्यादिश्रुतिस्मृ
तिभ्यः कृत्स्नस्य कर्मणोनुभूतत्वप्रतीतेर्नानुशयवान्निवर्तते राद्धांतस्तु रमणीयचरणा ब्राह्मणादियोनिं कपूयचरणाः कुत्सित
कर्मणः श्वसूकरादियोनिं प्रतिपद्यंत इति श्रुतेः प्राप्यांतं कर्मण इत्यादिश्रुतिः फलदानप्रवृत्तकर्मविषयेति सानुशयो निव
र्तते सूत्रार्थः कृतात्यये कृतस्य पुण्यकर्मणोत्ययेनुशयवान् भुक्तशिष्टकर्मवान् निवर्तते कुतः दृष्टस्मृतिभ्यां श्रुतिस्मृ
तिभ्यां अवगम्यते तद्य इह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् इति श्रुतिः ततः परिवृत्तौ कर्मफलशेषेण
जातिरूपामित्यादिका स्मृतिः यथेतमनेवं च आरोहणक्रमेण प्रकारान्तरेण च निवर्तते चंद्रमसः स्थानादाकाशमित्यारोहण राम ५०
क्रमेणावरोहणे वायुधूमादिना प्रकारान्तरेण च चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः रमणीयचरणा इति रमणी

वे०टी० ५०

43

तत्र भूतसूक्ष्मैः संयुक्तो याति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्तीति प्राणानामिन्द्रियाणां जीवेन सह
गमनश्रुतेः इन्द्रियाणां देहाश्रयत्वेन देहोऽपि सूक्ष्मरूपेण गच्छतीति गम्यते स्मर्यते च मनःषष्ठानीन्द्रियाणि प्रकृतिस्थानीत्या
दिना न च निराश्रयाणां गतिः संभवतीति तदाश्रयाणां भूतसूक्ष्माणां गतिरभ्युपगन्तव्या। अग्न्यादिगतिश्रुतेरिति चेन्न भा
क्तत्वात् अस्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमिति मरणवेलायां वागादीनामग्न्यादिष्वपगमश्रुतेर्जीवे
न सहगमनश्रुतिरसंभवनीयेति चेन्न भाक्तत्वात् तत्र वागादिशब्दानां वागाद्यभिमानिदेवतासु हि तत्र वागादयः शब्दाः ओष
धीर्लोमानि वनस्पतीन् केशा इत्यत्र भिन्नयोर्लोमादिभिः सह पाठात् प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः प्रथमे द्युलो
काग्निहोत्रे अपामश्रवणादपां तत्र संसृष्टा गच्छन्तीति वक्तुं न शक्यते तत्र हि तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति
श्रद्धैव होम्यत्वेन श्रूयते इति चेन्न ता आप एव हि श्रद्धाशब्देनोच्यन्ते प्रतिवचनस्य प्रश्नानुगुण्योपपत्तेः वेत्थ यथा पञ्चम्यामाहु
तावापः पुरुषवचसो भवन्तीति अपां पुरुषवचस्त्वप्रकारे पृष्टे सत्येव हि प्रतिवचनम्: अतः श्रद्धाशब्देन ता आप एवोच्यन्ते श्रद्धा
वा आप इति श्रूयते अश्रुतत्वादिति चेन्न इष्टादिकारिणां प्रतीतेः आपः पुरुषवचसो भवन्ति श्रद्धां जुह्वतीति द्युलोकादिषु
पणवगच्छन्तीति श्रूयते न तत्परिष्वक्तो जीवः अतः प्रश्नप्रतिवचनयोर्जीवस्याश्रुतत्वात्तत्संपरिष्वक्तो जीवो गच्छतीति न शक्यं वक्तु
इति चेन्न इष्टादिकारिणां प्रतीतेः उत्तरत्राथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्तीत्यादौ इष्टादिकारिणां

नां चंद्रारोहावरोहौ कुतः तदुक्तिदर्शनात् पापिनां यमसदनगतिदर्शनात् वैवस्वतं संगमनं जनानामित्यादौ स्मरन्ति च सर्वे चैते वश
वे०दी० यान्ति यमस्य भगवन् किलेति पाराशर्यादयः स्मरन्ति च अपि च सप्त सप्तापि रौरवादयो लोकाः पापिनां गन्तव्यत्वेन स्मर्यन्ते ननु स
५१ प्तसु लोकेषु गच्छतां कथं यमसादनप्राप्तिरित्यत आह तत्रापि च तद्व्यापारादविरोधः सप्तस्वपि रौरवादिलोकेषु यमस्यैव व्यापारादेव गम
नात् यमवश्यतायां अविरोधः अतः पापिनामपि यमयातनामनुभूय चंद्रारोहावरोहौ अवर्जनीयौ विद्याकर्मणोरिति तु प्र
कृतत्वात् तुशब्दः पक्षव्यावृत्त्यर्थः न पापकर्मणामर्चिरादिना ब्रह्मगमनं धूमादिना चंद्रगमनं च संभवति तयोर्विद्याक
50 र्मणोः फलत्वात् कथमवगम्यते तत्फलत्वं प्रकृतत्वात् इत्थं प्रकृतत्वात् विद्याकर्मणोर्हि प्रकृतत्वं तत्फलत्वेन गतिद्वयं प्रपद्यते
तद्य इत्थं विदुः ये चेमेऽरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्तीति अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभि
संभवन्तीति च पापिनां विद्यारहितत्वेन ब्रह्मगमनाभावात् पुण्यकर्मरहितत्वेन चंद्रगमनमपि न संभवतीत्यर्थः पंचम्या।
माहुतावापः पुरुषवचसो भवन्तीति पंचम्याहुत्या देहारंभश्रवणात्तस्याश्च चंद्रगमनपूर्वकत्वेन पापिनामपि देहारंभाय चंद्रगम
नमवश्यं भवतीत्याशंक्याह तृतीये तथोपलब्धेः केवलपापकर्मणां तृतीयस्थानं न तृतीये स्थाने देहारंभाय पंचम्याहुत्य
पेक्षास्ति तथोपलब्धेः वेत्थ यथाके नासौ लोको न संपूर्यत इति द्युलोकस्याप्राप्तिकारणप्रश्नस्य प्रतिवचनं अथैतयोः प राम
थोर्न कतरेणचन तानीमानि क्षुद्राण्यसकृदावर्तीनि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्यत। ५१

पाचारस्य स्मृतिविहितस्य ब्राह्मणादिप्राप्तिसाधनत्वस्मरणात्तत्कर्म्मवानवरोहतीति चेन्न चरणश्रुतिः कर्म्मोपलक्षणार्थेति कार्ष्णा
जिनिराचार्यो मन्यते पुण्यस्यैव कर्म्मणः सुखप्राप्तिसाधनत्वात् आनर्थक्यमिति चेन्न तदपेक्षत्वात् स्मृतिविहितस्याचारस्य किंचित्
करत्वेनानर्थक्यं प्रसज्यत इति चेन्न तदपेक्षत्वादाचारापेक्षत्वात् सुखसाधनभूतपुण्यकर्म्मणः संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वक
र्म्मस्विति सर्वं हि पुण्यकर्म्माचारापेक्ष्यमिति कार्ष्णाजिनिमतम् सुकृतदुष्कृते एवेति तु बादरिः तुशब्दः पूर्वमतव्यावर्त्यः रमणीयच
रणाः कपूयचरणा इति चरणशब्देन सुकृतदुष्कृते एव कर्म्मणी प्रतिपाद्येते पुण्यं कर्म्माचरतीति चरतेः कर्म्मणि प्रसिद्धेः न लक्ष
णात्याप्येति बादरिर्मन्यते इदमेव सूत्रकाराभिप्रेतं तुशब्देन पूर्वस्माद्व्यावर्त्तेः सुकृतदुष्कृते एवेति आवर्त्तनानर्थक्यमिति चेन्न तदपे
क्षत्वादिति तु स्वीकृतम् अनिष्टादिकारिणामपि च श्रुतम् विहिताकरणप्रतिषिद्धसेवारताः पापकर्म्मिणोपि धूमादिना चंद्रमसं ग
त्वा निवर्त्तन्ते उत नेति संशयः गत्वैव निवर्त्तन्त इति पूर्वपक्षः ये वै के चास्माल्लोकात्प्रयन्ति चंद्रमसमेव ते सर्वे गच्छन्तीति सर्वेषाम
विशेषेण चंद्रगमनश्रुतेः सिद्धांतस्तु अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसंभवंतीति धूमादिना चंद्रग
मनस्य पुण्यकर्म्मफलत्वश्रवणात् न हिताः पापकर्म्मिणो न गच्छन्तीति ये वै के चेति वचनं सर्वेषां पुण्यकर्म्मिणां चंद्रगमनवि
षयं सूत्रार्थः अनिष्टादिकारिणामपि इष्टापूर्त्तादि कुर्वतां पापिनामपि चंद्रगमनमस्ति ये वै के चेति यतो विशेषेण श्रुत
म् संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् इयांस्तु विशेषः संयमने यमशासने पापफलमनुभूय इतरेषां पापि

यंत इति श्रूयते मेघो भूत्वा प्रवर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा जायंत इति किं व्रीह्यादिशरीरतामापन्ना उतान्यैः क्षेत्र(

वे०दी० ५२ ज्ञैः व्रीह्यादिशरीरैरधिष्ठितान् व्रीह्यादीनाश्लिष्यंतीति संशयः जायंत इति वचनात् व्रीह्यादिशरीरभोक्तारो जायंत एवेति पूर्वपक्षः

राद्धांतस्तु व्रीह्यादिजन्महेतुभूतकर्मविशेषाश्रवणात् व्रीह्यादिसंश्लेषमात्रमेव जायंत इति जन्मवचनं गौपचारिकं व्रीह्या(

दिशरीरभावे हि रमणीयचरणा इति जन्महेतुभूतं पुण्यपापरूपं कर्म श्रूयते सूत्रार्थस्तु अन्याधिष्ठिते अन्यद्देवताधिष्ठिते व्रीह्या

दौ संश्लेषमात्रं कुतः पूर्ववदभिलापात् आकाशादिभाववत् केवलं व्रीह्यादिभावाभिलापात् जन्महेतुकर्मानभिधानादित्य

51 र्थः अशुद्धमिति चेन्न शब्दात् यद्यपि व्रीह्यादिभावेन जायंत इत्यत्र जन्महेतुकर्माश्रुतं तथापि पूर्वं श्रुतमिष्टादिकर्माग्नि

षोमीयादिहिंसागर्भत्वेनाशुद्धं व्रीह्यादिजन्मनोपि हेतुर्भवतीति चेन्न हिंसाभावशब्दात् पूर्वे हि संप्रश्नस्य स्वर्गावाप्तिसाधन

भाववादिशब्दः श्रूयते हि रूपशरीरं चोर्द्ध्वं स्वर्गलोकमेति न वा उत्पत्तिस्त्रिपसेन नारिष्यसीत्यादि रेतःसिग्योगोथ इतश्च

व्रीह्यादिसंश्लेषमात्रं व्रीह्यादिभावानंतरं रेतःसिग्योगः श्रूयते यो यो ह्यन्नमत्ति यो रेतः सिंचति तद्भूय एव भवतीति अत्र

हि पुरुषसंश्लेषमात्रमेव श्रुतं एवं व्रीह्यादिभावेपीत्यभिप्रायः योनेः शरीरम् योनिप्राप्तेः पश्चादेवावरोहतो जीवस्य श

रीरप्राप्तिः तत्रैव सुखदुःखोपभोगात् अतः प्रागाकाशादिष्विव तत्संश्लेषमात्रमित्यभिप्रायः इति श्रीभगवद्रामानुज राम ५२

विरचिते वेदांतदीपे तृतीयस्याध्यायस्य प्रथमः पादः ॥१॥ संध्ये सृष्टिराह हि ० ॥ स्वप्नमधिकृत्य श्रूयते न तत्र रथा

इति तृतीयस्थानस्य द्युलोकाप्राप्तिश्रवणात् तस्य देहारम्भे पञ्चमाहुत्यनपेक्षत्वमुपलभ्यते स्मर्यतेऽपि च लोके च दर्शनाच्च श्रुता
वपि श्रूयते केषांचिद्देहारम्भे पञ्चमाहुत्यनपेक्षत्वं लोके पुण्यकर्मणामपि केषांचित् द्रौपद्यादिनां देहारम्भे पञ्चमाहुत्यनपेक्षत्वं ते
षां खल्वेषां भूतानां त्रीण्येव बीजानि भवन्ति अण्डजं जीवजं उद्भिज्जं चेति स्वेदजोद्भिज्जयोर्देहारम्भे पञ्चमाहुत्यनपेक्षत्वं अण्डजजीव
जं उद्भिज्जमिति त्रयस्य स्वेदजस्य ग्रहणेन विद्यते इत्याशंक्याह तृतीयशब्दावरोधः संशोकजस्य अण्डजजीवजउद्भिज्जमित्यत्र तृतीये
नोद्भिज्जशब्देन संशोकजस्य स्वेदजस्यावरोधः संग्रह इत्यर्थः ततः केवलपापकर्मणां च द्वारोहावरोहौ न संभवतः तत्स्वाभाव्यापत्तिरुप
पत्तेः धूमादिनां चन्द्रमसं प्राप्तस्यावरोहप्रकार आम्नायते यथेतमाकाशमाकाशाद्वायुर्वायुर्भूत्वा धूमो भवति धूमो भूत्वाभ्र
घो भवति मेघो भूत्वा प्रवर्षतीति अत्राकाशादिभावः किं देवमनुष्यादिभाववत् आकाशादिशरीरत्वमुत तत्साम्यापत्तिरिति
संशयः आकाशादिशरीरत्वमिति पूर्वपक्षः अब्भावस्य सोमराजभाववत् तत्र हि तच्छरीरत्वमेवोच्यते राद्धान्तस्तु आका
शादिप्राप्तौ सुखदुःखानुभवासंभवोपपत्तेः नातिचिरेण विशेषात् आकाशवायुधूमाभ्रमेघवर्षप्राप्तौ किं तत्र नातिचिरं तिष्ठ
ति उत नियम इति संशयः अनियम इति पूर्वपक्षः नातिचिरेणेति विशेषवचनाभावात् राद्धान्तस्तु उत्तरत्र व्रीह्यादिभावे अतो
वै खलु दुर्निष्प्रपतरमिति विशिष्य चिरेण गमनवचनं ततः प्राचीनेष्वचिरगमनं द्योतयतीति आकाशादियावद्व्रीह्यादिप्रा
प्तौ नातिचिरं तिष्ठतीति सूत्रमपि व्याख्यातम् अन्याधिष्ठिते पूर्ववदभिलापात् अवरोहे सौनो वा व्रीह्यादिभावेन जा

नाभिव्यज्यत इत्याशंक्याह पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ तु शब्दः शंकानिवृत्त्यर्थः परमपुरुषाभिध्यानादस्यस्वा
वे॰दी॰ भाविकं स्वरूपमनादिकर्मप्रवाहेण कृतापराधेन याति तिरोहितं ततो ह्यस्य बंधविपर्ययौ ततः परमपुरुषसंकल्पादेवास्य बंधवि
५३ पर्ययौ संसारमोक्षौ श्रूयेते को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् एष ह्येवानंदयाति परं ज्योतिरुपसंपद्य स्वेन
रूपेणाभिनिष्पद्यत इत्यादौ तिरोधानप्रकारमाह देहयोगाद्वा सोपि सोपि तिरोधानभावोपि देहयोगाद्भवति वा शब्दो विक
ल्पार्थः व्यवस्थितश्च विकल्पः देवमनुष्यादिदेहाकारेण परिणताचिद्योगात् सृष्टिवेलायां नामरूपविभागानर्हसूक्ष्मदशा
52 पन्नाचिद्योगेन प्रलयकाले सूचकश्च हि श्रुतेराचक्षते च तद्विदः इतश्च स्वाप्नरथादयो न जीवसंकल्पकृताः यतः स्वप्नः शुभा
शुभयोः सूचक इति श्रूयते स्मर्यते च यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन्स्वप्ननिदर्शने यः ॥
स्वप्ने पुरुषं कृष्णं कृष्णदंतं च पश्यति स एनं हंतीत्यादिषु स्वप्नाध्यायविदश्चाचक्षते जीवसंकल्पकृतत्वे हि सूचकत्वं न संभव
ति स्वसंकल्पकृतत्वे हि शुभानामेव सूचकानर्थान्स्रष्टा तानेव पश्यति अतः स्वाप्ना अपि परमपुरुष एव स्रष्टा तदभावो ना
डीषु तच्छ्रुतेरात्मनि च नाड्यः पुरीतद्ब्रह्म च सुषुप्तिस्थानत्वेन श्रूयंते किमेषां विकल्प उत समुच्चय इति संशयः विकल्प इति
पूर्वपक्षः आसु तदा नाडीषु सुप्तो भवति ताभिः प्रत्यवसृप्य पुरीतति शेते सता सोम्य तदा संपन्नो भवतीति त्रयाणां नैरपेक्ष्य राम
प्रतीतेः राद्धांतस्तु प्रासादखट्वापर्यंकवत् कार्यभेदेन समुच्चये संभवति पाक्षिकबाधगर्भविकल्पो न युक्त इति समुच्च ५३

नरथयोगानपंथानो भवंत्यथरथान्रथयोगान्पथः सृजते इत्यारभ्य स्वेशांतान्पुष्करिण्यः स्रवंत्यः सृजते स हि कर्तेति किं स्वा
प्नानामर्थानां स्रष्टा जीव एव उत परमात्मेति संशयः स्वप्नदृशो जीवस्य संनिधानात् स हि कर्तेति स एव हि परामृश्यते जीवस्यापि सत्य
संकल्पत्वं प्रजापतिवाक्योदितमिति स एव स्रष्टेति पूर्वपक्षः राद्धांतस्तु जीवस्य सत्यसंकल्पत्वादिकं स्वाभाविकमपि संसारदशायां
परमपुरुषसंकल्पात्तिरोहितमिति न जीवस्य संकल्पमात्रेण स्रष्टृत्वमुपपद्यते अतः परमपुरुष एव सकलेतरपुरुषानुभवा
विषयांस्तत्तत्पुरुषमात्रानुभाव्यान् तत्तत्कालावसानान् स्वाप्नार्थान् सृजतीति सूत्रार्थस्तु संध्ये स्वप्ने सृज्यमानरथादिसृष्टिः स्वप्नद
शा जीवेन कृता श्रुतिः आह स हि कर्तेति तस्यैव परामर्शादित्यर्थः निर्मातारं चैके पुत्रादयश्च एनमेव जीवं निर्मातारं स्वप्नानाम
र्थानामेके शाखिनोऽधीयते य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण इत्यत्र कामशब्दनिर्दिष्टाः काम्यमानतया पुत्रा
दय एव चशब्दोऽवधारणे अत्र हि सर्वान् कामानिति कामशब्देन प्रकृतान् शतायुषः पुत्रपौत्रान् वृणीष्वेति विभनक्ति मायामात्रं
तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् तुशब्दात्पक्षो निवर्तते न जीवेन सृष्टं स्वाप्नमर्थजातमपि तु परमेश्वरमायामात्रं सकलेतर
पुरुषाननुभवविषयं तदेकानुभाव्यं तत्कालावसानमाश्चर्यभूतमर्थजातमीश्वरः सृजतीत्यर्थः जीवस्य स्वतः सत्यसंकल्पत्वादेः सं
स्तस्य संसारदशायामनभिव्यक्तस्वरूपत्वात् तस्य हि संकल्पमात्रेण स्रष्टृत्वं नोपपद्यते कामं कामं पुरुषो निर्मिमाण इति परमपु
रुषमेव निर्मातारमाह य एषु सुप्तेषु जागर्ति तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चनेति उपक्रमोपसंहारयोः परमपु
रुषासाधारणधर्मप्रतीतेः स हि कर्तेति चैतेनैकार्थ्यात् परमपुरुषमेवाह जीवस्य स्वाभाविकं चेत्सत्यसंकल्पत्वादिकं कथं

वे०दी
५५

53

स्यैव तदंतर्यामिणः परस्य ब्रह्मणोपि जागरादिस्थानप्रयुक्ताः दोषाः संभवंत्वत एवेति संशयः पः प्राप्तमिति हृदय आत्मान्तिति हन्
यश्च त्वृषिक्लिहन् योरेतसिति हन् इत्यादिना जीवस्यैव सर्वावस्थावस्थितिवचनात् छंदोपि पूपश्नाणानादिमत्त्वेनस्फुट
मार्थ एवेति सर्वे दोषाः संभवंतीति पूर्वपक्षः राद्धांतस्तु अपहतपाप्मा विजरः निरवद्यं निरंजनं सत्यकामः सत्यसंकल्पः यः स
र्वज्ञः सर्ववित् यो मामजमनादिं च वेत्ति लोकमहेश्वरं परः पराणां सकलानपहतक्लेशादयः संति परावरेशो ह्येत्यादि श्रुति
स्मृतिभ्यो निरस्तनिखिलदोषगंधतासर्वज्ञसत्यसंकल्पत्वाद्युभयलक्षणस्वरूपतावगतेः परस्य ब्रह्मणः सर्वत्रांतर्यामि
तयावस्थितस्यापि न दोषगंधः संभवति अपि तु सर्वनियमनरूपलीलारस एव सूत्रार्थस्तु परस्य पृथिव्यात्मादिष्वंतर्या
मितयावस्थानतोपि परस्य ब्रह्मणो जीवस्येव तत्र तत्रावस्थितस्यापि दोषा उक्तास्तेन संभवंति उभयलिंगस्य विहितत्वात् यतः सर्व
त्र श्रुतिस्मृतिषु निरस्तनिखिलदोषत्वसमस्तकल्याणगुणात्मकत्वरूपोभयलिंगमुभयलक्षणं परं ब्रह्मावगतम् भेदादि
ति चेन्न प्रत्येकमतद्वचनात् यथा जीवस्य सत्तोपहतपाप्मत्वादियुक्तस्यापि देवादिशरीरसंबंधितयावस्थाभेदादुक्तदोषसंबं
धित्वमेव परस्यापि यस्य पृथिवी शरीरमित्यादिशरीरसंबंधित्वावस्थाभेदात् दोषास्स्युरिति चेन्न प्रत्येकं प्रतिपर्यायमतद्वचनात्
दोषासंबंधित्ववचनात् यस्य पृथिवी शरीरमित्यादिषु एष त आत्मांतर्याम्यमृत इत्यंतर्यामिणो हि निर्दोषत्वमुच्यते जीवस्य तु राम ५५
पराभिध्यानात्तु तिरोहितमित्युक्तं अतः शरीरसंबंधित्वेपि परस्य तेन दोषाः अपि च यदिदं जीववत्परस्यैकस्मिन्शरीरि

अपि चैवमेके

योगमाप्यः तत्र पर्य्यंकस्थानीयं ब्रह्मलयनं पर्य्यंकवत् ब्रह्म साक्षात् सुषुप्तिस्थानम् सूत्रार्थः तदभावः स्वप्नाभावं सुषुप्तिरित्यर्थः सुषु
प्तिर्नाडीष्वात्मनि चकारात् पुरीतति च श्रुतेः त्रयाणां सुषुप्तिस्थानत्वश्रुतेः उक्तेन न्यायेन तत्समुच्चयो ज्ञाप्यः इत्यभिप्रायः अतः
प्रबोधोऽस्मात् अस्माद् ब्रह्मणः प्रबोधश्रुतिः अत एव बोधयन्ते सत आगम्य न विदुः सत आगच्छामहे इति श्रूयते स एव कर्म्मानुस्मृति
शब्दविधिभ्यः किं सुषुप्त एव प्रबोधकाले उत्तिष्ठति उतान्य इति संशयः सुषुप्तस्य सर्वोपाधिविनिर्मुक्तस्य ब्रह्मणि संपन्नत्वेन मुक्ताद
विलक्षणत्वेन प्राचीनकर्म्मसंबंधाभावात् अन्य इति पूर्वपक्षः सुषुप्तस्य जागरब्धकर्म्मसमापनात् ब्रह्मज्ञानाभावेन पूर्व
कृतस्य कर्म्मणः तेनैव भोक्तव्यत्वात् सोहमिति प्रत्यभिज्ञानात् ते इह व्याघ्रो वा सिंहो वेत्यारभ्य यद्यद्भवंति तदा भवंति इति श्रु
त्यां मोक्षसाधनविधानर्थक्याच्च स एवेति सूत्रीतिराद्धांतः न चासौ शरीरेन्द्रियसंबंधविनिर्मुक्तः किंतु कलेवरप्रवर्तनाभा
सादाभ्यासनाय ब्रह्मणि संपन्नः पुनराभ्यस्तः प्रवर्तनायोत्तिष्ठतीति सूत्रमपि व्याख्यातम् मुग्धेर्द्धसंपत्तिः परिशेषात् किं मूर्छा
मरणादर्थान्तरं उत मरणमेवेति संशयः सर्वेन्द्रियप्राणव्यापारोपरमेऽन्मरणमेवेति पूर्वपक्षः आकारवैरूप्येण सूक्ष्मप्राणास्ति
त्वावगतेर्मरणायार्द्धसंपत्तिरिति राद्धान्तः सूत्रार्थः मुग्धे मूर्छिते पुरुषे यावस्था सा मूर्छा मरणायार्द्धसंपत्तिः कुतः परिशेषात् जाग
दिसर्वव्यापारोपरतेः न जाग्रदाद्यवस्था न च गतप्राणता एकाकारवैलक्षण्येन सूक्ष्मप्राणास्तित्वावगतेः मूर्छितस्यैव कस्यचित्
पुनर्जीवनदर्शनाच्च न मरणमिति पारिशेष्यान्मरणार्द्धसंपत्तिरित्यवगम्यते न स्थानतोपि परस्योभयलिंगं सर्वत्र हि॰ जीव

सूर्याकाशादिवत् यतोऽस्य ततोनिरस्तनिखिलदोषता कल्याणगुणाकरत्वेन उभयलिंगत्वात् पृथिव्यादिस्थानतोऽपि न तत्तत्प्रयु
वे०दी० क्तदोषगंधसंभवः अत एव शास्त्रेषु च जलसूर्यादिवदित्युपमा क्रियते आकाशमेकं हि यथा घटादिषु पृथग्भवेत् तथात्मैको
५५ ह्यनेकस्थो जलाधारेष्विवांशुमानित्यादिषु अंबुवदग्रहणात्तु न तथात्वं यथाम्बुनि सूर्यो दूरस्थो न यत्र संयुतो वा ग्रहणात् न तथात्मा अंबुनि
सूर्यो गृह्यते तत्रानवस्थित एवाम्भसि तत्रस्थ इव न तथा परमात्मा पृथिव्यादौ एतावन्मात्रमिति उभयसामंजस्यात् एवमुभयदो
षगंधाभावात् परमात्मनः परमार्थतः स्थितत्वात् परिहरति वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामंजस्यादेवं दर्शनाच्च पृथिव्यादि
54 षु विषमेषु स्थानेषु स्थितस्यापि परमात्मनस्तदन्तर्भावात् तत्रावस्थानं तत्तत्प्रयुक्तवृद्धिह्रासभाक्त्वं जलाधारेष्विवांशुमानिति दृष्टां
तेन निवर्त्यते कुतोऽवगम्यते यः पृथिव्यां तिष्ठन् पृथिव्या अन्तर इति परमार्थतः स्थितोऽवगम्यते अतो न तथात्वं न सूर्यस
वत् तत्प्रयुक्त उभयदृष्टान्तोपादानसामंजस्यादवगम्यते आकाशमेकं हि यथेति घटकरकादिषु विषमेष्ववस्थितम् आका
शं जलाधारेष्विवांशुमानिति चांशुमन्तं परमार्थतः स्थितमनवस्थितं चोभयदृष्टान्ततयोपादाय तथात्मैको ह्यनेकस्थ इति
निगमनात् न तत्स्थानप्रयुक्तवृद्धिह्रासभाक्त्वनिवर्तनमात्रं विवक्षितमिति अवगम्यते अन्यत्रापि दृष्टान्तदार्ष्टान्तिकयोः राम
सर्वसाम्याभावेऽपि सिंह इव माणवक इत्यादिषु दृष्टान्तोपादानदर्शनाच्चैवमवगम्यते अथात आदेशो नेति नेतीत्यादि ५५
ना पूर्वप्रकृतसमूर्तामूर्तप्रपंचस्य ब्रह्मणो रूपत्वप्रतिषेधात् निष्प्रपंचसन्मात्रमेव ब्रह्म न पुनरुक्तस्वरूपमुभयलिंग

त्वेनावस्थितयोर्दीपसंबंधित्वं तद्विपरीतत्वमुक्तम् एवमेके शाखिनः स्वशब्देनाधीयते द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिष
स्वजाते तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति इति मनुष्यादिशरीरेषु शरीरित्वमेव जीवस्य नामरूपभाक्त्वेन कर्मव
श्यताहेतुः तत्परस्यापि अविशिष्टं चेत्कथं परस्य ब्रह्मणोऽकर्मवश्यत्वेन कर्मफलानशनमुच्यते इत्यत आह अरूपवदेव हि
तत्प्रधानत्वात् मनुष्यादिशरीरेषु शरीरित्वेऽप्यरूपवदेव हि तत्परं ब्रह्म कुतः प्रधानत्वात् निर्वाहकत्वात् जीवस्य नामरूपभाक्त्वेन
कर्मफलाशने निर्वोढृ परस्य तत्तच्छरीरेषु शरीरित्वेनावस्थानं यथाह यस्य पृथिवी शरीरं यस्यात्मा शरीरं आत्मानमन्तरो यम
यतीत्यन्तः प्रविष्टः शास्ता जनानां सर्वात्मा आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरेति अत उभयलिंगमेव हि परं ब्रह्म
सत्यं ज्ञानमनंतं ब्रह्मेति प्रकाशैकस्वरूपता ब्रह्मण उच्यते कथमुभयलिंगत्वमित्याशंक्याह प्रकाशवद्वैयर्थ्यात् यथा सत्यं
ज्ञानमिति वाक्यावैयर्थ्यात् प्रकाशो ब्रह्मणः स्वरूपमित्यवगम्यते तथा यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते इत्यादि
वाक्यावैयर्थ्यात् कल्याणगुणाकरत्वं च ब्रह्मणः स्वरूपमित्यवगम्यते इत्युभयलिंगमेव आह च तन्मात्रम् सत्यं ज्ञानमिति वाक्यं
ब्रह्मणो ज्ञानरूपमित्येतावन्मात्रं आह न पुनः गुणाकरत्वं निषेधति दर्शयति चाथोऽपि स्मर्यते दर्शयति च वेदान्तवाक्यगणो
निरस्तनिखिलदोषतां कल्याणगुणाकरत्वं च निष्कलं निष्क्रियं शान्तं निरवद्यं निरंजनं तमीश्वराणां परमं महेश्वरं तं दैवतानां
परमं च दैवतमित्यादिकं स्मर्यते च अनेकरूपस्य जगतः प्रभवः प्रलयस्तथा मत्तः परतरं नान्यदित्यादिषु अत एव चोपमा

वे॰ टी॰ ५६ रंयुक्तभजनं उपासनमिति यावत् उपासनरूपश्रीएनेनविनाकेनापिनोपलभ्यते इतिश्रुतिस्मृतिभ्यामवगम्यते नायमात्माप्र
वचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यः नाहं वेदैर्न तपसा न दानेन न चेज्यया भक्त्या त्वनन्यया श
क्य अहमिति श्रुतिस्मृती अतः केनापि प्रमाणेनानभिव्यक्तरूपस्य ब्रह्मणो द्वेवावरूपे इत्यादिना ब्रह्मणः प्रकारतयोपादिष्टं
जगदैश्वर्यं नेतीति न निषिध्यते किंतु प्रकृतेयत्तामात्रं निषिध्यते प्रकाशादिवज्ज्ञानवैशेष्यं प्रकाशस्य कर्मण्यभ्यासात् १
तस्य ज्ञानानंदवत् जगदैश्वर्यमपि ब्रह्मणो रूपं तेषां वामदेवादीनां समाराधनरूपकर्मण्यभ्यासात् प्रकाशस्य संजातः द
र्शने संजातं तेषां दर्शने प्रकाशादिवत् ज्ञानादेरिव जगदैश्वर्यस्याप्यवैशेष्यं प्रतीयते तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपे
55 देऽहं मनुरभवं सूर्यश्चेत्यादौ अतोऽनंतेन तथाहि लिंगम् अतोऽनंतेन कल्याणगुणेन योगो ब्रह्मणः सिद्धः तथा समुभ
यलिंगमेव ब्रह्म उभयव्यपदेशात्त्वहिकुंडलवत् द्वावा ब्रह्मणो रूपे इत्यादिनोपदिष्टमचिद्वस्तु नो ब्रह्मरूपत्वं किं ब्रह्म स्वरू
पस्यैवाचिद्रूपेण परिणामात् भवति उत परस्मिन् ब्रह्मण्यचिद्वस्तुनि चैकजातियोगात् अथ जीववत् ब्रह्मशरीरतया ब्रह्म
विशेषणत्वेनेति संशयः भिन्नाभिन्नत्वरूपोभयव्यपदेशावर्तनमेव ब्रह्मैवाचिद्रूपेण परिणमत इति प्रथमः पक्षः तथा सति राम
ब्रह्मणो निर्दोषताबाधो नेति एकजातियोगेनेति द्वितीयपक्षः एवं सत्यात्मैवेदं सर्वं ब्रह्मैवेदं सर्वमिति ब्रह्मस्वरूपस्यैवस ५६
र्वशब्दवाच्यत्वव्यपदेशबाधः स्यात् न ह्येकैव गोव्यक्तिः खंडो गौर्मुंडो गौरित्यादि सर्वगोव्यक्तिवाचिशब्दैरभिधीयते अतो

मित्याशंक्याह प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः द्वे इति द्वे वाव ब्रह्मणो रूपे मूर्तं चामूर्तमेव चेत्यादिना स्थूलस्य सूक्ष्म
स्य च प्रपंचस्य ब्रह्मणो रूपतया प्रमाणान्तराप्राप्तस्यात्रैव रूपतयोपदिष्टस्य निषेधासंभवात् प्रकृतैतावत्त्वं हि ब्रह्मणः प्रतिषेधति
प्रकृतैतावन्मात्रं न भवति ब्रह्मेति ह्यथात आदेशो नेति नेतीत्यत्र प्रतिपाद्यत इत्यर्थः ततो ब्रवीति च भूयः ततः पूर्वोक्ताद्रूपद्वयं ब्रवीति
न वाक्यशेषः न ह्येतस्मादिति नेत्यन्यत्परमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमिति तन्निर्दिष्टादेत
स्माद्ब्रह्मणोऽन्यत्परमस्तीत्यपरं ब्रह्मणोऽन्यत्स्वरूपतो गुणैश्चोत्कृष्टः नास्तीत्यर्थः सत्यस्य सत्यमिति ब्रह्मणो नामधेयं तस्य निर्व
चनं प्राणा वै सत्यं तेषामेष सत्यमिति प्राणसाहचर्यात् जीवात्मनः प्राणाः तेऽपि वियदादिवदनुत्पाद्यत्वेन सत्याः तेभ्योऽप्येष सत्य
त्वं ते हि कर्मानुगुणदेहयोगेन जन्मवन्तः न तथास्यनास्तीति तेषामेष सत्यं ज्ञानसंकोचविकाशरूपविकारस्याप्यभावात् अतः
प्रमाणान्तराज्ञातस्वरूपस्य ब्रह्मणो मूर्तामूर्तप्रपंचप्रकारतयोपदेशात् उभयलिंगमेव पुनरपि प्रकारविशेषोपदेशाच्च ।
अथात आदेशो नेति नेतीति पूर्वप्रकृतेयत्ता ब्रह्मणः प्रतिषिध्यत इत्यर्थः ननु च प्रत्यक्षेण निर्विशेषसन्मात्रमेव गृह्यते तद
तिरिक्तं सर्वं भ्रान्त्या प्रतीयमानं सविशेषं अनूद्य नेति नेतीति निषिध्यत इत्यत्राह तदव्यक्तमाह हि प्रमाणान्तरेणाज्ञातत्वादिरूप
त्वात् ब्रह्म न केनापि प्रमाणेन व्यक्तं तथा हि श्रुतिः न संदृशे तिष्ठति रूपमस्य इत्यादिका प्रत्यक्षेण गृह्यमाणमस्तित्वं घटा
देरेव न ब्रह्मणः इत्यर्थः अपि संराधने प्रत्यक्षानुमानाभ्याम् अपि च संराधने योगी उपलभते संराधनं सम्यक्प्रीतिक

मन्यदस्तीति तत्प्राप्यप्रापकत्वसंबंधात्प्रतीयते तथाहि तेनेदं पूर्णं पुरुषेण सर्वं ततो यदुत्तरतरमिति पुरुषशब्दनिर्दिष्टाद्ब्र-
ह्मण उत्तरत्वेन भेदव्यपदेशाद्ब्रह्मणः परमस्तीति राद्धान्तस्तु नह्येतस्मादितिनेत्यन्यत्परमस्तीति नेति नेतीति निर्दिष्टान्मूर्तामूर्तरूपाद्ब्र-
वे०दी० ह्मणोन्यत्परं नास्तीति परत्वनिषेधात् कारणाद्ब्रह्मणोन्यत्परं नास्ति सेतुत्वव्यपदेशस्त्वेषां लोकानामसंभेदायेति सर्वलोकासं-
५१ करत्वकृतः एतं सेतुं तीर्त्वेति तरतिरपि वेदान्तं तरतिवत्प्राप्तिवचनः चतुष्पाद्ब्रह्म षोडशकलमित्युन्मानव्यपदेशोपि वाक्पादः
प्राणः पादश्चक्षुः पाद इतिवत् उपासनार्थः संभवति चापरिमितस्यापि तत्तद्देशसंबंधितयोन्मितत्वानुसंधानं अमृतस्यैष सेतुरि-
ति स्वस्यैवामृतस्वरूपस्यैव प्रापकमित्युक्तेर्न यमेवैष वृणुते तेन लभ्य इत्यादिश्रुतेः ततो यदुत्तरमित्यपि तेनेदं पूर्णमिति निर्दिष्टा-
56 त्पुरुषादन्यस्य न परत्वमाह अपितु तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेयनायेति पूर्वश्रुतिसाम्यं पुरुषवेदनस्यामृत-
त्वहेतुत्वमनन्यस्य चापथत्वं सहेतुकमुपसंहरति यस्मात्परं नापरमस्ति किंचिदित्यारभ्य तेनेदं पूर्णं पुरुषेण सर्वमिति परस्य च स-
र्वस्मात्परत्वमन्यस्य च परत्वाभावं प्रतिपाद्य ततो हेतोः यदुत्तरतरं पुरुषतत्त्वं तदेवारूपमनामयं ये तद्विदुरमृतास्ते भवंति अथेत-
रे दुःखमेवापियंतीति ज्ञानमेवोपसंहृतं सूत्रार्थः परमतः जन्माद्यस्य यतः इत्याद्यारभ्यामीतं तेन तथाहि लिंगमित्यंतेन ।
प्रतिपादितान्निखिलजगदेककारणात्सर्वान्तरात्मनो निरस्तनिखिलदोषगंधात् अनवधिकातिशयासंख्येयकल्याण राम ७
गुणगणात्परस्माद्ब्रह्मणः परमपि किंचिदस्तीति कश्चिन्मन्यते कुतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः आख्यायते ० सा

जीवस्येव शरीरस्य यावद्ब्रह्मविशेषणत्वेनाचिद्वस्तुनोपि ब्रह्मांशत्वमिति राद्धांतसूत्रार्थः तस्मादेवधारणोऽस्मद्देहः कुंडलभावादिवत् ब्र
ह्मस्वरूपस्येवाचिद्रूपेणावस्थानम् कुतः नानात्वेकत्वरूपोभयव्यपदेशात् आकाशाभ्युपवदातेजस्त्वात् वाशब्दोनन्तरोक्तवादस्मर्थः
यथाप्रकाशतदाश्रययोस्तेजस्त्वैकजातियोगात् अभिन्नत्वं भिन्नत्वं च एवमचिद्ब्रह्मणोरपि पूर्ववद्वा॰ वाशब्दः पक्षद्वयमात्रत्वा
र्थः पूर्ववत् यथा पूर्वं तांशोनानाव्यपदेशात्प्रकाशादिवत्तु नैवं पर इत्युभयव्यपदेशोपपत्त्येव ब्रह्मणोऽपि॰ पूर्ववद्वा वाशब्दः पक्ष
द्वयव्यावृत्त्यर्थः निर्दोषत्वसिद्धये च प्रकाशजातिगुणशरीरवत् पृथक्सिद्ध्यनर्हविशेषणतया जीवस्य ब्रह्मांशत्वमुक्तम् एवं अचिद्व
स्तुनोपि अचिद्वस्तुवाचिशब्देनापि अचिद्वस्तुविशिष्टब्रह्मैवाभिधेयमित्यास्मिन्नेवं सर्वत्र वै सर्वमिति भेदव्यपदेशोपपत्तिः विशेषण
विशेष्ययोः स्वरूपस्वभावभेदज्ञापनाय विशेषणविशेष्ययोर्भेदेन भेदव्यपदेशश्चोपपद्यते तदेतद्विद्याहम तं तु विद्याविद्ये ईश
ते यस्तु सोऽन्य इत्यादिब्रह्मणो निर्देशवचनं च प्रतिषेधाच्च स वा एष महानज आत्माजरोऽमरः नास्य जरयैतज्जीर्यति विजरो विमृत्युरित्यादेर्ब्र
ह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यभावेनैवांशांशिभाव इत्यर्थः परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः यतो वा इ
मानीत्यादिना जगज्जन्मादिकारणतयोक्तं निर्दिष्टात्परस्माद्ब्रह्मणोऽपि परं तत्त्वं किंचिदस्ति नेति संशयः इतोऽपि परमस्तीति पूर्वपक्षः
अथ य आत्मा स सेतुरित्यस्य सेतुत्वव्यपदेशात् सेतुं तीर्त्वा इत्यस्य तरणीयत्वव्यपदेशाच्च इतोऽप्यन्यदस्तीति गम्यते चतुष्पाद्ब्रह्म षो
डशकलमित्येवं परिमितत्वव्यपदेशाच्च अपरिमितमन्यदस्तीति प्रतीयते अमृतस्यैष सेतुरिति प्रापकत्वमुक्तं तेन ज्ञानेन प्राप्य

र्वगतत्वमायामशब्दादिभिः अनेन ब्रह्मणा सर्वमाप्ततं तेनेदं पूर्णं पुरुषेण सर्वमंतर्बहिश्च ततं सर्वमाप्य नारायणः स्थितः निःसंदिग्धं।
वे॰दी॰ ५८ र्वगतं सूक्ष्मं यद्भूतयोनिं परिपश्यंति इत्याद्यायामशब्देभ्यो व्याप्तिवाचिशब्देभ्यो वा गम्यते एवं गम्यमानं एतस्मात् परं वा रयतीत्यर्थः आदिशब्दा
दात्मैवेदं सर्वमित्यादयो गृह्यंते अतो यतो वा इमानीत्यादिना व्यज्ञातस्य जगत्कारणं ब्रह्मणोऽन्यत् यत् न विद्यते फलमत उपपत्तेः किं वेदो
दितं यागदानहोमादिकमुपासनात्मेव यजेतोपासीतेति कामिनो मुमुक्षोश्च कर्तव्यतयाऽभ्युपगमाणं कर्मैवापूर्वद्वारेण भोगापवर्गरूप
फलप्रदमुत तत्तदाराधनप्रीतः परमपुरुष एव फलद इति संशयः कर्मैवेति पूर्वपक्षः लोके सर्वैर्नरैः कृष्यादेः कर्मण एव साक्षात्परंप
57 रया वा फलप्रदत्वदर्शनात् तथा वेदे च यजेत स्वर्गकाम आत्मानमेव लोकमुपासीतेति कामिनो मुमुक्षोश्च कर्तव्यतयाऽभ्युपगमाण
कर्म तत्तत्फलसाधनतयावगतं क्षणिकमप्यपूर्वद्वारेण भोगापवर्गरूपसर्वफलदं राद्धान्तस्तु कर्तव्यतयावगतस्य यागादेरुपासन
स्य च यज देवपूजायामित्यादिना धात्वर्थस्वाभाव्यात् वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयतीति वाक्यशेषात्।
च इष्टापूर्तं बहुधा जातं जायमानं विश्वं विभर्ति भुवनस्य नाभिः तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चंद्रमाः स तया श्रद्धया युक्तस्तस्या
राधनमीहते लभते च ततः कामान्मयैव विहितान् हितान् अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति। राम
मानवः तत्प्रसादात् परां शांतिं स्थानं प्राप्स्यसि शाश्वतमित्यादिश्रुतिस्मृतिभ्यश्च परमपुरुष एव कर्मभिरुपासनेन चाराधितो भोगा। ५८
पवर्गरूपफलप्रदः लोके च कृष्यादिकर्मभिः संपादितमुत्पाद्यते न स्वद्वारेण साक्षाद्वा राजानमभ्यर्च्य ततः स्वपितृतोऽनिल

मान्यात्तु शब्दः पदं व्यावर्तयति सेतुत्वव्यपदेशस्तावत् तस्मात्परं नावगमयति सेतुसामान्यात्साहश्यापत्त्यावस्थितिरूपाद्ब्रह्मणस्तथा व्यपदे
श इति ऋ। किं रूपं सेतुशब्दं व्याचष्टे अथ य आत्मा स सेतुर्विधृतिरेषां लोकानामसंभेदायेति यथा स्वभावालोकासंख्यातत्वमावाऽसंकरायस
र्वान्लोकानयमेव सेतुर्विधृतिर्भर्ति इति सेतुरित्यर्थः बुद्ध्यर्थः पादवत् चतुष्पाद्ब्रह्मपादोऽस्य विश्वाभूतानीत्युन्मानव्यपदेशस्तथा उपास
नार्थः यथा वाक्पाद इत्यादिना ब्रह्मणो वागादिपादव्यपदेश उपासनार्थः एवमपि स्वयमपरिमितत्वस्य रूपस्यानुसंधानार्थः तया कथं परि
मितत्वमित्यत आह स्थानविशेषात्प्रकाशादिवत् प्रतिपन्नवागादिस्थानविशेषसंबंधात् तत्स्थानसंबंधित्वेनावच्छिन्नानुसंधानं युज्य
ते । यथा प्रकाशादेर्विततस्यापि वातायनघटादौ । उपपत्तेश्च अत एव सेतुरिति स्वस्यैव स्वयमेव व्यापक इति सेतुत्वव्यपदेशाव्ययत्वेऽ
न्यत्परमस्तीति कल्पनं न युज्यते नायमात्मा प्रवचनेन लभ्यः यमेवैष वृणुते तेन लभ्य इति हि श्रुतेः तथान्यप्रतिषेधात् तेनेदं पूर्णं पुरु
षेण सर्वं ततो यदुत्तरतरमिति पुरुषादन्यस्य परत्वमाह ततस्य शोकस्तु न तस्मात्स्यादिति नेत्यन्यत् परमस्ति यस्मात्परं नापरमस्ति किंचिदित्य
र्थः एवमादिश्रुत्या ब्रह्मणोऽन्यस्य परत्वप्रतिषेधात् यदुत्तरतरमिति तु आख्यातं यतः पुरुषतत्त्वमेव उत्तरतरं ततो हि नोर्ध्वं उत्तरतरं पुरुषतत्त्वम्
तदेवारूपमनामयं इत्यादिना यदेतद्विदुरमृतास्ते भवंति अथेतरे दुःखमेवापियंतीति तमेव विदित्वातिमृत्युमेति नान्यः पंथा विद्य
तेऽयनाय इति प्रतिज्ञातमेव सहेतुमुपसंहरन् ततस्य शोकस्य न तस्य नाम महद्यश इति च पुरुषतत्त्वमेव वदति अनेन सर्वमतः संभृतो हि
रण्यगर्भ इत्यस्याविति पुरुषतत्त्वान्निर्णेकवाक्यतावगमात् आंभस्यपारे यमंतः समुद्रे कवयो वदंतीति च प्रक्रमात् अनेन स

चोदनाद्यविशेषात् किं सर्ववेदांतेषूपासनानां दहरादिविद्यैकैकैव उत विद्यांतरमिति संशयः अविशेषेण पुनः श्रवणस्य प्रक
रणांतरस्य च विद्याभेदहेतुत्वाद्विद्यांतरमिति पूर्वपक्षः चोदनाफलसंयोगरूपाख्यानामविशेषात् प्रतिपत्तभेदे न पुनः श्रवणो
वे०दी० ५८ पपत्तेः तत एव प्रकरणांतरत्वाभावाच्च विद्यैक्यमिति सिद्धांतः विद्यासु गुणोपसंहारादिचिंतार्थं शाखांतराधिकरणोक्तन्याय
स्तत्फलं च स्थिरीकृतं सूत्रार्थः सर्ववेदांतप्रत्ययं दहराद्युपासनमेकं कुतः चोदनाद्यविशेषात् भेदान्नेति चेदेकस्यामपि अ
विशेषेण पुनः श्रवणमर्थवदिति न विद्याभेदः तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्णमिति आथर्वणिकानां शि
58 रोव्रतस्य विद्योपदेशांगत्वनियमदर्शनं विद्याभेदं तेषामेवेत्योत्त यत्तद्विद्यैक्ये कथं हि आथर्वणिकानामेवेति नियमो नेत्यये ते
त्याशंक्याह स्वाध्यायस्य तथात्वेन हि समाचारेधिकाराच्च शिरोव्रतं न विद्यांगं अपितु स्वाध्यायस्य तथात्वे हि स्वाध्यायस्य त
ज्जन्यसंस्कारभाक् हि तन्नियमः नैतदचीर्णव्रतोधीत इत्यध्ययनसंबंधात् समाचाराख्यग्रंथे इदमपि वेदव्रतत्वेन व्या
ख्यातमिति वेदव्रतत्वागमाच्च ब्रह्मविद्यां वदेत वेदविद्यामित्यर्थः सववच्च तन्नियमः यथा हि सव होमाः सप्त सूर्यादयः शतौदन
पर्यंता आथर्वणिकैकाग्निसंबंधिनस्तत्रैव भवंति तथैवेदमध्ययनधर्मवेदसंबंधित्वेन तत्रैव० दर्शयतिच दर्शयतिचश्रुतिः ३।१
पासनस्य सर्ववेदांतप्रत्ययत्वं छांदोग्ये दहरविद्यायां तस्मिन्यदंतस्तदिति विहितं अपहतपाप्मत्वादिगुणाष्टकं तैत्तिरीयके के राम
वलं तस्मिन् यदंतस्तदुपासितव्यमित्येवोक्तं तदुभयत्र विद्यैकत्वे संभवति उपसंहारो[illegible]भेदाद्विधिशेषवत्समानेच तदेवं ५८

मंते ॥ अतः परमपुरुष एव फलप्रदः स्वाराधितः फलमत उपपत्तेः ॥ अतः परमपुरुषादेव कर्मभिरुपासनैश्चाराधितात् भोगापवर्गरू-
पं फलं कुतः उपपत्तेः कर्मभिः क्षणध्वंसिभिर्न कालांतरभाविफलं सिद्ध्येत् सर्वज्ञः सर्वशक्तिः परमकारुणिको महोदारोऽनादिरनंत-
श्च सर्वेश्वरः स्वाराधनरूपेण कर्मणाराधितः फलप्रद इत्युपपद्यते ॥ श्रुतत्वाच्च ॥ स वा एष महानज आत्मान्नादो वसुदानः
एष ह्येवानंदयातीति भोगापवर्गरूपं फलमयमेव ददातीति श्रूयते ॥ धर्मं जैमिनिरत एव ॥ यागादिकमुपासनात्मकं च धर्ममेव
फलप्रदं जैमिनिराचार्यो मन्यते अत एवोपपत्तेः श्रुतत्वाच्चेत्यर्थः लोके मर्दनादेश्च कर्मण एव साक्षात्परंपरया वा फलप्र-
दायित्वदर्शनात् वेदेपि तथैव युक्तमित्युपपत्तिः उपपद्यते चापूर्वद्वारेण साधनत्वं यजेत स्वर्गकामः ब्रह्मविदाप्नोति परमिति का-
मिनः कर्तव्यतया कर्मविधानात् तदन्यथानुपपत्त्या कर्मणो वापूर्वद्वारेण फलसाधनमिति गम्यते ॥ पूर्वं तु बादरायणो हेतुव्यपदेशा-
त् ॥ तुशब्दः पक्षव्यावृत्त्यर्थः पूर्वोक्तपरमपुरुषस्यैव फलप्रदत्वं भगवान् बादरायणो मन्यते कुतः हेतुव्यपदेशात् वायुमेव स्वेन
भागधेयेनोपधावति स एवैनं भूतिं गमयतीति वाय्वाद्यात्मनावस्थितस्य परमपुरुषस्यैव फलहेतुत्वव्यपदेशात् यो वायौ तिष्ठन्नि-
त्यादिना वाय्वाद्यात्मना एवावस्थित इति श्रूयते तत्परित्यागे नापूर्वस्य फलसाधनत्वकल्पने श्रुतहानमश्रुतकल्पनं च विध्यवे-
क्षिते फलसाधनत्वप्रकारे वाक्यशेषेणावगते सति न फलसाधनत्वप्रकारकल्पनं न्याय्यम् यथैव हि रात्रिसत्रादिष्वधिका-
री न कल्प्यत इत्यर्थः ॥ इति श्रीभगवद्रामानुजविरचिते वेदांतदीपे तृतीयाध्यायस्य द्वितीयः पादः ॥२॥ सर्ववेदांतप्रत्ययं-

वे०सू०
६०

59

क्रमेणाविशेषेणोद्गीथे प्राणदृष्टिश्रुत्यादित्यत्रोजान्तरिक्षाणदृष्टिश्रुत्या च भूयान्यथान्यभिन्नत्वेनान्यायामोद्गीथमाजहुरनेनैवानभिहनि
ष्याम॥ उद्गीथस्यैवोपास्यत्वप्रतीतेः तन्नोद्गीथे दृष्टिनिर्धारितेन प्रणवोद्गाथादिनिकर्मण्येवोद्गीथे कर्तृत्वमुपवर्ण्यत इति युक्तं अस्य प्रत्युपक्रम
विरोधः स्यात् न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् नचैतदस्ति यदपेक्ष्याद्दैवैक्यमिति कुतः प्रकरणभेदात् छांदोग्ये हि ओमित्येतदक्षर
मुद्गीथमुपासीतेति उद्गीथावयवभूतं प्रणवमुपास्यत्वेन प्रकृत्य उद्गीथमाजहुरिति वचनादुद्गीथावयवभूतः प्रणव एवोद्गीथशब्देनोच्य
ते इति गम्यते वाजसनेयके त्वविशेषेणोद्गीथेनात्मा यामहैस्त्वुपक्रमात् कृत्स्नोद्गीथस्योपास्यः प्रतीतः अतो उद्गीथे प्राणदृष्टिः विशेषेपि रू
पभेदाद्विधाभेदः परोवरीयस्त्वादिवत् यथैकस्यामपि शाखायामुद्गीथावयवभूते प्रणवे परमात्मदृष्टिविधानसाम्येपि हिरण्मयपुरु
षदृष्टिविधानात् परोवरीयस्त्वादिगुणविशिष्टदृष्टिविधानमर्थान्तरमिति रूपभेदः तद्वदत्रापि एवं प्रकरणभेदेन उपक्रमभेदे
कत्रोद्गीथावयवावबोधेन इतरत्र कृत्स्नोद्गीथविषयत्वेन चोपासनभेदे सिद्धे सति उपसंहारस्य कर्मविषयं कर्तृविषयं च प्राण
दृष्टिविधानं यथाक्रमं नैवावतिष्ठत इत्यभिप्रायः संज्ञातश्चेत्तदुक्तमस्ति तु तदपि उद्गीथविद्येति संज्ञैक्यात् नाहि यथेकमुक्तं चेतनतत्संज्ञैक्ये
विधेयभेदश्चास्ति तु अस्येवेत्यर्थः यथा नित्याग्निहोत्रे कुंडपायिनामयनाग्निहोत्रे च यथा छांदोग्ये प्रथमप्रपाठकोदिता स्तुवह्नी
पुविद्यास्तूद्गीथविद्येति संज्ञैक्यं आदित्यासमंजसम् प्रथमप्रपाठके उपक्रमवत्तुत्तरत्रस्वप्युद्गीथविद्यासूद्गीथावयवस्य प्र
णस्यैवोपास्यत्वं आदित्यर्भध्यगतस्य तद्वदेवोद्गीथमाजहुरित्युद्गीथशब्दस्यापि प्रणवविषयत्वं समंजसम् सर्वभेदादन्यत्रेमे॰

राम
५०

सर्ववेदांतेषु दहराद्युपासनेषु समानेषु एकस्मिन् सति न तदुपासने वेदांतान्तरविहितस्य गुणस्य वेदान्तान्तरे चोपसंहारः कर्तव्यः कुतः अर्थाभेदात् तद्विद्यां
गत्वेन तदुपकाराभेदाद्विधिशेषवत् यथैकस्मिन्वेदांते वेदान्तरविधिशेषस्तथाविहितस्य गुणस्य तदुपकारत्वेनोपसंहारः तथा वेदांतांतरे विहितवि
द्यांगत्वाविशेषादुपसंहारो न्याय्यः अन्यथात्वं शब्दादिति चेन्नाविशेषात् अस्तु उद्गीथविद्या वाजिनां छांदोगानां च वाजिनां तावद्धंतासुरान्यज्ञ
उद्गीथेनात्ययामेत्यारभ्य उद्गीथे प्राणदृष्ट्योपासनं शत्रुपरिभवफलं विहितं छांदोगानामपि तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्या
म इत्यारभ्य उद्गीथे प्राणदृष्ट्योपासनमेव शत्रुपरिभवफलमुक्तं किं उभयत्र विद्यैक्यमुत विद्याभेद इति संशयः चोदनाद्यविशेषाद्विद्यैकमिति
पूर्वपक्षः राद्धांतस्तु यद्यप्युभयत्राप्युद्गीथे प्राणदृष्ट्योपासनमविशिष्टं तथापि छांदोगानामोमित्येतदक्षरमुद्गीथमुपासीतेति प्रक्रम्य उद्गी
थमाजह्रुरनेनैनानभिहनिष्याम इत्युद्गीथावयवे प्रणवे प्राणदृष्ट्योपासनमुक्तं वाजिनां तु हंतासुरान्यज्ञ उद्गीथेनेत्युपक्रमात् अविशेषेण
कृत्स्नोद्गीथे प्राणदृष्ट्योपासनमुक्तं अथ ह य एवायं मुख्यः प्राणः तमुद्गीथमुपासांचक्रिरे इति छांदोगानामुद्गानकर्मण्युद्गीथावयवे प्रणवे
प्राणदृष्टिविधानात् वाजिनां त्वथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः एष प्राण उद्गायतीति कृत्स्नोद्गीथस्य कर्तरि प्राणदृष्टि
विधानाच्चोभयत्र रूपभेदाद्विद्याभेद इति सूत्रार्थस्तु अन्यथात्वं शब्दादिति चेदिति राद्धांत ६ यथा पूर्व चोदनाविशेषादिति पूर्वपक्षीव
रिहरति अथ ह य एवायं मुख्यः प्राणः तमुद्गीथमुपासांचक्रिरे अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्यः एष प्राण उद्गा
यतीति एकत्रोद्गीथे प्राणदृष्टिशब्दादि तत्रोद्गातरि प्राणदृष्टिशब्दाच्च रूपान्यथात्वमिति चेन्न न रूपभेदः कुतः अविशेषात् उप

रूपो गुणः सर्वासूपसंहर्तव्याः प्रधानस्य गुणिनो ब्रह्मणः सर्वासु विद्यास्वभेदात् सर्वासु परविद्यासु ब्रह्मैकमनुसंधेयं चेत् यैर्गुणैर्विना ब्र-
ह्मस्वरूपानुसंधानं अशक्यं ते च ज्ञानानंदादयोनुसंधेया इत्यर्थः प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे आनंदादीनां प्राप्तावपि तस्य प्रियमेव शि-
वे०दी० रः मोदो दक्षिणः पक्षः इति प्रियशिरस्त्वादीनामप्राप्तिः ब्रह्मस्वरूपगुणत्वाभावात् तेषां ब्रह्मणः शिरःपक्षादिभेदे स्वरूपे सति ब्रह्मणः उपचया-
६१ पचयौ प्रसज्येयातां ततश्च सत्यं ज्ञानमनंतं अनंतोनंतरः इत्यादि विरुध्येत प्रियशिरस्त्वादिष्वानंदादीनां विशेषमाह इतरे त्वर्थसामान्यात् इत-
रे आनंदादयः अर्थसामान्यात् ब्रह्मस्वरूपनिरूपणधर्मा न भवंति चेत् तदभिधानं किमर्थमित्यत्राह आध्यानाय प्रयोजनाभावात् अनुचिंत-
नार्थं तदभिधानं प्रयोजनांतराभावात् ब्रह्मविदाप्नोति परमिति वेदितव्यतयोपदिष्टं ब्रह्मानंदमयं प्रियमोदादिरूपेण विभज्य शिरःपक्षादि-
त्वेन रूपयित्वा बुद्धावारोप्यते इत्यर्थः आत्मशब्दाच्च अन्योन्तरात्मा आनंदमय इत्यात्मशब्दाच्च प्रियशिरस्त्वादयो न ब्रह्मस्वरूपधर्माः प्रिय-
शिरःपक्षादयो ह्यनात्मधर्माः आत्मगृहीतिरितरवदुत्तरात् अन्योन्तरात्मेत्यात्मशब्देन परमात्मन एव गृहीतिर्ग्रहणं इतरवत् आत्मा वा
इदमेक एवाग्र आसीदित्यात्मशब्देन यथा परमात्मनो ग्रहणं तद्वत् कथमवगम्यते तदैकार्थ्यादुत्तरात् सोकामयत बहु स्यां प्रजायेयेत्यादिवा-
क्यात् अन्नमयादिष्विव स्यादवधारणात् पूर्वेष्वन्योन्तरात्मा प्राणमय इत्यादिवाक्येष्वनात्मस्वात्मशब्दयोगात् कथमुत्तरवाक्यान्निर्ण-
य इति चेत् तस्माद्वा एतस्मादात्मन आकाशः संभूत इति प्रकृतस्यात्मन एव प्राणमयादिष्वानंदमयपर्यंतेष्वात्मशब्दावधारणात् स्यादेव राम
निश्चयः प्रियशिरस्त्वादीनामनात्मधर्मत्वात् ज्ञानानंदादीनामात्मस्वरूपनिरूपणधर्मत्वात् च तेषामेव सर्वत्रोपसंहारः कार्य्यमि ६१

60

ज्यैष्ठश्च श्रेष्ठश्च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति छांदोगानां वाजिनां कौषीतकीनां श्रैष्ठ्यगुणविद्याम्नाता तत्र छां
दोग्यवाजसनेयकयोः सर्वस्यैकरूपत्वात् प्राणविधे कैव कौषीतकी प्राणविद्यायास्तत्स्याच्च भेदोऽस्तु नेति संशयः अस्ति भेद इति पूर्वपक्षः
यद्यपि सर्वत्र ज्येष्ठश्रेष्ठत्वगुणकः प्राणोपास्यः तथापि छांदोग्यवाजिनां ज्येष्ठश्रेष्ठत्वगुणकस्य वागादिगतवसिष्ठत्वादिगुणसंबंधित्वमपि श
ब्दादेव प्रतीयते कौषीतकीनां तु न तथेति रूपभेदाद्विद्याभेदः राद्धांतस्तु यद्यपि कौषीतकी प्राणविद्यायां वागादिगतवसिष्ठत्वादिसंबंधित्वं
प्राणस्य न शब्दाभिहितं तथापि तत्रापि प्राणस्य ज्येष्ठश्रेष्ठत्वोपपादनं वागादीनां स्थितेस्तत्कार्यस्य च प्राणाधीनत्वेनेत्सेतदविशिष्टमिति वा
गादिगतवशिष्ठत्वादेरपि प्राणहेतुकत्वानुसंधानेन विना प्राणस्य ज्येष्ठश्रेष्ठत्वानुसंधानं अनुपपन्नमिति कौषीतकी प्राणविद्यायाम
पि वागादिगतवसिष्ठत्वादिसंबंध्येव प्राण उपास्य इति स्यादभेदाद्विद्यैक्यमस्त्वत्रार्थः अन्यत्र कौषीतकी प्राणविद्यायामिमे वसिष्ठत्वादयः
संत्येव कुतः सर्वाभेदात् प्राणज्येष्ठश्रेष्ठत्वोपपादनप्रकारस्य तत्राप्यभेदात् वागादीनां स्थितेः कार्यस्य च प्राणाधीनत्वेन हि प्राणस्य ज्येष्ठश्रेष्ठ
त्वं चात्राप्युपपादितं अतो वागादिगतकार्यसामर्थ्यापादनरूपवसिष्ठत्वादिसंबंधित्वं प्राणस्यात्राप्युक्तमेवेत्यर्थः आनंदादयः प्रधान
स्य ज्ञानानंतत्वानंदत्वरूपब्रह्मस्वरूपगुणाः सर्वासु परविद्यासूपसंहर्तव्या उत नेति संशयः नोपसंहर्तव्या इति पूर्वपक्षः प्रकरणाधि
कानामुपसंहारे प्रमाणाभावात् ब्रह्मगुणानां असंख्येयत्वेन उपसंहाराशक्तेश्च राद्धांतस्तु ज्ञानानंदादीनां ब्रह्मस्वरूपनिरूप
णगुणत्वेन तैर्विना ब्रह्मस्वरूपानुसंधानानुपपत्तेः सर्वासूपसंहर्तव्या इति सूत्रार्थस्तु सर्वाभेदादित्यतोऽभेदादिति वर्तते आनंदा

वे०दी०
६२

पक्षः राद्धान्तस्तु उभयत्र मनोमयत्वादिके समाने सन्निवेशितत्वादेः सत्यसंकल्पत्वविभूतिरूपस्यानपायेनाभेदान्न रूपभेद इति विद्यैक्यं सूत्रा
र्थः मनोमयत्वादिके समाने सति विद्यैक्यं एवं नामभेदाद्दृशित्वादिगुणेनाप्यभेदाद्दृशित्वादेर्हि सत्यसंकल्पत्वविभूतिः संबंधादेवम
न्यत्रापि बृहदारण्यके य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्षिन्नित्युपक्रम्यादित्यमंडलेऽक्ष्णोश्च सत्यस्य ब्रह्मणो व्याहृति
शरीरत्वेनोपास्यत्वमुक्त्वा तस्योपनिषदहरित्यधिदैवतं तस्योपनिषदहमित्यध्यात्ममिति द्वे एतस्य नामनी उपासनशेषतयाम्नायेते
किं यथाश्रुतस्थाननियमेन उभयत्राभेद इति संशयः उभयोः स्थानयोरेकस्यैवोपास्यत्वाद्विद्यैक्यमिति मन्यते नामन
नी इति पूर्वपक्षः अक्ष्यादित्यस्थानसंबंधितयाकारभेदाद्रूपभेद इति विद्याभेदाद्द्वे नामनी नीयते इति राद्धान्तः सूत्रार्थः यथा मनो
मयत्वादिगुणविशिष्टस्यैवोपास्यत्वेन उभयत्र विद्यैक्यमेवमन्यत्रादित्यादित्याधारस्याप्येकस्यैव सत्यस्य ब्रह्मणः स्थानद्वयसंबं
धान्न रूपभेद इति विद्यैक्यात् द्वे नामनी ऽनियते न वा विशेषात् नैवं तदस्ति यद्विद्यैक्यादुभयत्राभेदे द्वे नामनी इति कुतः विशे
षात् उभयत्र हि रूपं विशिष्यमाणेनैकत्रादित्यस्थानसंबंधि ब्रह्म इतरत्राक्षिस्थानसंबंधि ब्रह्मेति रूपभेदाद्विद्याभेद इति नियते
नामनी दर्शयति च दर्शयति च इति श्रुतिर्विद्याभेदेन गुणानुपसंहारं तस्यैतस्य तदेव रूपं यदमुष्य रूपमित्यादिना रूपातिदे
शेन स्वतोऽस्य प्राप्त्यतिदेशेन प्राप्त्यपेक्षा संभृतिद्युव्याप्त्यपि चातः तैत्तिरीयके राणायनीयानां खिले श्रुच ब्रह्मज्येष्ठा वीर्या सं
भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान ब्रह्मादिर्देवानां प्रथमो तज्ज्ञे तेनार्हति ब्रह्मणा स्पर्द्धितुं क इति ब्रह्मणो ज्येष्ठानां गुणानां संभृति

67

राम
६२

नादपूर्वम् छांदोग्यवाजसनेयकयोर्ज्येष्ठश्रेष्ठप्राणमुपास्यं विधाय सहोवाच किं मे वासो भविष्यतीत्याप इति होचुरित्यपां प्राणे वासस्त्वमुक्तं त
स्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भुको ह वासो भवत्यनग्नो ह भवतीति छांदोग्ये वाजसनेयके चापां प्राणे वासस्त्वमुक्तं तस्मा
देवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते इत्याचमनेन प्राणमनग्नं कुरुत इत्यर्थः अत्राशनात्पुरस्तादुपरिष्टाच्चाद्भिः क्रि
यमाणमाचमनं प्राणविद्यांगं विधीयते उतानाचमनीयानामपां प्राणे वासस्त्वानुसंधानं विधीयत इति संशयः आचामेदित्याचमनस्य वि
धिप्रत्ययश्रवणात् स्मृत्याचारप्राप्तादाचमनादाचमनानंतरं प्राणविद्यांगं विधीयते पूर्वपक्षः राद्धान्तस्तु अशित्वा चाचामेदित्याचमनं
च प्रतीयते आचमनीयानां चापां प्राणे वासस्त्वानुसंधानं च आपो वासः अद्भिः परिदधतीत्यनेन तदनमनग्नं कुरुते इति प्रतीयते तत्रा
चमनांतरकल्पनादाचमनमनूद्य आचमनीयानामपां वासस्त्वानुसंधानमप्राप्तं विधीयते यदुक्तं तदनमनग्नं कुरुत इति च वचना
नित्यपूर्वत्वादिति न्यायेन वचनमेवं भवतीति सूत्रार्थः अपूर्वमप्राप्तमपां प्राणे वासस्त्वानुसंधानं विधेयं न पुनः प्राप्तमाचमनं कुरुतः का
र्याख्यानात् शास्त्रस्याप्राप्तार्थख्यानस्वरूपत्वाच्छास्त्रस्येत्यर्थः समानमेवं चाभेदात् वाजसनेयकेऽग्निरहस्ये बृहदारण्यके च शां
डिल्यविद्या आम्नाता अग्निरहस्ये तावत् स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपं सत्यसंकल्पमाकाशात्मानमिति बृहदारण्य
के च मनोमयोऽयं पुरुषो भाः सत्यं तस्मिन्नन्तर्हृदये यथा व्रीहिर्वा यवो वा स एष सर्वस्य वशी सर्वस्येशानः सर्वाधिपतिः सर्वमिदं प्र
शास्तीति किमत्र विद्याभेद उतनेति संशयः एकत्र सत्यसंकल्पत्वमधिकं श्रुतं इतरत्र वशित्वाद्यधिका इति रूपभेदाद्विद्याभेद इति पूर्व

ध्यं दिनं च तानि सवनानीति च सवनत्रयकल्पनं छांदोग्ये चाशिषादीनां दिक्त्वादित्वे कल्पनं पुरुषायुषस्य धा विभज्य सवनकल्पनं चेति

वे॰दी॰ यज्ञावयवकल्पनं प्रकारभेदाद्रूपभेदः स्पष्टः फलमपि तत्त्वैवेति इतरेषामिति फलस्यापि गरूणम् वेधाद्यर्थभेदात् आथर्वणिका

६३ स्तैत्तिरीयकाणां तैत्तिरीयाणां च इत्येवमादयः उपनिषदारंभेषु शुक्रं प्रविध्य हृदयं प्रविध्य शं नो मित्रः शं वरुणः शन्नो भवत्वर्यमा सह

नाववत्वित्यादिमंत्राः महाव्रतादीनि च कर्माणि अधीयते किमेषां विद्यांगत्वं उत नेति संशयः सन्निधिसमाम्नानान्न विद्यांगत्वे

मिति पूर्वपक्षः राद्धांतस्तु शुक्रं प्रविध्य हृदयं प्रविध्येत्यादिमंत्रसामर्थ्यान्महाव्रतादीनां च कर्मणां क्रमादिलिंगादभिचारद्य

62 दशमहादिषु विनियोगवत् शं नो मित्रः शं वरुणः सह नाववतु इत्यादिमंत्रस्य ऋतं वदिष्यामि सत्यं वदिष्यामि तेजस्विनावधीत

मस्तु मा विद्विषावहै इति मंत्रसामर्थ्यात् अध्ययने विनियोग इति न विद्यांगत्वं वेधाद्यर्थभेदादित्यस्य वेधाद्यर्थभेदवत् स

त्यं वदिष्यामि तेजस्विनावधीतमस्त्विति शं नो मित्रादेर्मंत्रस्याध्ययनसंबंधस्यार्थभेदान्न विद्यांगत्वमित्यभिप्रायः अतः शन्नो

मित्रादिमंत्र एवाधिकरणविषयः शाट्यायनशाखाशेषत्वात् कुशाछंदस्तुत्युपगानवत्तदुक्तम् विदुषो ब्रह्म प्राप्नुवतः पुण्यपा

पयोर्विमोचनं द्वयोः शाखयोः श्रुतं विमुक्तयोः पुण्यपापयोरन्यत्र प्रवेशः एकस्यां शाखायां श्रुतः विमोचनं प्रवेशश्चोभयमेक

स्यां शाखायां तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति अश्व इव रोमाणि विधूय पापं चंद्र इव राहोर्मुखात्प्रमुच्य राम

ब्रह्मलोकमभिसंभवामि इति च केवलविमोचनं तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यां इति केवलप्रवे ६३

द्युव्याप्त्येत्यादिगुणजातमाम्नातं किमेषां सर्वासु विद्यासूपसंहारः उत स्थानविशेषोपासने श्रुति. प्रमध्यति संशयः अनारभ्याधीतत्वात्तु एषां स
र्वास्वुपसंहारः इति पूर्वपक्षः राद्धांतस्तु यद्यपि स्थानविशेषसंबंधि उपासनमनारभ्याधीतं एतेनापि द्युव्याप्ति सामर्थ्यात् तस्याः दयाद्य
ल्पस्थानेषु उपसंहारायोगात् तत्साहचर्य्यादितरेषां अल्पस्थानविहितासु विद्यासु नोपसंहार्य्या इति सूत्रार्थः संभृति द्युव्याप्ती इति समा
हारद्वंद्वत्वेन एकवद्भावः संभृति प्रभृति गुणजातमप्यनल्पस्थानविशेषसंबंधनियतं न सर्वत्रोपसंहार्य्यं द्युव्याप्तीति सामर्थ्याद् अल्पस्था
नार्हत्वया सहितस्थाननियता संभृत्याद्यपि तत्साहचर्य्यादिति भावः॰ पुरुषविद्यायामपि चेतरेषामनाम्नानात् तैत्तिरीयके पुरुषविद्याम्नानात्
स्यैव विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी इत्यादिका छांदोग्ये पि पुरुषो वाव यज्ञस्तस्य यानि चतुर्विंशति वर्षाणि इत्यादिका किमत्र वि
द्याभेदः उत नेति संशयः पुरुषविद्येति संज्ञैक्यात् तैत्तिरीयके फलसंबंधाम्नानात् छांदोग्यगतश्रुतं जीवनीत्यनेन एकफलत्वाच्च वि
द्यैक्यमिति पूर्वपक्षः राद्धान्तस्तु पुरुषविद्येति संज्ञैक्ये पि सवनत्रयकल्पनप्रकारभेदात् यजमानपत्न्यादिकल्पनप्रकारभेदाच्च रू
पभेदात् तैत्तिरीयके पूर्वानुवाकगतस्य ब्रह्मणो महिमानमाप्नोतीति ब्रह्मविद्याफलस्यैव सन्निधानात् अफलस्यास्य तदंगत्वा
त्फलत्वात्फलभेदाच्च विद्याभेदः सूत्रार्थः पुरुषविद्यायामप्युभयत्र समभेदाद्विद्याभेदः कुतः इतरेषां अनाम्नानात् इतरशाखो
दितानामितरशाखायामनाम्नानात् छांदोग्ये तैत्तिरीयकाम्नातानां यजमानपत्न्यादीनां सवनादीनामनाम्नानात् तैत्तिरीयके छांदो
ग्याम्नातानां यज्ञावयवानां अनाम्नानादित्यर्थः तैत्तिरीयके सात्मा यजमानः श्रद्धापत्नीति यजमानादिकल्पनं यस्सायं प्रातरम

युक्तः तदुक्तं पूर्वस्मिन्काण्डे अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्धि कल्पस्येत्यादिना सांपराये तर्तव्याभावात्तथा ह्यन्ये किमिदं सु
कृतदुष्कृतयोर्हानिचिंतनं देहवियोगकाले एकदेशः क्षीयते अनिष्टिरर्थमितुभयत्र तर्तव्यं अन्तरे देहवियोगकाल एव।
वे॰टी॰ ६४ सर्वं क्षीयत इति संशयः उभयत्र पक्षे देवयानेन पथ्यागमनान्यथानुपपत्त्या चोभयत्रैवेति पूर्वपक्षः अश्व इव रोमाणि
विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतमिति देहवियोगकाले संप्रागच्छति विरजानदीं तीर्त्वा सु
कृतदुष्कृते विधूनुत इति सर्वधूननपि हानिः श्रूयते देहवियोगकाले सर्वकर्मक्षये हि देवयानेन गमनसाधनं कर्
मणा संभवति शरीरान्तरस्य तु तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्य इति देहवियोगादूर्ध्वं ब्रह्मप्राप्तिव्यतिरेके
63 णानुभाव्यपुण्यपापफलाभावात् अश्व इव रोमाणि विधूय पापमित्यादिनैकार्थ्यादेकवाक्यत्वान्नामपि तत
सुकृतदुष्कृते धुनुत इति वाक्यं देहवियोगकाले संक्रमयितव्यं इति देहवियोगकाल एव हानिचिंतनं सर्वकर्म
क्षये हि विद्यासामर्थ्यादेव देवयानेन पथ्यागमनं चोपपद्यते विद्या हि स्वयं सूक्ष्मशरीरस्यानारंभिकापि राम
प्रकृतसुखदुःखोपभोगसाधनस्थूलशरीरस्य सर्वकर्मणां चानिरवशेषहानपायस्त्वफलभूतब्रह्मप्राप्तिप्र
तिपादनाय देवयानेन पथा गमयितुं सूक्ष्मशरीरं स्थापयति सूत्रार्थः सांपराये देहवियोगकाल एव चिंतनी

शः तस्य कृतदुष्कृते ह्येते तस्य प्रियाज्ञातयः सुकृतमुपयंत्यप्रिया दुष्कृतं इत्युभयसम्भूक्तिं केवलहानिचिंतायां केवलोपायनस्ये
तत्समुभयाच्चेतनं सर्वासु विधासु विकल्पेनानुष्टेयं उतसमुच्चयेनेति संशयः तत्र पाम्नातस्यार्थवत्वाय विकल्प इति प्रा
प्तेयत्वः शाखांतरस्थ पुण्यपापप्रवेशस्य विमोचनापेक्षत्वे न शाखांतरस्थस्यापि प्रवेशवाक्यस्य शाखांतरस्थविमोचनवाक्यशेषत्वा
त् वाक्यद्वयेनैकार्थविधानात्समुच्चयः एकस्यां शाखायामुभयविधानं प्रतिपत्तिभेदेन पठितो यतः सूत्रार्थः हानौ तु तु श
ब्दः पक्षव्यावृत्त्यर्थः हानाविति प्रदर्शनार्थः केवलविमोचने केवले चोपायने श्रूयमाणे तयोरितरेतरसमुच्चयोवश्यं
भावी कुत उपायनशब्दस्य शेषत्वात् उपायनशब्दस्य हानिवाक्यशेषत्वादित्यर्थः एकयोः पुण्यपापयोः प्रवेशस्य
न वाचित्वात् उपायनवाक्यशेषस्य हानिवाक्यशेषत्वं अप्रकृतस्य तत्प्रदेशांतराम्नातवाक्यस्य प्रदेशांतराम्नातश
षत्वे दृष्टं तमाह कुशाछंदस्तुत्युपगानवदिति यथा वानस्पत्याः कुशा इति प्रदेशांतराम्नातस्य वाक्यस्यौदुंबर्याः
कुशा इति तद्विशेषवाचि प्रदेशांतरस्थं यथा च देवासुराणां छंदोभिरिति प्रदेशांतरस्थस्य तत्क्रमविशेषवाचि
देवछंदांसि पूर्वमिति प्रदेशांतरस्थं यथा च हिरण्येन षोडशिनः स्तोत्रमुपाकरोतीति प्रदेशांतरस्थस्य सनाध्वर्यु
रुपगायेदिति तत्पर्युदासरूपं प्रदेशांतरस्थं एवमुपायनवाक्यस्य हानिवाक्यशेषत्वासंभवत्सांगतौ विकल्पोऽ

वे॰दी॰
६५
64

कल्यं महोदारं परं ब्रह्मोपासीनानां सर्वमुपपन्नमित्यर्थः परब्रह्मोपासीनानां देहपातसमये सर्वकर्मक्षयाद्देहपाताद्
दूर्ध्वं कर्मफलानुभवो न विद्यते इत्येतत्सम्भवति वसिष्ठादीनां ज्ञानिनामपि कर्मफलरूपदेहान्तरसंयोगः पुत्रजन्
मविपदादिसुखदुःखानुभवोपि दृश्यत इत्याशंक्याह ॥ यावदधिकारमवस्थितिराधिकारिकाणाम् येषां ज्ञानिनां
देहपातानन्तरमर्चिरादिकागतिः प्राप्ता तेषां देहपातादूर्ध्वं तदितरारब्धकर्मफलभोगाभावात् देहपातसमये एव
कर्मक्षय उक्तः वसिष्ठादीनां यावदधिकारसमाप्ति नार्चिरादिकागतिरस्ति अपितु अधिकारस्थितिरेव अधिका
रहेतुभूतकर्मणः फलदानायारब्धत्वात् ज्ञानिनोप्यारब्धं हि कर्मफलानुभवेनैव क्षीयते ॥ अनियमः सर्वेषा
मविरोधः शब्दानुमानाभ्याम् येषूपासनेषूपकोसलादिषु अर्चिरादिकागतिराम्नाता किं तन्निष्ठानामेव तया ।
ब्रह्मप्राप्तिः उत सर्वेषां ब्रह्मनिष्ठानामिति संशयः तन्निष्ठानामेवेति पूर्वपक्षः इतरेषां तथा ब्रह्मप्राप्तेः प्रमा
णाभावात् यत्तु पंचाग्निविद्यायामसाधारणवचनं तदुपकोशलादिविषयमिति निश्चीयते अन्यथा उपको राम
शलाद्याम्नानमनर्थकं स्यात् राद्धान्तस्तु पंचाग्निविद्यायां य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धां सत्यमित्युपासते ६५

पंकुतः तत्कर्माभावाद्देहवियोगादूर्ध्वं स प्राप्तिव्यतिरेकेण तरितव्यभोगाभावात् तथा ह्यस्मिन्नेवाधीयते तस्य तावदेव चिरं यावन्न विमोक्ष्ये
अथ संपत्स्य इति अशरीरं वा वसंतं न प्रियाऽप्रिये स्पृशत इति च छंदत उभयाविरोधात् एवं कृत्स्नस्याभावात् देहवियोगका
ले निरवशेषधर्मक्षये वश्यते सति ते सुकृतदुष्कृते धुनुत इति वाक्यखंड उभयाविरोधादुभयपक्षस्याविरोधात् छंदतोऽपि ने
पः अश्व इव रोमाणि विधूय पापं धूत्वा शरीरं तस्य तावदेव चिरं इति चोभयपक्षस्याविरोधाच्चरमपक्षे तोऽपि तत्सुकृतदुष्कृ
ते धुनुत इति वा वाक्यखंड एतं यानपथानं आपापेन इति प्रथमे पक्षे तत्खंडात् प्रागनुगमपि तत्र इत्यर्थः अन्यथोदयपति
गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः देवयानपक्षेतेरर्थवत्त्वं देहवियोगकाले ध्वानिचेत् उभयथा कर्मक्षये सत्ये
वगमनयथा देहवियोगकाले सर्वकर्मक्षये सति सूक्ष्मशरीरारंभकनाशेनास्य अनुपपत्तेर्देवयानगतिपक्षे तिविरु
ध्यते परिहरति उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् भगवंतमुपासीनानां देहवियोगकाले सर्वकर्मक्षयेऽप्यु
पपन्नो देवयानः पंथाः कुतः तल्लक्षणार्थोपलब्धेः तल्लक्षणार्थः सजातीयार्थः अकर्मलभ्यो योऽर्थः पलब्धेरित्यर्थः उ
पलभ्यते हि कर्मालभ्यार्थो ब्रह्मोपासीनानां स स्वराड् भवति तस्य सर्वेषु लोकेषु कामचारो भवति इत्यादौ लोक
वत् यथा लोके राजानमुपासीनानां प्राकृतपुरुषासाधारणानि रमणीयानेकार्थसिद्धिः तद्वत् सर्वं तत्समं

दग्नयश्च रूपात्र पुरो ऽग्रश्नुपसद्गुणभूतो ऽग्निहोत्रं चेति मंत्रः सामवेदपठितत्वे सामवेदस्वरनियतोपि प्रधानभूतोपसदनुवर्तित्वाद्यजुर्वैदिकः
त्वाद्योपसदो यजुर्वैदिकोपांशुत्वसंबंधीनइत्त अङ्गद्वारविद्यासंबंधितयामधीतत्वेनतद्विद्यानियताग्रपि प्रधानानुवर्तित्वस्वभावात्स
वे॰दी॰ ६६ र्वविद्यासंबंधिनः तदुक्तं प्रथमे कांडे गुणमुख्यव्यतिक्रमे तदर्थत्वादित्यादिना एवं तर्हि सर्वकर्म्मा सर्वगंध इत्यादीनामपि सर्वेषां ब्र
ह्मगुणत्वेन क्वचिच्छ्रवणस्येत्याशंक्याह इयदामननात् इयत्स्थूलत्वादिविशेषितमानंदाद्येव सर्वत्रानुसंधेयं कुतः आमनना
त्हेतोः आमननं आभिमुख्येन मननं ब्रह्मानुसंधानं परब्रह्मस्वरूपानुसंधानं येन विना नोपपद्यते तत्सर्वत्रानुसंधेयं अमत
65 त्रतत्रव्यवस्थितमित्यर्थः अन्तराभूतग्रामवत्स्वात्मनो ऽन्यथाभेदानुपपत्तिरितिचेन्नोपदेशवत् बृहदारण्यके उषस्तिप्रश्नप्रतिव
चनं यः प्राणेन प्राणिति स त आत्मा सर्वांतरः यो ऽपानेनापानिति स त आत्मेत्याद्युत्तो ऽन्यदार्त्तमिति अनंतरमात्मांतरपातदनंतरं क
होलप्रश्नप्रतिवचनं यो ऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति एतं वै तमात्मानं विदित्वा इत्यतो ऽन्यदार्त्तमित्यंतं किं उभयत्र वि
द्यैक्यमुतविद्याभेद इति संशयः पूर्वत्र प्राणनादिहेतुः प्रत्यगात्मा उत्तरत्राशनायाद्यतीतत्वं परमात्मेत्युपास्यभेदाद्विद्याभेद इति पू
र्वपक्षः राद्धांतस्तु यत्साक्षादपरोक्षात् ब्रह्मेतिय आत्मा सर्वांतरः तमेव व्याचष्टेत्युभयत्र प्रश्नस्य परमात्मविषयत्वादेकरूपत्वा राम
च्च सर्वप्राणिप्राणनादिहेतुत्वस्याशनायाद्यतीतत्वस्य च प्रतिवचनद्वयगतस्य परमात्मन्येकस्मिन्नेवोपास्ये संभवाच्च न वि ६६
द्याभेदः सूत्रार्थः अंतरा य आत्मा सर्वांतर इत्युषस्तिप्रश्नो भूतग्रामवत्स्वात्मानः प्रत्यगात्मान इत्यभ्युपगंतव्यः अन्यथा प्रतिव

तेऽर्चिषमभिसंभवंतीति सामान्येन सर्वविद्यागतिश्रवणं उपकोशलादिष्वाम्नातेन न बाधितुं क्षमं संकोचकं च न संभवति विद्या
न्तरपर्यन्ततयानुवादेनाप्युपपत्तेः सर्वेषां तथैव व्याप्तिः सूत्रार्थः अनियमः सर्वेषां सर्वेषामविशेषेण तथैव प्राप्तिः कुतः अविरोधः
शब्दानुमानाभ्यां तथा सत्येव श्रुतिस्मृत्योरविरोधः श्रुतिः पंचाग्निविद्यायां निर्दर्शिता स्मृतिरपि अग्निर्ज्योतिरहः शुक्लादिका
अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् बृहदारण्यके तद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थू
लमनण्वह्रस्वमित्यादि श्रूयते तथाथर्वणे चाथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमित्यादि किमेषामस्थूल
त्वादीनां सर्वासु ब्रह्मविद्यासु उपसंहारः उत यत्र श्रूयन्ते तत्रैवेति संशयः विद्याविशेषरूपतयाम्नातानां सर्वविद्यासाधारण
त्वाभावात् यत्र श्रूयन्ते तत्रैव नियता इति पूर्वपक्षः राद्धान्तस्तु अस्थूलत्वादीनामप्यानन्दवत् ब्रह्मस्वरूपानुसंधानान्तर्भावा
त् सर्वत्रोपसंहार्याः न केवलमानन्दादिभिर्ब्रह्मस्वरूपं प्रत्यगात्मनो व्यावर्तयति तस्यापि तदेव स्वरूपं अस्थूलत्वादिविशेषितं
आनन्दादिब्रह्मगुणाः प्रत्यगात्मनो व्यावृत्तरूपं यद्यपि प्रत्यगात्मा स्वभावतः स्थूलत्वाद्यचेतनधर्मासंबंधी तथापि तत्संबंधा
र्हतास्त्येव तदर्हतया हि पूर्वं तत्संबंधः संजातः अतो ब्रह्मणस्तदनर्हस्वरूपानुसंधानतया अस्थूलत्वादयः सर्वत्रानुसंधेयाः सूत्रा
र्थः अक्षरधियां अक्षरसंबंधिनामस्थूलत्वादिधियां सर्वविद्यास्ववरोधः संग्रहणं कुतः सामान्यतद्भावाभ्यां ब्रह्मणः स
र्वत्र समानत्वात् ब्रह्मानुसंधानान्तर्भावाच्च तासां गुणवृत्तीनां गुणानां हि प्रधानानुवर्तित्वं स्वभावः औपसदवत् यथा जाम

स्मिँल्लोके सर्वस्य वशी सर्वस्येशानः इति किमुभयत्र विद्यैक्यं उत विद्याभेद इति संशयः रूपभेदाद्विद्याभेद इति पूर्वपक्षः उभयत्र प
रमात्मैवोपास्यस्तथाप्येकत्राकाशशब्दाभिधेयः परमात्मोपास्य इतरत्राकाशेशयानः परमात्मेति हि रूपं भिद्यते राद्धांतस्तु हृदया
वे॰ दी॰ यतनत्वसत्यसंकल्पसत्यकामत्वादेरभेदादुभयत्राविशिष्टः परमात्मैवोपास्य इति रूपाभेदाद्विद्यैक्यं छांदोग्ये हि दहरोस्मिन्नंतर आ
काशस्तस्मिन्यदंतस्तदन्वेष्टव्यमित्यारभ्य किं तत्र विद्यत इत्यादिना परिचोद्य तस्मिन्कामाः समाहिता एष आत्मापहतपाप्मा
विजरो विमृत्युरित्यादिना सत्यकामः सत्यसंकल्प इत्युक्तो नय इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामान् इत्याकाशशब्द
निर्दिष्टः परमात्मा तदंतर्गताश्च सत्यकामत्वसत्यसंकल्पत्वापहतपाप्मत्वादयो गुणाः अतः परमात्मा हृदयायतनत्व सत्यका।
66 मत्वादिविशिष्टः उपास्य इति वाक्येनैव निर्णीते वाजसनेयके च प्राणेषोंतर्हृदय आकाशः तस्मिन्शेते सर्वस्य वशीत्युक्ते सति
वशित्वादेः सत्यसंकल्पत्वविशेषरूपतया स एव परमात्मा हृदयायतनः सत्यसंकल्प उपास्य इति प्रतीयते अतो दहरविद्या
प्रत्यभिज्ञानात्स एव परमात्मा सत्यकामादिगुणाष्टकविशिष्ट उपास्य इति निश्चीयते एवं निश्चिते सति आकाशे शयान इत्या
काशशब्दोपि हृदयपुंडरीकवर्त्यवकाशवाचीति विद्यैक्यमेव सूत्रार्थः कामादि इतरत्र तत्र च वाजसनेयके छांदोग्ये च सत्य राम
कामत्वाद्येव रूपं कुतः आयतनादिभ्यः हृदयायतनत्वसत्यसंकल्पविशेषरूपवशित्वादिभ्यः तस्माद्वाणिः सत्यकामत्वा ६१
देः प्रत्यभिज्ञानात् परंज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते अभयं च ब्रह्म भवतीति ब्रह्मप्राप्तिरूपं फलं चैकमिति

चनभेदानुपपत्तिरिति चेन्नात्र प्रसंगात्मविषयं प्रश्नद्वयं प्रतिवचनद्वयं च परमात्मन्येकस्मिन्नेव संभवतीत्यर्थः उपदेशवन्तस्तथ्वोऽस्मुत
तमादेशमप्राक्ष्य इति प्रक्रांतायामेकविद्यायां भगवांस्त्वेव मे तद्ब्रवीतु भूय एव माह भगवान् विज्ञापयत्वित्यादिका प्रश्नवृत्तिः प्रवचनभे
दश्चोपास्यमाहात्म्यप्रतिपादनपरत्वेन दृश्यते न तत्र प्रश्नभेदपूर्वकप्रतिवचनप्रकारभेदाद्विद्याभेदो वर्जनीय इत्याशंक्याह अ
तिहारो विशिंषंति हीतरवत् यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इति द्वयोः प्रष्टोः प्रश्नस्यैकरूपत्वेन एकविषयत्वे निश्चिते
सति उषस्तिकहोलयोः प्रतिवचनगतिबुद्धिव्यतिहारः कार्य्यः प्राणेनादिहेतुकत्वेन बुद्धिः सर्वान्तरविषयाकहोलेनापि कार्य्येति
पा अशनायाद्यतीतत्वबुद्धिरुषस्तिनापि कार्य्या विशिंषंति हि उभयत्र याज्ञवल्क्यप्रतिवचनानि एकं सर्वान्तरमेवोपास्यं इतरवत्
यथेतरत्र सद्विद्यायां सर्वाणि प्रतिवचनानि परमकारणं परं ब्रह्मैकमेव प्रतिपादयंति सद्विद्यायामप्युपास्यैकं प्रश्नप्रतिवचनावृत्ती
वसत्वां कथमवगम्यते इत्यत्राह सैव हि सत्यादयः से यदेव नेनेतेत्यादिषु सर्वत्र सैव परदेवतानुवर्तते ऐतदात्म्यमिदं सर्वं तत्सत्यं
स आत्मा तत्त्वमसीति न एव सत्यादयः सर्वेषु प्रतिवचनेषु उपसंह्रियंते कामादीतरत्र तत्र चायतनादिभ्यः छांदोग्ये श्रूयते अथ
यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोस्मिन्नंतर आकाशः तस्मिन्यदंतस्तदन्वेष्टव्यमित्यादि प्रक्रम्यतय इहात्मानमनु
विद्य व्रजंत्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीति वाजसनेयके च य एषोंतर्हृदय आकाशस्त॥

नियमेनोपादेयमिति पूर्वपक्षः राद्धान्तस्तु तेनोभौ कुरुतः यश्चैतदेवं वेद यश्च न वेद इत्युद्गीथोपासनरहितस्यापि कर्मानुष्ठानदर्शनात्क्र
वे०दी० तुफलात्स्वर्गादेः पृथग्भूतवीर्यवत्तरत्वफलमिदमुपासनमिति गोदोहनादिवदनियमः वर्तमाननिर्देशे सत्यधिकारान्तरतिष्ठ
६८ येसत्रिरात्रिसत्रवत्क्रतोर्वीर्यवत्तरत्वमस्योपासनस्य फलमिति कल्पनीयं सूत्रार्थः तन्निर्द्धारणानियमः निर्द्धारणं निश्चयेन चे
तसो धारणमुपासनमित्यर्थः तस्योद्गीथोपासनस्यानियमः कुतः तद्दृष्टेः तेनोभौ कुरुत इत्यनियमदृष्टेः पृथग्भूतं ह्युपासनस्य फलं
तच्चाप्रतिबद्धरूपवीर्यवत्तरत्वं नाम प्रबलकर्मान्तरबलेन एतस्य कर्मणः फलस्याप्रतिबन्धः अविलम्बितत्वमित्यर्थः प्रदानवदेव त
दुक्तम् दहरविद्यायां य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामान् इति अपहतपाप्मत्वादिगुणानामपि परमपि परमात्मस्व
67 रूपचिंतनवत्पृथक्चिंतनं विहितं किं गुणचिंतनेन तद्गुणविशिष्टतया परमात्मानुचिंतनमावर्तनीयं उत नेति संशयः पर
मात्मन एकस्यैव सर्वेषां गुणानां गुणित्वेन सकृदेव तच्चिंतनोपपत्तेर्नावर्तनीयमिति पूर्वपक्षः राद्धान्तस्तु गुणिनः स्वरूपैक्येपि तद्गु
णविशिष्टाकारादिभेदादावर्तनीयमिति सूत्रार्थः प्रदानवदावर्तनीयमेव यथैन्द्राय राज्ञे पुरोडाशमिन्द्रायाधिराजाय स्वराज्ञ
इतीन्द्रस्यैकत्वेपि राजत्वादिविशिष्टाकारभेदाद्देवताभेद इति प्रदानावृत्तिः तद्वदेव तदुक्तं संकर्षणेन नानावा देवताः पृथक्त्वा
दितिलिंगभूयस्त्वाद्धि बलीयस्तदपि तैत्तिरीया अधीयते सहस्रशीर्षं देवं विश्वाक्षं विश्वसंभुवं विश्वं नारायणमित्यारभ्य सोऽक्षरः राम
परमः स्वराडित्यन्तं तस्मिन्ननुवाके नोपासनं विधीयते किमयं पूर्वानुवाकोदितदहरविद्योपास्यविशेषनिर्द्धारणार्थः उत ६८

विधेयकं मनसैवानुद्रष्टव्यं नेह नानास्ति किंचनेत्यादेः पूर्वपक्षः प्रकृतत्वात् स एव नेति नेतीत्यात्मेति च वक्ष्यमाणत्वात् सर्वस्य वशी स
र्वस्येशानः इत्यादिविशेषणोक्तस्वरूपत्वाभावात् कथं सत्यकामत्वादिः सोऽदसाधनोपासनरूपत्वेनेति मत्वाह ॰ आदरादलोपः ॰ व
शित्वादेः प्रमाणान्तराविदितस्य सफलस्यैक समधिगमस्मादरेण प्रतिपादनादलोपः अप्रतिषेधः न त्वापि वृत्तिगुणत्वमवश्याश्रयणीय
यं विशेषनिषेधात्तु सकलेतरश्रुतविषयाः नानात्वनिषेधं तु सकलस्य प्रपञ्चकार्यस्य तात्पर्यं ज्ञात्मकल्पाभिप्रायः सगुणोपासन
स्य यदि पितृलोककामो भवतीति पितृलोकादिप्राप्तिवचनात् सांसारिकफलत्वेन न मोक्षफलत्वमित्याशंक्याह उपस्थितेऽतत
स्तद्वचनात् उपस्थितिरूपस्यानंतरं ब्रह्मोपसंपत्तिः उपस्थिते ब्रह्मोपसंपन्ने अनेनाब्रह्मोपसंपत्तेरेव हेतोः तद्वचनात् पितृलोकादि
प्राप्तिवचनात् तत्सांसारिकफलं अपितु संसारान्मुक्तस्यैवास्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति सर्वेषु लोकेषु कामचारो भवतीति च निरतिशयस्य हि स्वेन रूपेणाभिनिष्पन्न
स्यैव स तत्र पर्येति इत्युच्यते अतो ब्रह्मोपसंपत्तिहेतुकसंकीर्तनादेरवगम्यते तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रति
बंधः फलम् छांदोग्ये ओमित्येतदक्षरमुद्गीथमुपासीतेति कर्मांगाश्रयमुद्गीथाद्युपासनं श्रूयते न तत्किं तस्मिन् कर्मण्येत
पर्णतादिवत् नियमेनोपादेयमुत गोदोहनादिवत् अनियमेनेति संशयः कर्मांगाश्रयत्वेन पर्णतादिवत् तद्वारेण निरूढका
र्यतया यदेव विद्यया करोति तदेव वीर्यवत्तरमिति वर्तमाननिर्देशस्य पृथक्फलप्रतिपादनायोगात् क्रत्वर्थतया

प्रतीतत्वात्पूर्वोऽग्नासद्यादमग्रआसीदित्यादिना इह कश्चित्स्यादग्रे प्रकृतत्वान्मनःचिदादिषु च तेषामेकैकस्तावान् यावान्
वे०टी० ६९ सोऽपूर्व इतिनका प्यातिदेशात् इह कश्चित्तेषां विकल्पप्रतीतिः इह कश्चित्ताक्रियाप्रभूतक्रियामयकत्वनुप्रवेशो न तदंग ।
भूता इति पूर्वपक्षः राद्धान्तस्तु तेहैते विद्याचित एव विद्यया ह्येवैत एवंविदश्चिता भवंतीति मनश्चिदादीनां संपादिकाग्नि
त्वेन विद्यारूपत्वेसिद्धेपि तेहैते विद्याचित एवेति श्रुति विद्यामयकत्वेऽगत्वे एषां विद्यारूपता भवगमयतीति लिंग्या तु साह्
हितेभ्रान्तसेऽग्न्हत्वोत्रादिभिः कत्वनुबंधेरनुवादवाक्यस्वरूपवाक्यप्रतिपादितेक्रतुदर्शनेसन्ति वचनानि त्वपूर्वत्वादि
68 ति न्यायेन मनश्चिताद्गीतांशेषभूतविद्यामयकत्वो विधिः परिकल्पते तेषामेकैक एव तावान् यावानसौ पूर्व इत्यति
तिदेशाने इह कश्चित्रागतेः स्वशेषिभूतक्रतुद्वारेण यत्फलं तदेवैषां स्वशेषिभूतविद्यामयक्रतुद्वारेण फलमिति निश्चीयत
इति विद्यामयक्रत्वंगभूता एव मनश्चितादयः सूत्रार्थः मनश्चितादिक्रियासात् क्रियामयक्रत्वंगभूता इत्यर्थः कुतः ।
प्रकरणात्पूर्वप्रकृतेनेह कश्चितेनाभिचारकक्रतुसंबंधिनाऽपाठ्यत क्रतुग्रहीतत्वेन तदंगभूता एषां च नित्य राम
वात्तेनेह कश्चित्तेन विकल्पः विद्यारूपाणामप्येषां क्रियामयक्रत्वंगभावो न विरुध्यते द्वादशाहांगभूत मानसग्रहवत् । ६९
अतिदेशाच्च तेषामेकैक एव तावान् यावानसौ पूर्व इति तेषु पूर्वेह कश्चितकाप्यातिदेशाच्चैतेनैषां विकल्पः प्रतीयते

सर्ववेदान्तोदितसर्वपरविद्योपास्यविशेषनिर्द्धारणार्थमिति संशयः दहरविद्यायामानन्तर्यात्तदुपास्यविशेषनिर्द्धारणार्थमिति पूर्वपक्षः सहस्र
शीर्षमिति द्वितीयानिर्देशस्यानन्तरोदितोपासित्वसंबन्धस्यैवयुक्तत्वात् राद्धान्तस्तु तदेव परमं ब्रह्म तत्परं तत्वं परंज्योति॥ इतिः परमात्मा तत्व(
शिवशंभुशब्दैः सर्वपरविद्योपास्यानन्तरवाक्योक्तेषां नारायणत्वविधानात्तस्य चतत्करणाल्लिंगबलीयस्त्वेन बलीयस्त्वा
त्परविद्योपास्य इति निर्द्धारणमिति निश्चीयते न च सहस्रशीर्षमिति द्वितीयानिर्देशः पूर्वेणोपासिनासंबध्यते तस्मिन् यदं
तस्तदुपासितव्यमिति पूर्वेण कर्तृत्वस्य येन कर्मणाभिहितत्वमिति तत्र द्वितीयानिर्देशायोगात् नारायणः परं ब्रह्म व्याप्य नारा
यणः स्थितः परमात्मा व्यवस्थित इत्यादिभिरेकार्थ्यात् प्रथमार्थे द्वितीयासम्बद्धार्थः सर्वविद्योपास्यनिर्द्धारणे लिंगभूयस्त्वा
त्तदेवन्याय्यः तस्यचिन्तनभूतवाक्यभूयस्त्वादित्यर्थः तद्विवाक्यप्रकरणाद्बलीयः तदपि पूर्वस्मिन्काण्डे श्रुतिलिंगवाक्यप्रक
रणस्थानसमाख्यानां समवाये पारदौर्बल्यमित्यादिनोक्तं एवं सर्वोपास्यनिर्द्धारणेन निश्चिते सति दहरविद्यायामपि
तत्र यमेवोपास्य इति पद्मकोशप्रतीकाशमित्यादिना हृदयाद्यभिधानं च युज्यत इत्यभिप्रायः पूर्वविकल्पः प्रकर(
णात्स्यात्क्रियामानसवत् वाजसनेयके अग्निरहस्ये मनश्चितो वाक्चितः प्राणश्चितश्चक्षुश्चित इत्यादिमनश्चि
तादयोऽग्नयो विद्यारूपाः श्रूयन्ते किमेते क्रियामयक्रत्वङ्गभूता उत विद्यामयक्रत्वङ्गभूता इति संशयः अस्मिन्प्र(
करणे विद्यामयक्रत्वनुबन्धि ग्रहस्तोत्रादिदर्शनेपि क्रतोर्विधानाभावात् फलान्तराश्रुतेश्च इष्टकचितस्यान(

ष्ये: स एष एव स मृत्युर्य एष एतस्मिन्मंडले पुरुष इति वक्तव्यं फलसामान्येन भविष्यतीत्यतिदेशः नहि तत्र मंडलपुरुषे मृत्युलोकावतिरपत्ति
रिश्यते अपि तु मृत्युवत्सर्वहरत्वमेव परोक्षवशाद्व्यस्तनादिध्यंभूयस्त्वानुबंधः परोक्षवर्णनेन तत्समनक्षिनापमिधायितः शार
वे०टी० ७० स्तनादिध्यंतादिध्यंविधामयश्नियारकत्वंग वज्रमनेन परोक्षहि ज्ञानोनायं वावलोक एषोस्मिन्नितः तस्माय एवेमादिनाध्यकृप
लाविधैवविधीयते अतिरहस्ये क्रियाणां विधीयत इति नास्ति नियम इत्यर्थः क्रियाप्रकरणे तेषां मत क्षिनादीनां अनुबंधसंपा
दनीयानां अग्नेगानां भूयस्त्वान्न क्रियते अस्मतो विधामयकत्वं गम्यता एवमनक्षिनादयो व्ययः एकस्मात्मनः शरीरे भावात् प्रत्यगा
त्मनः आत्मन यावरमात्मोपास इति वक्ष्यते आत्मेतिरूपगच्छतीति तत्र किं प्रत्यगात्मनः शरीरे वर्तमानस्य कर्तृत्वभोक्तृत्वादिविशि
69 ष्टरूपमनुसंधेयं उत प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणविशिष्टं यथावस्थितरूपमिति संशयः शरीरे वर्तमानस्यापहृशं
रूपं तदेवानुसंधेयमिति पूर्वपक्षः कर्मविधिष्विवउपासनविधावपि तावतैव साधनानुष्ठानफलानुभवयोः संभवात् यथाक्र
तुरस्मिंल्लोके पुरुष इति तं यथा यथोपासते इत्यनेनैकाव्यात्परमात्मविषयं राद्धांतस्तु तत्त्वमसि तज्ज्ञानात्मनयाम्यम तद् इति प्रत्य
गात्मन आत्मत्वेनैव परमात्मोपास्य इति प्रत्यगात्मनः स्वरूपमप्युपासनांतर्गतं वरज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते यथा
वस्थितात्मस्वरूपस्यैव ब्रह्मानुभवः फलमिति तिष्ठतोपयाक्रतुरस्मिंल्लोके पुरुष इति नियमैरे त्वमात्रविषयं अपि तु प्रत्यगात्मा राम ७०
त्मभूतोपास्यविषयमिति प्रजापतिवाक्योदितं यथावस्थितं स्वरूपमेवानुसंधेयं अन्यथा प्राप्योपास्ययोः प्रकारभेदात्

तेन विकल्पो हि तच्चेष्विभूतक्रत्वंगत्वेन विनैवानोपपद्यते अतश्चानन्दगमृताः विद्यैव तु निर्द्धारणाद्दर्शनाच्च तु शब्दः पक्षं व्यावर्तयति मनश्चिता
दि विद्यैव विद्यामयक्रत्वंगभूता एवेत्यर्थः कुतः निर्द्धारणात् तेवं विद्यारूपत्वे सिद्धेपि ते हैते विद्याचित एवेति निर्द्धारणं विद्यामयक्रत्वंगत्वे एवं विद्या
मयत्वस्थापनार्थं अग्रेव विद्यामयक्रतुदर्शनाच्च तदंगत्वमेवैवं दृश्यते च विद्यामयक्रतुः मनसैव ग्रहा गृह्यन्ते मनसा स्तुवंति मनसा शंसंतीत्या
दौ अत्र विद्यामयक्रतौ विधिपराश्रवणात् फलसंबंधाश्रुतेनेत्यभ्यावकरणे नैष कश्चिनाम्नुपस्थितक्रत्वंगताश्रुतेत्सविद्यामयक्रत्वंगत्वा
बाध्यत इत्याशंक्याह श्रुत्यादिबलीयस्त्वाच्च न बाधः श्रुत्यादेः प्रकरणात् बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकर
णेन बाधः श्रुतिस्तावत् ते हैते विद्याचित एवेतिता विवरणे तिविद्याया हैवेत एवंविदश्चिता भवंति इति लिंगवाक्यं च भाष्ये दर्शितं ए
वंविदो मनश्चित्तुराद्यवयवेषु अग्नित्वसंपादयितृत्वेन मनश्चितादयो विद्याप्रधानभूतत्वाच्चिता भवंतीत्यर्थः मनसैव ग्रहा गृह्यंते
इत्यादौ विधिपराश्रवणाद्विद्यामयक्रतुविधिर्न संभवति तदसंभवादेव तदन्वयोपि न संभवतीत्याशंक्याह अनुबंधादिभ्यः प्रज्ञा
न्तरपृथक्त्ववत् दृष्टश्च तदुक्तम् ग्रहस्तोत्रशस्त्राद्युपस्थानुबंधेभ्य इति कश्चिनान्यापि नः क्रतोरत्र विधीयमानविद्यामयक्रतुपृथ
क्त्वमवगम्यते प्रज्ञान्तरपृथक्त्ववत् यथा प्रज्ञान्तराणां दहरादिविद्यादीनां पृथक्त्वं हेतुभिः पृथक्त्वं शब्दादिशब्दान्पूर्वोक्तश्रुत्यादिभ्यो
ह्यते श्रुत्यादिनानुबंधेभ्य विद्यामयक्रतुविधिः परिकल्प्यत इत्यर्थः दृष्टश्चानुवादसरूपो हि कल्प्यमानो विधिः यद्देव विद्यया करोति
इत्यादौ तदुक्तं वचनानि त्वपूर्वत्वादिति पत्नूक्तं निर्देशाच्च एककर्तृकशेषिभूतक्रत्वन्वयोवगम्यत इति तत्राह न सामान्यादप्युपल
ब्धेर्मृत्युवन्न हि लोकापत्तिः नावश्यमतिदेशेनैककर्तृकाग्निक्रत्वंगत्वमध्याप्यते येन केनचित्सामान्येनातिदेशोप्युपल

पास्यः प्रतीतः तत्र किं व्यस्तस्यैवोपासनं कार्यमुत व्यस्तस्य समस्तस्य चाथ समस्तस्यैवेति संशयः औपमन्यव कं त्वमात्मानमुपास्स इति दि
वमेव भगवो राजन्नित्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वमभिधाय तत्र तत्र व्यस्तस्यैवोपासने
वे॰ दी॰ फलं च विहितमिति प्रत्यायस्तेन(?) मेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त इति पूर्वोक्तस्य समासेनोपसंहार इत्युक्तम्
१२ अतो व्यस्तस्यैवोपासनं कार्यमिति प्रथमः पक्षः समस्तोपासनस्य सर्वेष्वात्मसु चान्नमत्तीति व्यस्तोपासनफलेभ्यः फलान्तरविधा
नात् व्यस्तसमस्तस्योपासनं कार्यमिति द्वि॰। तृ॰ पक्षे: ये त्वां तमुभ्यात्मानं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्यारभ्य वैश्वा
नरात्मनः स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय यस्त्वेतमेवं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते स
१० स सर्वेषु इत्युपसंहारादेकस्यैव वैश्वानरात्मनस्त्रैलोक्यशरीरस्य परब्रह्मण उपासनं विधाय फलं च सर्वेष्वात्मसु चान्नमत्ती
ति तथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति च सर्वेषामात्मनामविशेषेण भोक्तृत्वं परब्रह्मानुभ
वतीति तद्विरोधेन व्यस्तस्य सर्वपाप्मानं तरतीत्युक्तमिति गम्यते अत एकवाक्यत्वात् समस्तस्यैवोपासनं कार्यं व्यस्तवादस्तु स्व
र्लोकादीनां मूर्धाद्यवयवत्वज्ञापनार्थः तत्र तत्र फलवादो वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भव
तीत्यादिवत् द्रष्टव्यः सूत्रार्थः भूम्नो ज्यायस्त्वं समस्तोपासनस्यैव प्रामाणिकत्वमित्यर्थः एकवाक्यत्वावगतेः व्यस्तवा राम
दः क्रतुवत् द्रष्टव्यः वैश्वानरं द्वादशकपालं निर्वपेत् यदष्टाकपाल इत्यादिकं नाविवेत्यर्थः तथा हि दर्शयति समस्तो १२

यथाक्रतुरिति विरुध्येत यजेत स्वर्गकाम इत्यादिकर्मविधौ तु कर्तृस्वरूपानुसंधानेन साधनानां तर्गततमित्ति विशेषः सूत्रार्थः कर्तृत्वादिवि
शिष्टमनुसंधेयं इत्येके मन्यन्ते कुतः शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावात् व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् न
कर्तृत्वादिविशिष्टमनुसंधेयं अपि तु सांसारिकस्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेकस्सोनुसंधेयः कुतः तथोपासनभावित्वात्तद्व
तिरिक्तस्वरूपप्राप्तेः पुरुषः यथाक्रतुरस्मिंल्लोके इत्याह उपलब्धिवत् यथाब्रह्मस्वरूपोपलब्धिर्यथावस्थितब्रह्मानुसंधानयु
क्तस्यैव तथात्मोपलब्धिरपि ॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदम् ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथादिकर्मांगाश्र
या उपासनाः श्रूयंते ताः किं यासु शाखासु श्रूयंते तास्वेव व्यवस्थिता उत सर्वासु शाखासु संबद्धा इति संशयः शाखासु स्वरभेद
तः प्रतिशाखमुद्गीथभेदात् यत्र श्रूयंते तत्रस्थोद्गीथादेः सन्निधानात्तेनैवान्विता व्यवस्थिता इति पूर्वपक्षः राद्धांतस्तु यद्युद्गी
थव्यक्तिभेदो विद्यते तथापि तत्र तत्रत्योद्गीथजातीयत्वेन संबंधात् सर्वेषां चोद्गीथजातीयत्वाविशेषात् उद्गीथमुपासीतेति
श्रूयमाणस्यैव सर्वसंबंध इति सर्वशाखासु संबध्यते सूत्रार्थः न त्वंगावबद्धा उपासनास्तासु शाखासु व्यवस्थिताः अपि तु प्रतिवेदं
सर्वशाखासु बद्धा इत्यर्थः हीति हेतौ यस्मादुद्गीथजातीयत्वाविशेषेण सर्वसंबद्धस्तस्मादित्यर्थः मंत्रादिवद्वाविरोधः वाशब्द
श्चार्थे यथा मंत्रादीनां क्रत्वंगभूतानामेकैकशाखावगतानां सर्वशाखासु क्रतोरंगत्वेन सर्वत्र संबंधो न विरुध्यते तद्वदवि
रोधः भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति वैश्वानरविद्यायां स्वर्लोकादित्यवाय्वाकाशपृथिव्यवयवो वैश्वानरात्मा।

म्पत्त्यासम्पदेऽहं समुच्चीयेरन्न विकल्पेरन्नपूर्ववहि स्वभावात् फलस्यावशिष्टत्वात् भूयस्त्वोपेतया समुच्चयः संभवतीत्यर्थः
ऽङ्गेषु यथाश्रयभावः क्रत्वङ्गाश्रयाणामुद्गीथाद्युपासनानां गोदोहनादिवदधिकारान्तरत्वेनोपादानानियमः पूर्वोक्तः सं
वे०दी० १२ भवतीति न संशयः न संभवतीति पूर्वपक्षः उद्गीथमुपासीतेत्युपासनविधेः फलान्तराश्रवणादुद्गीथसंबंधावगतक्रत्वं
गभावाविरोधात् एवं विधिवाक्येनैव क्रत्वङ्गभावेऽवगते सति यदेव विद्यया करोति तदेव वीर्यवत्तरं तेनोभौ कुरुत इति
च वर्तमाननिर्देशो न स पापं श्लोकं श्लोकं शृणोतीतिवदर्थवादमात्रं स्यात् तस्मात् यदेव विद्यया करोति तदेव वीर्यव
72 त्तरमिति विधायाः क्रतुवीर्यवत्तरत्वं प्रति साधनत्वसाधर्म्येन भावोऽवगम्यते एवं फलसाधनतया ज्ञाता विद्या किमस्य फ
लं करोतीत्यपेक्षायामोमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथमाक्षिप्य कुर्यादिति क्रत्वङ्गभूतोद्गीथाश्रयत्वं प्रतीयते अ
तः फलान्तरसाधनतयावगतस्य क्रत्वङ्गभावो नोपपद्यत इति गोदोहनादितुल्यतयोपादानानियमस्सिद्धः नेव यस्य पर्ण
मयी जुहुर्भवति न स पापं श्लोकं शृणोतीत्यत्र तु पर्णतायां जुहूसंबंधात् प्रागपापश्लोकश्रवणं प्रति साधनत्वसाधनभावो
न श्रूयते पर्णता संबंधिपुरुषसंबंधमात्रं श्रुतं तत्पर्णमयी जुहूरिति श्रुत्यैव प्रथममवगतं क्रत्वङ्गभावं न विरुणद्धि इ राम
त्यर्थवादमात्रमिति विशेषः सूत्रार्थः अङ्गेषु उद्गीथादिष्वाश्रितानामुपासनानां यथाश्रयभावः उद्गीथादिवदङ्गभावः १२
गोदोहनादिवत्स्ववाक्ये फलसंबंधाश्रवणादङ्गभावो न विरुध्यत इत्यर्थः शिष्टेश्च शिष्टिः शासनं विधानं उद्गीथ

पासनसमन्वायस्तमेव दर्शयति श्रुतिः मृत्युं तिरयति य एवं नाम ब्रह्मेत्यादिना ब्रह्मोपासनेन तथं ब्रवीति ॥ नानाशब्दादिभे
दात् सद्विद्यादहरविद्याशांडिल्यविद्याभूमविद्यादिका ब्रह्मोपासनरूपब्रह्मोपासनरूपब्रह्मप्राप्तिफलाः किमेकविद्या उत नेने
तिसंशयः उपास्यब्रह्मण एकफलस्य चैकत्वात् वेदोपासीतेति च पर्यायत्वादेकविद्येति पूर्वपक्षः ब्रह्मैकत्वेपि जगदेककारण
त्वापहतपाप्मत्वादिरूपानुबंधभेदहेतुभिः पूर्वकांडोदितशब्दांतरादिभिरेवानुबंधभेदमापन्ना नानाभूता विद्येति राद्धांतः
शब्दांतरादिभिस्तत्रत्योदितैरेव विद्याभेदसिद्धवपीडपुनर्वचनं ब्रह्मप्राप्तिहेतुभूतं वेदांतोदितं ज्ञानमविधेयमितिकुदृ
ष्टिनिरासार्थं सूत्रार्थः सद्विद्याभूमविद्यादिका नानाभूताः ब्रह्म एकत्वेपि सद्भावापहतपाप्मत्वादिशब्दभेदात् आदिशब्दा
दभ्यासंख्यागुणप्रक्रियानामधेयानि गृह्यंते ॥ विकल्पो विशिष्टफलत्वात् ॥ सद्विद्याभूमविद्यादिकानां ब्रह्मप्राप्तिफ
लानामेकस्मिन्पुरुषे समुच्चयोपि संभवतीति संशयः अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां स्वर्गैकफलानां त
त्र भूयस्त्वापेक्षया यथैकस्मिन् पुरुषे समुच्चयो दृश्यते तथेहापि ब्रह्मानुभवभूयस्त्वापेक्षयैकस्मिन्पुरुषे समुच्च
यः संभवतीति पूर्वपक्षः देशतः कालतः स्वरूपतश्चानवच्छिन्नानंदस्वरूपब्रह्मानुभवः सर्वासां परविद्यानां फलं ।
तच्चैकया विद्यया वाप्तमिति एकस्मिन्पुरुषे विद्यांतरसमुच्चयः प्रयोजनाभावान्न संभवतीति सर्वासां विकल्प इति रा
द्धांतः सूत्रमपि व्याख्यातम् ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ब्रह्मप्राप्तिव्यतिरिक्तफलविद्याः

पुरुषार्थोतश्शब्दादिति बादरायणः किं विद्यातः पुरुषार्थः उत कर्म्मणः उत कर्म्मण इति संशयः कर्म्मण इति पूर्वपक्षः कर्म्मा
ङ्गत्वाद्विद्यायाः कर्म्मसु कर्तृभूतप्रत्यगात्मनो याथात्म्यप्रतिपादनपराणि वेदान्तवाक्यानि विद्यायाः कर्म्माङ्गत्वं च यदेव वि
वे०दी० द्यया करोतीति तदेव वीर्यवत्तरं भवतीति श्रुत्यावगम्यते न च प्रकृतोद्गीथोपासनविषयत्वमस्या वक्तुं शक्यते यदेव विद्य
७३ या करोतीति श्रुत्यैव सर्वकर्म्मसु विद्याया विनियुक्तत्वात् श्रुतिश्च प्रकरणात् बलीयसी विद्यायाः कर्म्माङ्गत्वं कथमित्य
पेक्षायां तत्त्वमस्यायमात्मा ब्रह्मेति सामानाधिकरण्येन कर्म्माङ्गभूतकर्तृयाथात्म्यानुसंधानद्वारेण विद्यायाः कर्म्माङ्ग
त्वमित्यवगम्यते अतः कर्तृसंस्कारत्वादुक्त विद्यायाः कर्म्मण एव पुरुषार्थः तत्र तत्र फलश्रुतिरर्थवादः स्यात् विद्यायाः
72 कर्म्माङ्गत्वे भूयांसि लिङ्गानि च दृश्यन्ते सर्ववेदान्तेषु राद्धान्तस्तु कर्म्मसु कर्तुः प्रत्यगात्मनो याथात्म्यभूतस्य संकल्पकृतजगदुद
यविभवलीलस्य निखिलहेयप्रत्यनीककल्याणैकतानानन्दैकस्वरूपस्य सर्वेश्वरस्य सत्यसंकल्पस्य करणाधिपरूपप्र
त्यगात्माधिपस्येव घस्य वेदनरूपायाः विद्याया ब्रह्मविदाप्नोति परमित्यादिषु ब्रह्मप्राप्तिरूपफलोपदेशात् विद्यात एव फ
लं यदेव विद्यया करोतीति श्रुतिः प्रसिद्धवन्निर्देशात् प्रसिद्धश्च प्रकृतोद्गीथोपासनस्यैव प्रस्तुतोद्गीथोपासनविशे
षनिष्ठा तत्त्वमसीति सामानाधिकरण्यं च तच्छब्दनिर्दिष्टस्वसंकल्पकृतजगज्जन्मस्थितिध्वंसाधिकरणस्य परस्य ब्रह्म। राम
णोनुजीवस्वरूपत्वपरं अपि तु जगत्कारणस्य ब्रह्मणो जीवशरीरकतया जीवस्यात्मत्वपरमित्यधिकं तु भेदनिर्देशा ७३

मुपासीतेति विधानाच्च वर्तमाननिर्देशावगतफलसंबंधात् प्रागेवोद्गीथसंबंधोऽवगत इति तदंगभावो न विरुद्ध इत्यतो न त उपा
दाननियमः समाहारात् इत्यत्र होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरतीति दुरुद्गीथं वेदनहीनमुद्गीथं वेदनव
त्तेन समाधानं ब्रुवती श्रुतिर्वेदनस्योपादाननियमं दर्शयति गुणसाधारण्यश्रुतेश्च इत्यत्रोपादाननियमोऽवगम्यते प्र
णवगुणत्वेनावगतस्योपादानस्य साधारण्यं श्रूयते तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गा
यतीति तेनेति श्रुतपरामर्शात् सोपासन एव प्रणवः सर्वत्र संचरति कुतः प्रणवसहभावनियमदर्शनात् उपादाननियमो
निश्चीयते न चास्तत्सहभावाश्रुतेः न चोपादाननियमः तत्सहभावाश्रुतेः क्रत्वंगभावाश्रुतेरित्यर्थः क्रत्वंगभावो हि स
हभावः यदेव विद्यया करोति तदेव वीर्यवत्तरमिति वीर्यवत्तरत्वसाधनतयावगताया विद्यायाः क्रत्वंगतया विनियो
गासंभवात् तदंगभावो हि न कल्प्यते यत्र साक्षात्फलसाधनत्वं प्रतिपाद्यते न त्वफलसाधनत्वं प्रथमं प्रतीयत इति
तस्य क्रत्वंगतया विनियोगो न संभवतीत्यभिप्रायः दर्शनाच्च एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षतीति
ब्रह्मणो वेदनेन यज्ञस्य यजमानस्य ऋत्विजां च रक्षणं ब्रुवती तेषां वेदनाभावं दर्शयति तच्चोद्गीथोपासनस्यानंग
त्वे सत्येवोपपद्यते अतश्चोपादाननियमः इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे तृतीयस्याध्यायस्य तृतीयः पादः ३

र्वर्त्तेवहि कर्म्माणि जिजीविषेच्छतं समाः इत्यात्मविदामायुषः कर्मसु नियमदर्शनाच्च कर्म्मण एव पुरुषार्थः न विद्यात
वे०टी० इत्यवगम्यते अतश्च विद्या कर्म्माङ्गम् अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् तु शब्दात्पक्षो व्यावर्त्तः न विद्या
७४ कर्म्माङ्गमपि तु विद्यातः पुरुषार्थ इति बादरायणस्यैवं विद्यातः फलमिति मतं कुतः अधिकोपदेशात् कर्म्मकर्त्तुः संसा
रिणो ऽधिकस्यार्थान्तरभूतस्यैवेद्यस्य वेदनरूपविद्यायाः फलसाधनत्वोपदेशात्तद्दर्शनात् ह्यपेक्षितेहि वेदान्तवाक्ये
धिक विषयत्वं विद्यायाः एवमेव हि तत्तैरीये तत्रैव बहुस्यां प्रजायेयेति सोऽकामयत बहु स्यां प्रजायेयेत्यादिषु बहुभवनसंक
73 ल्पपूर्वकसृष्ट्यादेः कृतः सर्वेश्वरस्य करणाधिपाधिपस्यानुबंधिकातिशयज्ञानानंदैकरूपस्य निखिलहेयप्रत्यनी
कस्यैवेद्यस्य विद्याब्रह्मप्राप्तिफलाय विधीयते तुल्यं तु दर्शनम् विद्यायाः प्रधानत्वेपि ब्रह्मविदामाचारदर्शनं तु
ल्यं कर्म्मणामनाचारदर्शनमप्यस्ति स्यर्थऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे इ
त्यादौ कर्म्मानुष्ठानं तु फलाभिसंधिरहितस्य कर्म्मणो विद्यांगत्वात् त्यागस्तु फलाभिसंधियुक्तस्य विद्याविरोधित्वा
दित्यभिप्रायः असार्वत्रिकी यदेव विद्यया करोतीति श्रुतिः स्तुति विद्यायाः कर्म्माङ्गत्वे विदधातीति नेतदसंगतं अ
त्र विद्याशब्दाभिहितानुनसार्वत्रिकी अपितूद्गीथविद्याय करोतीति तद्विधेति नैवं यस्मान्वयः अपितु यदेव विद्यया क राम
रोतीतदेव वीर्यवत्तरमिति विद्यायाः क्रियमाणस्यान्यतो वगतस्य वीर्य्यवत्तरत्वं प्रति साधनभावो गम्यते यदेवेतिप्रसि। ७४

दित्यादिषूक्तेर्यच्चात्मनि तिष्ठन् यस्यात्मा शरीरमिति च प्रत्यगात्मन आत्मत्वं परं स्य ब्रह्मणः श्रुतं नरेऽतः सूत्रार्थः पुरुषार्थो।
ऽतो विद्यातः कुतः ब्रह्मविदाप्नोति परमित्यादिशब्दात् शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः तत्त्वमसीत्यादिना सा।
मानाधिकरण्येन ब्रह्मणः कर्मसु कर्तृस्वरूपत्वावगमात् विद्यायाः कर्तृसंस्कारद्वारेण कर्मशेषत्वात्तत्र पुरुषार्थ
वादोऽर्थवादमात्रं यथान्येषु द्रव्यसंस्कारादिष्विति जैमिनिराचार्यो मन्यते आचारदर्शनात् इतश्च विद्या कर्माङ्गं ब्रह्म
विदामाचारो कर्मप्रधानो दृश्यते यथाश्वपतिः केकयो ब्रह्मविद्गौतमे रोयक्ष्यमाणो ह वै भगवन्तोऽहमस्मीत्याह कर्मणै
वहि संसिद्धिमास्थिता जनकादय इति च स्मर्यते लिंगमिदं श्रुतिस्मृत्यनामित्यर्थः तच्छ्रुतेः यदेव विद्यया करोतीत्या।
दिकायाः श्रुतेर्विद्यायाः कर्माङ्गत्वमवगम्यते न च दुर्बलेन प्रकरणेन श्रुतिर्विद्यासामान्यविषयोऽद्गीथोपासनवि।
शेषे व्यवस्थाप्यते समन्वारम्भणात् तं विद्याकर्मणी समन्वारभेते इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यं च विद्या।
याः कर्माङ्गत्वे समवैव भवति तद्वतो विधानात् विद्यावतः कर्मविधानाच्च विद्या कर्माङ्गं आचार्यकुलाद्वेदम।
धीत्याभिसमावृत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे इत्यादिनाध्ययनवतः क।
र्माणि विदधच्छ्रुत्या विशेषपर्यन्तत्वादध्ययनस्य विद्यावत एव कर्माणि विदधातीत्यवगम्यते नियमाच्च कु

ब्रह्मविद्यादर्शनात् नेत्युच्यते अग्निहोत्रादिकर्म्माभावात्तद्विद्याकर्म्माङ्गत्वेन चाश्रमान्तरस्याव्यक्ततो वैदिके शब्देऽपि दृष्टत्वे त्रयो धर्म्म(
स्कंधाः ये चेमेऽरण्ये श्रद्धां तप इत्युपासते एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति तस्मादेव यावज्जीवमग्निहोत्रमित्यादिकात्तु श्रुतेर(
वे॰दी॰ विरक्तविषया । परामर्शं जैमिनिरचोदना चापवदति हि । त्रयो धर्म्मस्कंधा इत्यादिवाक्येष्वाश्रमाणामचोदनादविधानादुपास
१५ नस्तुत्यर्थपरामर्शानुवादं जैमिनिराचार्य्यो मन्यते अपवदति चाश्रमान्तरं वीरहा वा एष देवानां योऽग्निमुद्वासयत इत्या
दिका । अतस्तेन संन्यासमनुष्ठेयं बादरायणः साम्यश्रुतेः । गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते कु
74 तः तस्यापि तत्साम्यश्रुतेः त्रयो धर्म्मस्कंधा इत्येवमादौ हि सर्वेषामाश्रमाणामेकरूपं हि कीर्तितम् । विधिर्वा धारणवत् । वाशब्दो
वधारणे सर्वेषामाश्रमाणां विधिरेवायं धारणवत् यथाऽधस्तात्समिधं धारयन्ननुद्रवेत् उपरि हि देवेभ्यो धारयतीत्यनुवादस
रूपोऽप्युपरिधारणस्याप्राप्तत्वेन विधिराश्रीयते एवमिहाश्रमाणामपि अत ऊर्ध्वरेतःस्वपि विद्यादर्शनाद्विद्यातः पुरुषार्थ इति ।
स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् भावशब्दाच्च । ओमित्येतदक्षरमुद्गीथमुपासीत स एष रसानां रसतमः परमः परा
र्ध्योऽष्टमो यदुद्गीथ इत्येवंजातीयके किं कर्म्माङ्गाश्रयाणां दृष्टिविशेषाणां विधिरास्थेयः उत उद्गीथादिस्तुतिमात्रमिति संशयः(
विधित्वासिद्धेर्हि गोदोहनादिवत् भवति विधित्वमेव न संभवतीति पूर्वपक्षः इयमेव जुहूर्यं स्वर्गलोक आहवनीय इति वा कर्(राम
म्माङ्गभूतोद्गीथादिसंबन्धितयोपादानाद्रसतमत्वादिस्तुतिमात्रमेव न रसतमत्वादिदृष्टिविधिः राजानं सुजुह्वादिविधिव १५
दुद्गीथादिविधेरत्रासन्निधानाद्रसतमत्वादेरप्राप्तत्वाच्चोपासीतेति विधिश्रवणान्न स्तुतिमात्रं तद्दृष्टिविधिरेव सूत्रद्वयं व्याख्या

द्वयोस्तु निर्देशात्. अन्यतोऽवगतिस्तूद्गीथमुपासीतेति सन्निहितोद्गीथविद्यायाः विभागः शतवत्. न विद्याकर्मणी समन्वारभेते इत्यत्र विद्या
च स्वस्मै फलायान्वारभेते इति विभागो द्रष्टव्यः यतो विद्याकर्मणोर्भिन्नफलत्वमुक्तं शतवत् यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेती
त्युक्ते क्षेत्रार्थं शतमिति विभागो गम्यते तद्वत्. अध्ययनमात्रवतः. वेदमधीते अध्ययनमात्रवत एव कर्मविधानादनेन विद्यायाः न
कर्माङ्गत्वमवगतम्. अध्ययनविधिर्हि अध्ययनवदक्षरराशिग्रहणमात्रे पर्यवस्यति गृहीतस्य स्वाध्यायस्य फलवदर्थावबो
धित्वदर्शनात् निर्णयफलमीमांसाश्रवणेऽधीतवेदः स्वयमेव प्रवर्तते अर्थावबोधपर्यन्तत्वेऽपि अर्थज्ञानादर्थान्तरभूतायास्तूप
वृत्तिरूपा विद्योपासीतेति शास्त्रविहितविधानकर्माङ्गम्. नाविशेषात्. कुर्वन्नेवेह कर्माणीति ब्रह्मविदा पुंसः कर्मेति यतो
श्रूयते इत्येतन्न सम्भवति अविशेषात् विदुष एवेति विशेषाभावात् किमित्यविदुषो न स्यात् विदुषस्त्वाप्रयाणादुपासनानुवृत्तिदर्शना
दर्थस्वभावाद्विदुष एवेत्यभिप्रायः. स्तुतयेऽनुमतिर्वा. वा शब्दोऽवधारणे ईशावास्यमिदं सर्वमिति विद्याप्रकरणात् विद्यास्तुतये क
र्मानुमतिरेव विद्यामाहात्म्यात् सर्वदा कर्माणि कुर्वन्नपि ते न लिप्यत इति हि स्तुतिर्भवति विद्यावाक्यशेषश्च न कर्म न लिप्यते नर
इति श्रूयते. कामकारेण चैके. केचन शाखिनः कामचारेण च विधानि हस्य गार्हस्थ्यात्यागमधीयते किं प्रजया करिष्यामो येषां नो
यमात्मायं लोक इति गार्हस्थ्यकर्मत्यागं ब्रुवता विद्याप्रधानमिति दर्शयति. उपमर्दं च. विद्यया सर्वकर्मोपमर्दनं चाधीय
ते क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति तद्धि विद्यायाः कर्माङ्गत्वेन संगच्छते. ऊर्ध्वरेतस्सु च शब्दे हि. ऊर्ध्वरेतस्सु आश्रमेषु

यज्ञादयो विद्यांगत्वेन विनियुक्तास्ते अतो गृहस्थस्य तु तदपेक्षा या इच्छायाऽप्रमाणप्रधानत्वाद्यप्रमाणं ज्ञानमेव तदंगकमित्यर्थः तो का
म्यते यथाश्वो गमनसाधनभूतोऽपि स्वपरिकरं धर्मपरिकर्मापेक्षः एवं मोक्षसाधनभूतविद्यानित्यनैमित्तिकपरिकर्मापेक्षाऽ
वे०दी० दृष्टेतस्तु च स्वाश्रमविहितकर्मैव परिकरकर्म भवतीति ते यद्यपि विद्यासंबंधशास्त्रात् स्वाश्रमे शास्त्रैकसमधिगमे हि यथाशास्त्र
१६ मभ्युपगंतव्यं सूत्रमपि आरभ्यातम् शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् किं विद्यानिष्प
त्तये गृहस्थैः शमदमादय उपादेया उत नेति संशयः गृहस्थानां करणभावारूपकर्मांगत्वाद्विद्यायाः तद्विपरीतरूपशमदमा(
द्युपादानासामर्थ्याद् दूरितः मुक्तकर्मरहितेषु शमदमादिविनियोगो भविष्यति यथा यज्ञादिविनियोगः कर्मवत्सु गृहस्थेषु त(
स्मात् गृहस्थैरनुपादेयाः शमादय इति पूर्वपक्षः राद्धांतस्तु तस्मादेवंवित् शांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्ये
वात्मानं पश्येदिति सामान्येन विद्यांगतया विनियोगात् गृहस्थैरनुपादेयाः न च कर्मवतां तेषां शमदमाद्युपादानासाम(
र्थ्यं भिन्नविषयत्वाच्छमादीनां विहितेषु हि कर्मसु व्यापारः अविहितेषु प्रयोजनशून्येषु च शमादयः अतः शमादिविनि(
योगो यज्ञादिविनियोगवत् संकोचमर्हति सूत्रार्थः यद्यपि गृहस्थो यज्ञादिकर्मसु विनियुक्तः तथापि हि शमदमाद्युपेतः स्या
त् कुतः शांतो दांत इत्यादिना तद्विधेस्तदंगतया विद्यानिष्पत्तये तेषामवश्यानुष्ठेयत्वाद्बाह्यकारणानि व्यापत्वाच्छमदमादि राम
भिरेव विद्यानिष्पत्तिरित्यर्थः यज्ञादिकर्माण्यपि पापनिर्हरणद्वारेणैकाग्रतामापादयंतीत्यभिप्रायः ० सर्वान्नानुमतिश्च १६

तम्॰ पारिप्लवार्था इति चेन्न विशेषितत्वात् तथा चैकवाक्योपबंधात् ॰ प्रतर्दनो ह वै दैवोदासिरित्याद्यो वेदान्तेष्वाख्यानविशेषाः किं
परिप्लवप्रयोगार्था उत तत्र तत्र विद्याविशेषप्रतिपादनार्था इति संशयः आख्यानानि संशंसन्तीत्याख्यानानां परिप्लवे विनियो
गात् तदर्था इति पूर्वपक्षः राद्धान्तस्तु आख्यानानि शंसतीत्युक्ता मनुर्वैवस्वतो राजेत्यादीनामेवाख्यानानां विनियोगस्य विशेषितत्वा
त् तस्मादायुरमेतमित्युपास्स्वात्मा वा अरे द्रष्टव्य इत्यादिविधिनैकवाक्यत्वाच्च सोरोदीदित्यादिवत् विद्याविध्यर्थमेव सूत्रद
यमपि व्याख्यातं अत एव चाग्नीन्धनाद्यनपेक्षा ३।४।२५ इतः प्राक्रमे पूर्वत्र विद्यासंभवतिरिति संशयः यज्ञादीनामाश्रमाणां च तदंगि
कां विद्यां न संभवतीति पूर्वपक्षः राद्धान्तस्तु यदीच्छन्तो ब्रह्मचर्यं चरन्तीति एवमेतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्तीत्यादिश्रुतिभि
स्तेषां विद्यावत्त्वावगमात् तेषामग्निहोत्राद्यनपेक्षा विद्येति निश्चीयते सूत्रार्थः अत एव विद्यावत्त्वं श्रुतेरेव आधानाद्यनपेक्षत्वात्
सु विद्याग्नीन्धनं ह्याधानम् सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् कर्मवत्सु गृहस्थेषु किं यज्ञादिकमपेक्षा उत तत्रापि केवले
वेति संशयः ३।४।२६ तस्तु यज्ञाद्यनपेक्षैव अस्मत् न च साधायतिचेत्कर्मनिरपेक्षाया एव साधनत्वमभ्युपगमनीयमतस्तत्पाप्तेति गृ
हस्थेष्वपि तन्निरपेक्षैव स्वाधयितुं समर्थेति पूर्वपक्षः न हि स्वर्गादिसाधनमतामग्निहोत्रादिकमं पुरुषभेदेन नानाविधां
गकं इष्टं विविदिषन्तीति शब्दोऽपि वेदने छायामेव कर्माणि विनियुंक्ते न विद्यायां राद्धान्तस्तु कर्मवत्सु गृहस्थेषु यज्ञादिस
र्वकर्मापेक्षा विद्या कुतः यज्ञादिश्रुतेः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्तीति यज्ञेन दानेन तपसानाशकेनेति हि

वे०दी०
११

यथाग्निहोत्रादीनामेव कर्मणां जीवनाधिकारकर्माधिकारयोरेवाधिकारभेदस्यास्फुटत्वात् स्फुटीकरणाय पुनरिह चिं-
त्यते सूत्रार्थः यावज्जीवमग्निहोत्रं जुहुयादित्यादिना केवलगृहस्थाश्रमिणो जीवननिमित्ततया विहितत्वादेव यज्ञादिके-
वलाश्रमकर्मापि सहकारित्वेन च। तमेतं वेदानुवचनेनेत्यादिना विद्यासाधनत्वेन विहितत्वाच्च विद्यासहकारित्वेन।
चानुष्ठेयं यज्ञादिकर्म विनियोगद्वयप्रयुक्तेन विरोधः परिह्रियते इत्यभिप्रायः। सर्वथापि त एवोभयलिंगात्। सर्वथापि
उभयत्र विनियोगेपि त एव यज्ञादयः कुतः उभयलिंगात् उभयत्र प्रत्यभिज्ञानात् लिंगात् अनभिभवं च दर्शयति धर्मेण
पापमपनुदति इत्यादिना तैरेव यज्ञादिभिर्विद्याया उत्पत्तिप्रतिबंधाभावरूपानभिभवं च दर्शयति अत उभयत्र विनियो।
गात्केवलाश्रमिणां मुमुक्षूणां चानुष्ठेया यज्ञादयः। अंतरा चापि तु तद्दृष्टेः विदुरादीनामनाश्रमिणां ब्रह्मविद्या-
यामधिकारोस्ति नेति संशयः आश्रमधर्मेतिकर्तव्यताकत्वात् विद्यायास्तदभावात्तेषामनधिकार इति पूर्वपक्षः
राद्धांतस्तु उच्यते रैक्वादिष्वनाश्रमिषु विद्यानिष्ठत्वदर्शनात् आश्रमानियतैर्जपोपवासादिभिरेव तेषां विद्या-
नुग्रहो भवतीत्यस्त्येवाधिकारः सूत्रार्थस्तु तुशब्दः पक्षव्यावृत्त्यर्थः चशब्दोवधारणे अंतरापि आश्रमांतरापि वर्त- राम
मानानामनाश्रमिणामप्यधिकारोस्त्येव कुतः तद्दृष्टेः रैक्वादिषु विद्यानिष्ठत्वदृष्टेः अपि स्मर्यते। अपि चानाश्रमिणा- ११
मपि जपादिभिरेव विद्यानुग्रहः स्मर्यते जप्येनैव तु संसिद्ध्येदित्यादिना। विशेषानुग्रहश्च। आश्रमानियतधर्मवि।

76

प्राणात्यये तद्दर्शनात् वाजिनां छांदोगानां च प्राणविद्यायां न ह वा एवंविदि किंच नानन्नं भवतीति सर्वान्नानुमतिः संकीर्त्यते किं प्राणवि
दः सर्वान्नानुमतिः उत प्राणात्ययापन्नावितिसंशयः अविशेषात्सर्वदेति पूर्वपक्षः अपि शपितशाके ब्रह्मविदोपि ह्युच्छिष्टपर्युषि
तभक्षणयोः प्राणात्ययापन्नावेव दर्शनादल्पशक्तेः प्राणविदः किं पुनरिति प्राणात्ययापन्नावेवेति राद्धांतः सूत्रार्थः च शब्दोवधा
रणे विदः सर्वान्नानुमतिः प्राणात्यये एव कुतः तद्दर्शनात् अतिशपितशाके ब्रह्मविदः प्राणात्ययापन्नावेव सर्वान्नानुमति दर्श
नात्॰ अबाधाच्च॰ आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरित्याहारशुद्धिविधेरबाधाच्च प्राणात्यय एव अपि च स्म
र्यते॰ प्राणसंशयमापन्नो योन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवांभसेति प्राणसंशय एव सर्वान्नानुमतिः स्म
र्यते च॰ शब्दश्चातो कामकारे॰ यतः सर्वान्नानुमतिः प्राणात्यये अतः कामकारे प्रतिषेधकः शब्दश्चोपपद्यते इत्यर्थः अस्ति
हि काठकानां कामकारे प्रतिषेधकः शब्दः तस्माद्ब्राह्मणः सुरां न पिबति पाप्मना नोत्सृजा इतीति वा पाप्मना संसृष्टो न भवा
मीति मत्त्वा सुरां न पिबतीत्यर्थः ७ विहितत्वाच्चाश्रमकर्मापि॰ किं यज्ञादयो विद्यांगभूताः केवलाश्रमस्याप्यंगभूताः उत
नेति संशयः केवलाश्रमस्याप्यंगत्वे नित्यानित्यसंयोगरूपविरोधः असंभवेत इति नांगभूताः केवलाश्रमस्येति पूर्वप
क्षः शङ्कान्तस्तु यदेकेनैव विनियोगेनोभयांगत्वमिष्यते तदा नित्यानित्यसंयोगविरोधः इह तु यावज्जीवमग्निहोत्रं जु
हुयात्तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति विनियोग प्रयुक्ते न विरोधः १ स्त्रीयते

र्वमपीत्येके भावमशनवत्तदुक्तम् एते प्रायश्चित्तभावमपि मन्यंते यत उपपूर्वमुपपातकमिदमशनवन्मध्वशनादिति॥
षेधतत्प्रायश्चित्तवद्भवत्येवेत्यर्थः कृत उपकुर्वाणब्रह्मचारिण उक्तमाधिकारिकमस्यापि भवति तदुक्तं स्मृतिकारैः अन्येषां चै
वे०दी० तदविरोधीति उपकुर्वाणब्रह्मचारिण उक्तो धर्मः उत्तरेषां चाश्रमिणां स्वाश्रमाविरोधी भवत्येवेत्यर्थः वहिस्तूभयथा।
२८ स्मृतेराचाराच्च॰ उभयथापि उपपातकित्वे महापातकित्वेपि नैष्ठिकाद्यच्युतो वहिर्भूतः कर्माधिकारात् प्रायश्चित्तेन वश्या
मीति स्मृतेराचाराच्च वर्जयंत्येनं शिष्टविद्योपदेशादौ यद्यपि कल्मषनिर्हरणाय केचित्प्रायश्चित्तमुपदिशंति तथापि क
र्म्माधिकारापादनीं शुद्धिमेषां न संभवतीत्यभिप्रायः स्वामिनः फलश्रुतेरित्यात्रेयः उद्गीथाद्युपासनानि किं यजमानेनानुष्ठे
यं उत ऋत्विजेति संशयः यदेव विद्यया करोतीति तदेव वीर्यवत्तरमिति क्रतुवीर्यवत्तरत्वफलं यजमानस्येति दहरोपासनादि
वद्यजमानेनानुष्ठेयमिति पूर्वपक्षः कर्म्मांगाश्रयत्वादस्योपासनस्य कर्म्मणां चार्त्विज्यत्वेनैतदपि ऋत्विजानुष्ठेयं गोदोह
नादिवदिति राद्धांतः सूत्रार्थः स्वामिनो यजमानस्योद्गीथाद्युपासने कर्तृत्वं कुतः तस्यैव फलश्रुतेरित्यात्रेयो मन्यते आर्त्वि
ज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते॰ ऋत्विक्त्वेन क्रतुवधिकृतस्यैवास्मिन्नुपासनेधिकारात् क्रतोश्चार्त्विज्यत्वेनैतदप्या
र्त्विज्यमित्यौडुलोमिराचार्यो मन्यते यजमानफलसाधनत्वेपि क्रतोस्तदनुष्ठाना यऋत्विक् परिक्रियते॰ सहकार्यंतर। राम
विधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पांडित्यं च निर्विद्याथ। २८

शेषेण विद्यानुग्रहः श्रूयते च तपसा ब्रह्मचर्य्येण श्रद्धया विद्ययात्मानमन्विष्यति। अतस्त्वितरज्ज्यायो लिंगाच्च। अतो नाश्रमित्वादि
तरदाश्रमित्वं ज्यायः धर्म्मभूयस्त्वाल्लिंगाच्च स्मृतेश्चेत्यर्थः अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः इति हि स्मर्य्यते तस्मादनाश्रमित्वेन
विद्यानिष्ठत्वमापद्विषयमित्यभिप्रायः। तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्भावेभ्यः। नैष्ठिकवैखानसपरिव्राजकानां
स्वाश्रमेभ्यः प्रच्युतानामपि विद्याधिकारोऽस्ति न वेति संशयः विदुरादिवज्जपादिभिरपि तदनुष्ठानसंभवादस्त्वधिकार इति पूर्व
पक्षः राद्धान्तस्तु नैष्ठिकादीनां स्वाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणात् शिष्टबहिष्कृतत्वाच्च तेषामनधिकारः सूत्रार्थः तद्भू
तस्य तु नातद्भावः नैष्ठिकादिभूतस्यातद्भावोऽन्यथाभावो न भवति कुतः तद्भूततद्रूपाभावेभ्यस्तत्कुतः शास्त्रे नियमात्तद्रूपाभा
वाः नैष्ठिकादिधर्म्माभावाः तेभ्यो नियच्छति हि शास्त्राणि ब्रह्मचार्य्याचार्य्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्य्यकुले
वासादयन्निति नैष्ठिकस्य तत्रैव नियमः अरण्यमीयात्ततो न पुनरेयादिति वैखानसस्य संन्यस्याग्नीन्न पुनरावर्तयेदिति च परि
व्राजकस्य अतस्तेषामनाश्रमित्वेनावस्थानाभावान्न विद्याधिकारो न संभवतीति जैमिनिरप्यवगतेऽयम् न चाधिकारि
कमपि पतनानुमानात्तदयोगात्। आधिकारिकमधिकारलक्षणोक्तं अविकीर्णपशुवच्च तद्वदिमेतत् प्रायश्चित्तं नैष्ठि
कस्य न संभवति पतनानुमानान्नैष्ठिकस्य तदयोगात् स हि पतनं स्मर्य्यते प्रायश्चित्ताभाववचनेन आरूढो नैष्ठिकं धर्म्मं
यस्तु प्रच्यवते द्विजः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति अतः उपकुर्वाणब्रह्मचारिविषयमाधिकारिकं उपपू

स्तुतेप्रतिबंधेतद्दर्शनात् मोक्षव्यतिरिक्ताभ्युदयफलमुपासनम् किंस्वसाधनभूतपुण्यकर्मानंतरमेवोपपद्यते उतानंतरमन्यदे
ब्र०दी० वेत्यनियम इति संशयः साधननिर्वृत्तौ विलंबहेत्वभावादनंतरमेवेति पूर्वपक्षः राद्धांतस्तु अप्रबलकर्मांतरप्रतिबंधे सत्यनंत
७९ रंप्रस्तुते सति तदुत्तरकालानियमः दृश्यते हि प्रबलकर्मांतरेण फलप्रतिबंधः यदेव विद्यया करोति तदेव वीर्यवत्तरमित्यु
द्गीथोपासनस्य कर्मांतरेण फलाप्रतिबंधः फलमित्यभ्युपगमात् सूत्रमपि आरब्धा तं ऐहिकमभ्युदयफलमित्यर्थः एवं
मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः किं मुक्तिफलान्युपासनानि स्वसाधनभूतानि शायपुण्यकर्मानंतरमु
78 त्पाद्यंते उत पूर्ववदनियम इति संशयः मुक्तिफलोपासनसाधनभूतकर्मणां सर्वकर्मभ्यो बलवत्तरत्वेन प्रतिबंधाभावादनं
तरमेवोत्पाद्यंते इति पूर्वपक्षः तत्रापि ब्रह्मविदपचारस्य ततोपि बलवत्तरत्वेन बंधसंभवादनियम एवेति राद्धांतः सूत्रार्थः मुक्ति
फलानामप्येवानियमः कुतः तदवस्थावधृतेः प्रतिबंधाभावे सति फलकालावधृतेः द्विरुक्तिरध्यायपादसमाप्तिं द्योतयति ॥
ब्रूगव ४ इति श्रीमद्रामानुजविरचिते वेदांतदीपे व्यासकर्तृकब्रह्मसूत्रवृत्तौ तृतीयस्याध्यायस्य चतुर्थः पादः ॥४॥ आवृत्तिरसकृदु
पदेशात् ब्रह्मविदाप्नोति परं तमेवं विद्वानमृत इह भवति इत्यादि वेदांतविहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थः उतास
कृदावृत्तमिति संशयः स यो ह वैतत्परं ब्रह्म वेद ब्रह्मैव भवतीति ब्रह्मवेदनस्य परप्राप्तिसाधनत्वश्रुतेः सकृत्कृतेपि वे राम
दने शास्त्रार्थनिवृत्तेः सकृदेवेति पूर्वपक्षः राद्धांतस्तु यस्तद्वेद स वेद समयैतदुक्त इत्युपक्रम्य अनु म एतां भगवो देवतां सा ७९

मुनिरित्यत्र मौनं विद्यांगतया विधीयते उतानूद्यत इति संशयः मौनस्य मननरूपत्वाच्छ्रोतव्यो मंतव्य इति च प्राप्तत्वेनानूद्यत इति पूर्वपक्षः राद्धांतः
स्तु मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धेः प्रकृष्टमननमुपास्यविषयाभ्यासरूपं विद्यानिष्पत्तये विधीयत इति सूत्रार्थः तद्वतो विद्यावतस्स
हकार्यंतरं मौनं विधीयत इति मौनविधिरुक्तं विध्यादिवदत्रापि विधीयत इति विधिः यज्ञदानप्रभृत्याश्रमधर्माः आदिशब्दाच्छ्र
वणमनने गृह्येते आश्रमधर्मवत् श्रवणमननवच्च पांडित्यबाल्ययोस्तृतीयं सहकार्यंतरं मौनमपूर्वं विधीयते कुत इत्यत्राह पक्षे
णेति मुनिशब्दस्य प्रकृष्टमननयुक्तेन पक्षेण प्रसिद्धेरित्यर्थः कृत्स्नभावात्तु गृहिणोपसंहारः सर्वाश्रमिणां विद्यावत्त्वेपि छांदोग्ये
स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यत इति गृहस्थधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः कुतः कृत्स्नभा
वात् कृत्स्नेष्वाश्रमिष्वपि विद्यायास्संभवादित्यर्थः मौनवदितरेषामप्युपदेशात् अथ मुनिरित्येतस्मिन्नपि वाक्ये अथ भिक्षाचर्यं
चरंतीति पारिव्राज्यैकांतधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः भिक्षाचर्यं मौनादिवदितरेषां चाश्रमधर्माणां यज्ञादी
नामुपदेशात् अनाविष्कुर्वन्नन्वयात् तस्माद्ब्राह्मणः पांडित्यं निर्विद्य बाल्येन तिष्ठासेदित्यत्र किं बाल्यस्य कर्म कामाचा
रादिकं सर्वं विद्योपादेयं उत विद्यामाहात्म्यानाविष्कार इति संशयः बाल्येन तिष्ठासेदित्यविशेषविधानात्कामचारादिकं स
र्वमप्युपादेयमिति पूर्वपक्षः विदुषो विशेषविधानाद्विद्यामाहात्म्याद्वा निषेधशास्त्रयो बाधितत्वाभावेपि राद्धांतस्तु पांडित्यप्रयुक्तस्व
माहात्म्याद्यनाविष्कार एव विद्यान्वययोग्यतयोपादेयः इतरस्य कामचारादेर्नाविरतो दुश्चरितादित्यादिशास्त्रे विद्योत्पत्तिविरोधि
त्वान्न गम्यते अतो यथा बालः स्वाभिजनाद्यनाविष्कुर्वन्वर्तते यथा विद्वान्वर्ततेत्येतदेवयुक्तं सूत्रमपि व्याख्यातम् ऐहिकमप्र

त्मेवानुसंधेयं यथा मनुष्योऽहमिति स्वशरीरस्य स्वप्रकारत्वैकस्वभावतया प्रकारिणि स्वात्मनि पर्यवसानं तथा स्वात्मनोऽपि परमात्मश-
रीरतया परमात्मप्रकारत्वेन प्रकारिणि परमात्मन्येव सोऽहं बुद्धिशब्दयोः पर्यवसानमित्यस्यार्थस्य स्थेम्नेऽहं ब्रह्मेत्येवोपासीतेत्युक्तं भवति
वे॰दी॰ सूत्रमपि व्याख्यातम् न प्रतीके न हि सः ब्रह्मदृष्टिरुत्कर्षात् मनो ब्रह्मेत्युपासीत इत्यादिप्रतीकोपासनेष्वप्यात्मत्वेनानुसंधानं कर्तव्यमु-
८० त नेति संशयः मनो ब्रह्मेत्युपासीतेति ब्रह्मोपासनत्वाविशेषादात्मत्वेनैवानुसंधेय इति पूर्वपक्षः राद्धान्तस्तु न प्रतीके आत्मानुसंधानं का-
र्यं कुतः न हि मनआदिरूपाणि तुभ्यमात्मानं च न ब्रह्मोपासनं ब्रह्मदृष्ट्या मनआदिरूपास्यः अपकृष्टे तु उत्कृष्टदृष्टिरभ्युदयाय भवतीति य-
79 थाभृत्यादौ राजदृष्टिः सूत्रद्वयं च व्याख्यातम् आदित्यादिमतयश्चाङ्ग उपपत्तेः य एवासौ तपति तमुद्गीथमुपासीतेत्यादिकर्माङ्गाश्रयोपा-
सनेषु किमुद्गीथादावादित्यादिदृष्टिः कार्या उत आदित्यादिषूद्गीथादिदृष्टिरिति संशयः कर्मणः फलसाधनत्वेनोत्कर्षादादित्यादेर्देव-
तात्वेन न्यूनत्वाच्च आदित्यादावुद्गीथादिदृष्टिः कार्येति पूर्वपक्षः राद्धान्तस्तु कर्मणोऽपि फलसाधनत्वमादित्यादिदेवताराधनद्वा-
रेणेत्यादेर्देवोत्कर्षोपपत्तेरादित्यादिमतय एव आदित्यादिदृष्टय एव कर्माङ्गोद्गीथादौ कार्याः सूत्रमपि व्याख्यातम् आ-
सीनः संभवात्। किमिदं ब्रह्मोपासनमासीनः कुर्यादुतासीनः शयानस्तिष्ठन्गच्छन्वेत्यनियम इति संशयः विशेषाश्रवणादनियम इति पूर्वपक्षः राद्धा-
न्तस्त्वासीनस्यैवैकाग्रतासंभवादेकाग्रतामूलत्वाद्ब्रह्मोपासनस्यासीन एव कुर्यात् सूत्रमपि व्याख्यातम् सू॰ ध्यानाच्च निदिध्यासितव्य इत्यु- राम
पासनस्य ध्यानरूपत्वाद्ध्यैकाग्रतावश्यंभाविनी ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितं तैलधारावदविच्छिन्नस्मृतिसंतानरूपं ८०

शिष्टत्वयपि पादेवतामुपास्य इत्येकस्मिन्वाक्ये विद्युपासेत्ति तिरेके एवं प्रयोगदर्शनाच्चैतस्मात्तात्पर्येषु च ब्रह्मविदाप्नोति परं आत्मा वा अरे द्रष्टव्यः श्रो
तव्यो मंतव्यो निदिध्यासितव्य इत्यादिषु ध्यानवेदनयोर्व्यतिकरदर्शनाच्च ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं स्मृतिसंतानरूपं वेदनमेवा
शास्त्रार्थ इति निश्चीयते सूत्रार्थः आवृत्तिरसकृदुपदेशान्न शास्त्रार्थः आवृत्तिरसकृत् असकृदावृत्तं वेदनं ध्यानशब्दवाच्यमित्यर्थः कुतः
उपदेशाद्वेदनविधिसमानशास्त्रे ध्यातव्य उपासितव्य इत्युपदेशात् लिंगाच्च लिंगं स्मृतिः स्मर्यते चायमर्थः मां ध्यायंत उपा
संते तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते तद्रूपप्रत्यये चैकाग्र्यसंततिश्चान्यनिस्पृहा तद्ध्यानं प्रथमैः षड्भिरंगैर्नि
ष्पाद्यते तदेति आत्मेति तूपगच्छंति ग्राहयंति च किं उपास्यं ब्रह्मोपासितुरन्यत्वेनानुसंधेयमुतात्मत्वेनेति संशयः स्थितदनाभ्यां च सुषुप्त्युत्क्रान्त्यो
र्भेदेन अधिकं तु भेदनिर्देशात् अधिकोपदेशादित्यादिषूपासितुरुपास्यस्यान्यत्वोपपादनाद्यथावस्थितस्यैवोपास्यत्वाच्चान्यत्वेनोपास्य
मिति पूर्वपक्षः राद्धान्तस्तु त्वं वाहमस्मि भगवो देवते अहं वै त्वमसीति पूर्वे उपासितार उपास्यमानत्वेनोपगच्छंति तु शब्दोऽवधारणे अत आ
त्मैवोपास्यमिति तानुपासितॄन् प्रत्यगात्मभूतं ब्रह्मण उपासितुरात्मत्वं ग्राहयंति शास्त्राणि अंतर्यामिणि य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा
न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आत्मान्तर्याम्यमृत इत्युपासितापरमात्मनः शरीरं परमात्मा च उपासितुरात्मेति
प्रतिपादनेन तथा सर्वं खल्विदं ब्रह्म तज्जलानिति सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः ऐतदात्म्यमिदं सर्वमिति च तत
दात्स्वरूपस्थितिप्रवृत्तिप्रतिपादनेन च एवमुपासितुः स्वात्मनोऽप्यात्मत्वात् ब्रह्मणो यथावस्थितस्वात्मशरीरकब्रह्मानुसंधानेहम

मपि व्याख्यातम्। इतरस्याप्येवमसंश्लेषः पाते तु। किमसंश्लेषविनाशौ पुण्यकर्मण्यपि समानावुत नेति संशयः। पुण्यकर्मफलस्य सुख
वे०दी० रूपत्वेन विदुषोऽनिष्टत्वाभावान्न समानाविति पूर्वपक्षः। राद्धान्तस्तु मुमुक्षोर्मोक्षविरोधित्वेनानिष्टत्वसामान्यादश्लेषविनाशौ समाना
८२ वेवेत्यर्थः। इतरस्यापि पुण्यस्याप्यनिष्टफलत्वसाम्यादेवमश्लेषविनाशौ विद्यानुगुणं तु वृष्ट्यन्नारोग्यादिफलस्य शरीरपातादूर्ध्व
मनिष्टत्वादश्लेषः। अनारब्धकार्ये एव तु पूर्वे तदवधेः। विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोरविशेषेण विनाशः उतानारब्धकार्य
योरेवेति संशयः। सर्वे पाप्मानः प्रदूयन्त इति विशेषाभावात् अविशेषेणेति पूर्वपक्षः। राद्धान्तस्तु तस्य तावदेव चिरं यावन्न विमोक्ष्ये
ऽथ संपत्स्य इत्युत्पन्नविद्यस्यापि शरीरमोक्षावधिश्रुतेः सर्वविनाशे शरीरस्थित्यनुपपत्तेरनारब्धकार्ययोरेव विनाशः। सूत्रं च
80 व्याख्यातम्। अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्। अग्निहोत्राद्याश्रमधर्माः किं विदुषानुष्ठेया उत नेति संशयः। सुकृतदुष्कृ
तयोरश्लेषविनाशविधानादाश्रमधर्मस्यापि सुकृतसाम्येन काम्यश्लेषादननुष्ठेय इति पूर्वपक्षः। राद्धान्तस्त्वाश्रमधर्मस्य
तु विद्योत्पत्तिरेव कार्यमिति तत्कार्यायैवानुष्ठेयः। कुतः तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेनेत्यादिना वि
द्योत्पत्तिकार्यत्वविधानाच्च। अथवाणारहरहराधेयानित्यनयोक्त्यैव सूत्रं च व्याख्यातम्। यदि अग्निहोत्रादि साधुकृत्या विद्योत्पत्त्यर्था
पूर्वकृताच्च साधुकृत्यादननुभूतफलादारब्धफलाच्च विद्यानष्टा सुहृदः साधुकृत्यामिति तस्य को विषय इत्याशंक्याह। अतोऽन्या
पि ह्येकेषामुभयोः। अतोऽग्निहोत्रादेरन्यापि विद्याधिगमात्पूर्वोत्तरयोः पुण्यकर्मणोरुभयोरपि प्रबलकर्मान्तरप्रतिबंधक राम ८२

मचलत्वंचापेक्ष्य निश्चलत्वंचापेक्ष्य ध्यानवान् यो युक्तिः पृथिव्यादिषु दृश्यते ध्यायतीव पृथिवी ध्यायतीवान्तरीक्षं ध्यायतीव द्यौ
रित्यादिकाश्रुतो ध्यायतः पृथिव्यादिवदचलत्वमासीनस्यैव संभवतीति स्मर्य्यतेऽपि चासीनस्यैव ध्यानं उपविश्यासने युञ्ज्याद्योगमात्मविशुद्ध
ये इति यत्रैकाग्रता तत्राविशेषात् यस्मिन् देशे यस्मिन् काले मनस एकाग्रता तत्र देशकाले चोपासनं कार्य्यं शर्करादिरहिते मनोनुकूले
शुचौ देश इत्येतद्व्यतिरिक्तविशेषाग्रहणाद्युपदेशकाग्रहतायामविशेषः तथा स्थितिगत्यादौ आसीनस्य तु विशेषोक्तीत्यभिप्रायः
आ प्रयाणात् तत्रापि हि दृष्टम् तदिदमपवर्गसाधनमुपासनमेकस्मिन्नहनि कार्य्यमुत प्रत्यहमाप्रयाणमनुवर्त्तनीयमिति संशयः ए
कस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वान्नावर्त्तनीयं यावदायुरिति तु वचनं विधिशब्दाभावान्नादिघाधाः फलेनोपसंहारव
दिति पूर्वपक्षः राद्धान्तस्तु आ प्रयाणादनुवर्त्तनीयं कुतः तत्रापि हि दृष्टं स खल्वेवं वर्त्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते इ
त्यप्राप्तत्वेनानुवादासंभवाद्विधिरेवायमिति तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् विद्याप्राप्त उत्तरपूर्वाघयोरश्ले
षविनाशौ किं संभवत उत नेति संशयः नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति भोगादेव कर्मक्षयश्रवणादश्लेषविनाशक्लृ
प्तिः कथंचिद्विद्यास्तुतपर्यतया नेयमिति पूर्वपक्षः राद्धान्तस्तु द्वयोः शास्त्रयोर्भिन्नविषयत्वेन विरोधाभावात् संभवत एव कर्मणो
हि फलजननसामर्थ्यं दृष्टं यदि नाभुक्तं क्षीयते कर्मेति एवमेवंविदि पापं कर्म न श्लिष्यते एवं हास्य सर्वे पाप्मानः प्रदूयन्ते इति च
क्षितिर्विद्यायास्तत्सामर्थ्यनिवारणशक्तिविषयेति यथाग्निसोष्णीतजननीगतनिवारणशक्तिविषये प्रमाणेन विरुद्धेनेस्व

वे०टी०
८२

81

एषतु पक्षो वाचो मनसि संयोगमात्रमुच्यते न तु लयः अत एव तदानीं सर्वाणीन्द्रियाणि वाचमनु मनसि संपद्यन्ते इति वचनमुप
पन्नं तस्मादुपशान्ततेजाः पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैरिति तन्मनः प्राण उत्तरात् मनः प्राण इत्यत्र किं प्राणशब्देना
प उच्यन्ते उत प्राण एवेति संशयः प्राणस्य मनःप्रकृतित्वाभावात् अन्नमयं हि सोम्य मनः इति मनसोऽन्नमयत्वश्रवणात् अ
पां चान्नस्य प्रकृतित्वेन तत्संपत्तिरूपपद्यते प्राणशब्देनाप उच्यन्ते इति पूर्वपक्षः आपोमयः प्राण इति ह्यम्मयत्वात्प्राणस्य प्राण
शब्देनापो वक्तुं युज्यन्ते राद्धान्तस्तु अन्नमयं हि सोम्य मनः आपोमयः प्राण इति मनःप्राणयोर्न तत्प्रकृतित्वमुच्यते अपितु तदा
प्यायनं अहंकारिकत्वान्मनसः प्राणस्य चाकाशप्रकृतित्वात् अतो वाङ्मनसीतिवदुत्तरान्मनः प्राण इति शब्दात्सर्वेन्द्रिययुक्त
मनः प्राणे संयुज्यते सोऽध्यक्षे तदुपगमादिभ्यः स प्राणः किं तेजसि संयुज्यते उत जीव इति संशयः प्राणस्तेजसीति वचनात्तेज
स्येवेति पूर्वपक्षः राद्धान्तस्तु उत्क्रान्तो प्राणस्य जीवोपगमादिश्रुतेः प्राणः करणग्रामं जीवे संयुज्यते एतदविरोधाय जी
वे संयुज्य पश्चात्तेजःसंयोगं प्राणस्तेजसीति वदति श्रूयते हि प्राणस्य जीवोपगमादयः एवमेवात्मानमन्तकाले सर्वे प्राणा
अभिसमायन्ति तमुत्क्रामन्तं प्राणोऽनूत्क्रामति कस्मिन्त्वा प्रतिष्ठते प्रष्ठास्यामित्यादिषु भूतेषु तच्छ्रुतेः नैकस्मिन्दर्शय
तो हि० प्राणस्तेजसीति किं तेजोमात्रे प्राणः संयुज्यते उत भूतान्तरसंसृष्ट इति संशयः तेजसीति वचनात्तेजोमात्र इति पूर्वप राम
क्षः पृथिवीमय इत्यादिना संचरतो जीवस्य सर्वभूतमयत्वश्रुतेः त्रिवृत्करणश्रुतेस्तिसृणां च तेजस एकस्याकार्यत्वा(८२

लासाधुकृत्यासेवनद्विषयमेकेचांशाश्रितानांसुहृदःसाधुकृत्यामितिवचनं विदुषोंऽचारोपणात्नाद्यापिसिद्धयेनुष्ठितंपुण्यकर्म
स्मिनविद्यायाफलप्रविनाशस्मृतिस्तद्विषया। अनुष्ठितस्यकर्मणःफलप्रतिबंधसंभवपूर्वकिंस्मारयति यदिवाविद्ययेतिहि उक्तंक्षुद्रो
पविद्यायाः कृतेः कर्मान्तरप्रतिबंधाभावःफलामिति अतःप्रतिबंधफलासाधुकृत्येवानादिकालप्रवृत्ता। भोगेनत्वितरेक्ष
पयित्वाथसंपद्यते। इतरेऽनारब्धकार्येपुण्यपापेकिंविद्यायोनिष्ठारीरावसानेउततच्छरीरावसानेशरीरान्तरावसानेवेति
यमइतिप्राप्तेयःयावन्नविमोक्षेऽथसंपत्स्यइतिसंपत्तेःशरीरविमोक्षमात्रविलंबश्रुतेस्तच्छरीरावसानेइतिपूर्वपक्षःरा
द्धांतस्तुअनारब्धफलयोःकर्मणोर्भोगेनैवक्षपयितव्यत्वाभिप्रायेण यावन्नविमोक्षेथसंपत्स्येइत्युच्यतेशरीरतंत्रकर्मवि
षयोहिबंधमोक्षौ अतःप्रारब्धफलेपुण्यपापेयावताशरीरेणसमापनीयेतावताक्षपयित्वाथसंपत्स्येइत्युनियमएव
सूत्रंचव्याख्यातम्॥ ॥इतिश्रीभगवद्रामानुजविरचितेवेदांतदीपेचतुर्थाध्यायस्यप्रथमःपादः॥१॥ वाङ्मनसिदर्श
नाच्छब्दाच्च। अस्यसोम्यपुरुषस्यप्रयतोवाङ्मनसिसंपद्यतेमनःप्राणइत्यादिकोक्तोतिविषया॥ यतोकिंवावागिंद्रियं
मनसिसंपद्यतेउतवाग्वृत्तिमात्रमितिसंशयः वाचोमनःप्रकृतित्वाभावात्स्वरूपलयस्तत्रनसंभवतीतिवाग्वृत्तिमात्रमिति
प्रायमितिपूर्वपक्षः राद्धांतस्तु अकारणेसंपत्त्यभावस्यवाग्वृत्तावपितुल्यत्वाद्दर्शनात्वाङ्मनसीतिवाक्स्वरूपस्येवसं
पत्तिशब्दाच्चस्वरूपमेवसंपद्यतेअकारणेलयाभावात्संपत्तिशब्दःसंयोगाभिप्रायःसूत्रंचव्याख्यातम् अतएवसर्वा

सूक्ष्मशरीरवस्योपलब्ध्येश्च विदुषोऽर्चिरादिकया गमनागच्छतश्चेदं समासं वा देयि अपरिज्ञपनेतं प्राणवृत्त्यादिनादिना नो
पमर्द्दनात्तः अतउक्तोऽद्वैतुकलापात् अयमयमिति नाम वर्त्मेति वचनेन देहसंबंधोपमर्द्दनामन्तत्त्वं वदन्ति अपितु उक्त
वे॰टी॰ मेवोपासनारंभं वर्त्तीत्यर्थः एवं वचोपपत्तेरूपमा अस्य सूक्ष्मशरीरस्य विद्यमानोपपत्तेश्च न देहसंबंधोपमर्द्दनेन उ
८३ पलभ्यते सुतकमत्तो विदुषः कश्चिदूष्मा सूक्ष्मदेहगुणः न च स्थूलदेहगुणः अन्यत्रानुपलब्धेः अतो विद्वान् सूक्ष्मशरी
रेणोत्क्रामति॰ प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषां स एतास्तेजोमात्राः समारभ्य इति तु कामयमानः इत्येतेन
82 विदुषा उत्क्रांति प्रकारं लोकांतरगमनं पुनरावृत्तिं चाभिधाय तस्याकामयमान इत्यादिना न तस्य प्राणा उत्क्रामंतीति ब्र
ह्मैव सन्ब्रह्माप्येतीति विदुष उत्क्रांति प्रतिषेधात् उक्तप्रकारेणोपपद्यत इति चेन्न शारीरात् प्राणानामविश्लेषोऽ
नेनोच्यते तस्याकामयमानस्य विदुषः शारीरस्य प्राणास्तस्मान्नोत्क्रामंति देवयानेन गमनात्सहैव तिष्ठंतीत्य
यमर्थः स्पष्टो ह्येकेषाम् माध्यंदिनशाखिनां पाठे योऽकामो निष्काम आप्तकामः आत्मकामः न तस्मात्प्राणा
उत्क्रामंतीति स्मर्यते च विदुषो मूर्द्धन्यनाड्योत्क्रांतिः ऊर्द्ध्वमेकः स्थितस्तेषां यो भित्वा सूर्यमंडलं ब्रह्मलोकमति
क्रम्य तेन याति परांगतिमिति तानि परे तथा ह्याह प्राणस्तेजसि नितेजः शारदानि दिष्टानि भूतानि जीवपरिष्वक्तानि(साम
किं परस्यां देवतायां संपद्यंत उत यथाकर्म यथाविद्यं संश्लिष्टमिति संशयः तदानीं सुखदुःखभोगाद्यभावेन संपत्ति प्र ८३

मत्वात् भूतान्तरसंसृष्ट इति राद्धान्तः सूत्रद्वयं च व्याख्यातम् समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य इयमुत्क्रान्तिः किं वि
द्वदविदुषोः समाना उताविदुष एवेति संशयः विदुषोऽत्रैवास्य ब्रह्मप्राप्तिश्रुतेरविदुष एवेति पूर्वपक्षः अपेते हि विदुषोऽत्रैव ब्र
ह्मप्राप्तिः यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते इति राद्धान्तस्तु विदुषोऽर्चिरादि
कयैव ब्रह्मप्राप्तिः अर्चिरादिगत्युपक्रमात्प्रागियमुत्क्रान्तिर्विद्वदविदुषोः समाना गतिश्रुतेः मूर्द्धन्यनाड्या शतं चैका च
हृदयस्य नाड्यः तासां मूर्द्धानमभिनिःसृतैका तयोर्द्ध्वमायन्नमृतत्वमेति इति श्रुतेः यदा सर्वे प्रमुच्यन्ते इत्यनेन गतिश्रु
त्यविरोधाय पाऽमृतत्वसाधनभूतोपासनानिष्पत्तिरुच्यते हृदि स्थिताः कामा यदा प्रमुच्यन्ते तदेवोपासनारंभान्मर्त्यो
ऽमृतो भवति अत्र कामविमोकपूर्वविद्यास्थितो मर्त्योऽर्चिरादिकया गत्या ब्रह्म समश्नुते इत्यर्थः सूत्रार्थः सृतिः गतिः आसृ
त्युपक्रमात् उत्क्रान्तिर्विदुषोऽपि समाना विदुषोऽर्चिरादिगतिश्रुतेः अथ मर्त्योऽमृतो भवतीत्युक्तममृतत्वं च अ
नुपोष्यैव अदग्ध्वैव शरीरेन्द्रियादिसंबंधमुपासनारंभपरिकररूपमित्यर्थः तदापीतेः संसारव्यपदेशात् तदमृतत्वमु
क्तप्रकारमेव कुतः आपीतेः संसारव्यपदेशात् आपीतिः ब्रह्मप्राप्तिः अर्चिरादिकया गत्या देशविशेषं गत्वा यावत् ब्र
ह्मप्राप्त्यनेतावत्संसारः शरीरसंबंधो हि व्यपदिश्यते गतिव्यपदेशादेव शरीरादुत्क्रान्तस्य कथं शरीरसंबंध इत्याह
सूक्ष्मं प्रमाणतश्च तथोपलब्धेः सूक्ष्मशरीरमनुवर्तते गतिव्यपदेशात् न केवलं गतिव्यपदेशादेव प्रमाणतस्तथा

वे०टी० ८५ एवं परमपुरुषप्रकाशितद्वारः शताधिकया गच्छति तस्याः शिखाया मध्ये परमात्मा अवस्थितः सर्वस्य चाहं हृदि संनिविष्ट इति
हार्दः परमात्मा ॥ रश्म्यनुसारी ॥ अथ यत्रैतस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रमत इति विद्वान् रश्म्यनुसारी
गच्छतीति नियमः संभवति नेति संशयः निशि मृतस्य विदुषः आदित्यरश्म्यनुसारित्वं असंभवादनियम इति पूर्वपक्षः वचनं तु पक्ष
माश्रमनुवदति सिद्धांतस्तु पक्षमात्मानुवादे अथैतैरेवेत्येवकारविरोधः न च निशि रश्मयो न संभवंतीति संसेवति निशापि नि
दाघसमये ऊष्मोपलब्धेः सूक्ष्माः संतीति रश्म्यनुसारी गच्छति हेमंते नुपलब्धिर्दुर्दिनवदभिभवात् निशायां मृतस्येति चेन्न सं
83 बंधस्य यावद्देहभावित्वाद्दर्शयति च ॥ विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति नेति संशयः दिवा च शुक्लपक्ष उत्तरायण एव मु
मूर्षतां प्रशस्तानि विपरीतं तु गर्हितं इति निशामरणस्य गर्हितत्वेनाधोगतिहेतुत्वान्न ब्रह्मप्राप्तिः संभवतीति पूर्वपक्षः
सिद्धांतस्तु विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशश्रुतेः प्रारब्धस्यापि कर्मणः चरमदेहावधित्वाद्बंधकत्वाभावा
त् निशि मृतस्यापि ब्रह्मप्राप्तिरस्त्येवेति अविद्वद्विषया निशामरणनिंदा सूत्रार्थः निशि मृतस्य न ब्रह्मप्राप्तिरिति चेन्न सं
बंधस्य यावद्देहभावित्वात् अनारब्धकार्यकर्मसंबंधस्य विद्यया विनष्टत्वात् आरब्धकार्यकर्मसंबंधस्यापि यावच्च
रमदेहभावित्वात् संबंधहेतुभावेन ब्रह्मप्राप्तिरस्त्येवेत्यर्थः तदेतत् श्रुतिरेव दर्शयति तस्य तावदेव चिरं यावन्न विमोक्ष्ये राम ८५
ऽथ संपत्स्य इति ॥ अतश्चायनेपि दक्षिणे ॥ दक्षिणायने मृतस्य विदुषो ब्रह्मप्राप्तिरस्ति नेति संशयः अथ यो दक्षिणे प्रिय

योग्यताभावात् यथा कर्मेण प्राप्तियमिति पूर्वपक्षः सर्वस्य परदेवताकार्यत्वेन तदात्मकत्वात् गंतव्यस्थानमिदं परस्यां देवतायां
मित्युच्यते राद्धांतस्तु तानि परेस्मिन् ब्रह्मणि संपद्यंते तेजः परस्यां देवतायामिति श्रुतेः तथा श्रुतिः विश्रमस्थानत्वे कार्यं परि
कल्प्यमित्यर्थः सूत्रं च व्याख्यातम् अविभागो वचनात् सेयं परमात्मनि संपत्तिः प्राकृतप्रलयवत् कारणापत्तिरूपा उत
मनःप्रभृतिसंपत्तिवत् अविश्लेषमात्रमिति संशयः परमात्मनः कारणत्वात् तत्संपत्तिवचनाच्च कारणापत्तिरेवेति पूर्व
पक्षः राद्धांतस्तु वाङ्मनसि संपद्यत इति श्रुतस्यैव संपत्तिपदस्य सर्वत्रानुषंगात् अनेकत्रानुषंगस्याभिधानवैरूप्ये प्रमा
णाभावादत्राप्यविभागः अविश्लेष एवोच्यते सूत्रं च व्याख्यातम् तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् (
च्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ० शतं चैका च हृदयस्य नाड्यः तासां मूर्धानमभिनिःसृतैका त
योर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या निष्क्रमणे भवंतीति शताधिकया मूर्धन्यानाड्या विदुषो गमनमिति नियमः सं
भवति नेति संशयः नाडीनामतिसूक्ष्मत्वेन दुर्विवेचत्वान्नियमो न संभवतीति पा६ छ्वी कीर्तयामं ती मनु वदतीदं
वचनमिति पूर्वपक्षः राद्धांतस्तु परमपुरुषाराधनभूतया विद्यया तद्गमनतत्त्वचिंतनेन च प्रीतेन परमपुरुषेण
नुगृहीतो जीवः तदग्रप्रकाशितद्वारस्तयैव मूर्धन्यनाड्या गच्छतीति सूत्रार्थः हार्दपरमपुरुषाराधनविद्यासामर्थ्यात् तच्छेष राम
गत्यनुस्मृतियोगाच्च प्रीतेन हार्देनानुगृहीतो भवति तत्र तदोको जीवस्य स्थानं हृदयं तदग्रज्वलनं प्रकाशितो नागंतव्यमि (

वे॰दी॰ ८५

84

विद्युतं तत्पुरुषोऽमानवः स एतान्ब्रह्म गमयति एष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तंते इ(
ति बृहदारण्यके य एवमेतद्विदुर्ये चेमेऽरण्ये श्रद्धां सत्यमुपासते तेऽर्चिषमभिसंभवंति अर्चिषोहरह्न आपूर्यमाणपक्ष(
मापूर्यमाणपक्षाद्यान्षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोकं देवलोकादादित्यं वैद्युतं वैद्युतात्पुरुषो मा मानस्या
नवः स एतान्ब्रह्मलोकान्गमयति तत्रैव पुनर एषा यदा वै पुरुषोऽस्माल्लोकात्प्रैति स वायुमागच्छति तस्मै स तत्र वि(
जिहीर्षते यथा रथचक्रस्य खं तेन स ऊर्द्ध आक्रमते स चंद्रमसमागच्छति तस्मै स तत्र जिहीर्षते यथा दुंदुभेः खमित्यादि
तेषां ब्रह्मप्राप्तौ नैरपेक्ष्यमवगतेर्वार्चिरादिना वेति विकल्प इति पूर्वपक्षः राद्धांतस्तु सर्वत्रार्चिराद्यंतर्भूतादित्यादीनां
दर्शनात्सर्व एवैते प्रत्यभिज्ञानात् अन्यत्रोक्तानामन्यत्रोपसंहाराच्च सर्वत्रार्चिरादिरेक एव मार्ग इति तेनैव गच्छंति विद्वा
न्सूत्रार्थः अर्चिरादिनैव गच्छंति कुतः तत्प्रथितेः तत्प्रथितिः प्रसिद्धिः सर्वत्र तत्प्रत्यभिज्ञानादित्यर्थः वायुशब्दाद्वि
शेषाभ्याम्॰ तेऽर्चिषमभिसंभवंत्यर्चिषोहरित्यारभ्य मासेभ्यः संवत्सरं संवत्सरादादित्यमिति छांदोग्ये पठ्यते तत्र
संवत्सरादित्ययोर्मध्ये देवलोको वायुश्च श्रुतौ श्रुत्यंतरे द्वयोः प्रकरणयोः तत्र किं देवलोको वायुश्चार्थांतरभू
तावुत वायुरेक एवेति संशयः शब्दभेदादर्थांतरभूताविति पूर्वपक्षः अर्थांतरत्वे सति देवलोकादादित्यमिति दे राम ८५
वलोकस्य चैतेन सह ऊर्द्ध आक्रमते स आदित्यमिति वायोश्च देवलोकाद्वायोश्च आदित्यात्पूर्वत्वेन श्रौतत्वात्मतिर्दि

न पितॄणामेव महिमानं गत्वा चंद्रमसः सायुज्यवचनं विदुषो ब्रह्मलोके विश्रामस्थानमात्रविषयं सा न तिष्ठचनं तत्तिदुर्वायमिव
सूत्रार्थः अतो हेतोर्निशि मृतस्य ब्रह्मप्राप्तिः तत एवं धहे भावाद्दक्षिणायने मृतस्यापि ब्रह्मप्राप्तिरस्त्वेव यत्र काले त्वनावृत्तिमि
त्तिमरणकालविशेषस्य स्मर्यते इति चेत्तत्राह। योगिनः प्रति स्मर्यते स्मार्ते चैते। योगिनो ब्रह्मनिविष्टान् प्रत्येते देवयानपितृ
याने गती स्मार्ते स्मर्येते चैते स्मार्ते स्मृतिविषयभूते अहरहः स्मर्तव्ये स्मर्येते इत्यर्थः यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिन
इत्यादिना नैते सृती पार्थ जानन् योगी मुह्यति कश्चन तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन इत्यंतेन न तु मुमुक्षूणां ति
कालविशेषोपादानं स्मर्यते आतिवाहिकगणस्य कालाभिमानिदेवताभूयस्त्वेन यत्र काल इत्युच्यते इति श्रीभगव
द्रामानुजविरचिते वेदांतदीपे चतुर्थाध्यायस्य द्वितीयः पादः॥२॥ अर्चिरादिना तत्प्रथितेः॥ ॥किं विद्वानर्चिरा
दिना केन मार्गेण गच्छति उत तेन वान्येनेति संशयः तदर्थं परीक्ष्यते सर्वासु श्रुतिषु अर्चिरादिगतिरेवाम्नायते उत तत्रा
न्या इति यदा अर्चिरादिरेव सर्वत्र तदा तेनैव गच्छति यदा तत्रान्या तदा तेन वान्येन वा छांदोग्यवाजसनेयकादिषु ना
नाविधा गतिप्रकाराः श्रूयंते छांदोग्ये यथा पुष्करपलाश आपो न श्लिष्यंते एवमेवंविदि पापं कर्म न श्लिष्यत इत्यु
पक्रम्य ब्रह्मविद्यामुपदिश्याम्नायते अथ यदु चास्मिन् शव्यं कुर्वंति यदु च नार्चिषमेवाभिसंभवंत्यर्चिषो हरह्न आ
पूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङेति मासांस्तान्मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चंद्रमसं चंद्रमसो

ति संशयः अमुकरहंगवानतः पर्वतमित्याति देशिकोपदेशात् एकादर्शनात् मार्गचिन्हभूता इति पूर्वपक्षः राद्धांतस्तु स एनान्
वे०टी० ८६ ब्रह्म गमयतीति वैद्युतपुरुषस्य गमयितृत्वदर्शनादितरेषां चाविशेषनिर्दिष्टानां स एव संबंध इति निश्चीयते अग्निलोकमि
त्यादि लोकशब्दोपि भोगाभावात् गमयितृत्व एवोपपद्यते सूत्रार्थः आतिवाहिकाः विदुषामतिवाहे परमपुरुषेण नियु
क्ताः अर्चिरादयोभिमानिदेवताविशेषाः गमयितार इत्यर्थः स एनान् गमयतीति लिंगात् वैद्युते वरुणस्तच्छ्रुतेः ततो विद्यु
तोपरिष्टात् वैद्युतेन विदुषो गमनं तच्छ्रुतेः स एनान् ब्रह्म गमयतीति तस्यैव श्रुतेः वरुणादीनां तदनुग्राहकत्वेन गमयितृत्वमिति
85 निश्चीयत इत्यर्थः ० कार्यं बादरिरस्य गत्युपपत्तेः ० किमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान् नयति उत परं ब्रह्मोपासी
नान् अथ प्रत्यगात्मानं ब्रह्मात्मकत्वेनोपासीनां श्च इति संशयः कार्यं हिरण्यगर्भमुपासीनानिति पूर्वपक्षः तेषामेव गत्युप
पत्तेः नहि परिपूर्णं सर्वगतं परं ब्रह्मोपासीनानां तत्प्राप्तये गतिरुपपद्यते नित्यप्राप्तत्वात् अविद्यानिवृत्तिरेव तेषां कार्याव
रमेवोपासीनानित्यपरपक्षः स एनान् ब्रह्म गमयतीति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् अविद्यानिवृत्तेः फलाभिसंधिरहितयज्ञा
द्युपेक्षत्वात् श्रवणाद्युपेक्षत्वाच्च गति स्थानदेशविशेषापेक्षत्वाच्च विद्याया इति निश्चीयते राद्धांतस्तु परमुपासीनानस्मान्नयति
तद्य इत्थं विदुर्ये चेमेरण्ये श्रद्धां तप इत्युपासते ते अर्चिषमभिसंभवंतीति पंचाग्निविदां परब्रह्मोपासीनानां चाभेदेनार्चिरादि राम
गतिश्रुतेः पंचाग्निविदो हि प्रकृतिवियुक्तं ब्रह्मात्मकात्मस्वरूपविदस्तेषां च ब्रह्मैव प्राप्यमनिवर्तंते परं ब्रह्मोपासीनास्तु ८६

ष्टत्वाद्देवलोके वायुमध्ययेष्ठं क्रमेण निवेशयितव्यौ नन्वान्तमस्तु वायुरेव देवलोकनिर्दिष्ट इति न तस्मादग्नेः देवानां लोक इति हि देव।
लोकः देवानां वासस्थानं देवलोकशब्देनाविशेषेण निर्दिष्टं योऽयं पवत एष एव देवानां गृहा इति वायोर्देवानां वासस्थानत्वेन श्रुतत्वा
दविशेषनिर्दिष्टो देवलोको वायुरेवेति निश्चीयते इति संवत्सरादूर्ध्वं वायुर्वायोरादित्यमिति क्रमस्थापनात्तत्रार्थः अब्दात्संवत्
सरादूर्ध्वमादित्यात्पूर्वं वायुमेव निवेशयेत् देवलोकवायुशब्दाभ्यामविशेषविशेषाभ्यां वायोरेकस्यैव निर्दिष्टत्वात् देवानां वा
सस्थानमित्यविशेषेण हि देवलोकशब्दो वायुं देवानां वासस्थानमभिदधाति वायुशब्दस्तमेव विशेषेणेति द्वयोः प्रकरणद्व
यविहितयोरेकत्वादित्युक्तं भवति॥ तडितोऽधि वरुणः संबंधात्॥ छांदोग्यवाजसनेयककौषीतकिप्रभृतिष्वाम्नातस्यार्चिरादि
मार्गस्यार्चिरहरापूर्यमाणपक्षोत्तरायणसंवत्सरो वाय्वादित्यचंद्रविद्युद्वरुणेन्द्रप्रजापतिरूपोपहारस वायुपर्यंतस्य पूर्व
स्यादिभिः क्रमप्रकार उक्तः वरुणेंद्रप्रजापतीनां किं विद्युत उपरि निवेशः उत वायोरुपरीति संशयः स वायुलोकं स वरुणलो
कमिति कौषीतकीपाठक्रमेण वायोरुपरि वरुणस्य निवेशः इन्द्रादेरपि वरुणनिवेशाय वाय्वादित्ययोः क्रमस्य बाधित
त्वात् तत्रैव वरुणो परीति पूर्वपक्षः राद्धांतस्तु विद्युतो मेघोदरवर्तित्वेन विद्युद्वरुणयोर्लौकिके वेदे च संबंधावगमात्पाठक्रमाद
र्थक्रमस्य बलीस्त्वेन वरुणस्य विद्युतः उपरि निवेशः कार्य इन्द्रादेरपि वरुणनिवेशाय विद्युतो व्यवधानसहत्वदर्शनाद्वरुणो
परि निवेशः सूत्रं च आरभ्यानम्॥ आतिवाहिकास्तल्लिंगात्॥ किमर्चिरादयो विदुषो ब्रह्मलोकप्राप्तौ मार्गचिन्हभूता उत गमयितारः इ

प्रत्यभिसंधिः प्रजापतेः सभां वेश्म प्रपद्यते इत्यभिसंधिश्रुतकार्यं धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीत्य
वे॰टी॰ ८१ कृतं ब्रह्मलोकमिति तस्यैव विशेषितत्वात् यशोऽहं भवामीति ब्राह्मणानामिति सर्वात्मभावाभिसंधानाच्च॰ अप्रतीकालंबनान्न।
यतीति बादरायण उभयथा च दोषात् तत्क्रतुश्च कार्यमुपासीनानेवेति न पक्षः परमेवोपासीनानिति चायमपि नियमो न सं।
भवति कुतः उभयथा च दोषात् कार्यमुपासीनानिति पक्षे अस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यते इत्यादिकाः श्रुतयो ये चेमेऽरण्ये श्रद्धां तप इत्युपासते इति च प्रकुप्येयुः परमेवेति नियमे तु य इत्थं विदुरिति प्रकुप्येत तस्मा
86 दप्रतीकालंबनान्नयतीति भगवान् बादरायणो मन्यते प्रतीकावलंबनास्त्वचिन्त्यमिश्रं केवलं वा वस्तु च सिंहादेवरत इति।
वत् ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तु य उपासते प्रतीकालंबनास्तद्व्यतिरिक्ताः सर्वकारणं समस्तं कलं निखिलहेयप्रत्यनीका
नवधिकातिशयानंदस्वरूपं ब्रह्म उपासते ये च प्रत्यगात्मानं भूतसूक्ष्मैः संपरिष्वक्तं सर्वत्र वर्तमानं भूतसूक्ष्मव्यति।
रिक्तानेकस्वरूपं निर्विकारं य आत्मनि तिष्ठन् इत्यादि सर्वान्तं ब्रह्मभावं पञ्चाग्निविद्योदितमुपासीनास्तान् उभयविधान्नयति
तत्र य इत्थं विदुर्ये चेमेऽरण्ये इत्युभयपक्षे ततः तत्क्रतुन्यायः यथाक्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवतीत्युभयेषामे
वापुनरावृत्तिः संभवति अचिन्त्यमिश्रं केवलं चिद्वस्तु चोपासीनानां तत्क्रतुन्यायेनैव पुनरावृत्तिस्वर्जनीया विशेषं च द। राम ८१
र्शयति प्रतीकायुक्तलक्षणमचिन्त्यमिश्रमचिद्वस्तु चोपासीनानां सर्वेषां गतमपेक्ष्य परामितफलम् विशेषं च दर्शय

यथावस्थिते परं ब्रह्म प्राप्य न पुनर्निवर्त्तंते न च द्वयं विदुर्ये चेमेरण्ये श्रद्धां तप इत्युपासते अर्चिषमभिसंभवंति इति उभयविधानभेदेनो
पारायणेर्चिरादिगतिश्रुतेः पुनरावृत्तिश्रुतेश्च एवं इति निर्णीयते सूत्रार्थः कार्य्यं हिरण्यगर्भमुपासीनमातिवाहिको गणो नयतीति
वादरिराचार्य्यो मन्यते अस्यैव गत्युपपत्तेः परमुपासीनस्य हि न तत्प्राप्त्यर्थं गतिरुपपद्यते सर्वगतत्वात्परस्य ब्रह्मणः॰ विशेषितत्वाच्च
पुरुषो मानव एत्य ब्रह्मलोकान्गमयतीति प्रजापतेः सभां वेश्म प्रपद्ये इति च प्राप्यस्थानस्य विशेषितत्वाच्च हिरण्यगर्भमुपासी
नमेव नयति॰ सामीप्यात्तु तद्व्यपदेशात् एवं निश्चिते सति एनान्ब्रह्म गमयतीति हिरण्यगर्भस्य ब्रह्मव्यपदेशो ब्रह्मसामीप्यात्
यो ब्रह्माणं विदधाति पूर्वमिति हि सामीप्यं विद्यते॰ कार्य्यात्यये तदध्यक्षेण सहातः परमभिधानात् हिरण्यगर्भप्राप्तावपि अ
पुनरावृत्तिरुपपद्यते कार्य्यस्य हिरण्यगर्भलोकस्यात्यये तदध्यक्षेण हिरण्यगर्भेणाधिकारिपुरुषेण विदुषा सह परप्राप्त्यभिधा
नात् ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे इति॰ स्मृतेश्च॰ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे परस्यांते कृ
तात्मानः प्रविशंति परं पदमिति स्मृतेश्चावगम्यते॰ परं जैमिनिर्मुख्यत्वात्॰ परं ब्रह्मोपासीनमेव नयत्यातिवाहिको गण इ
ति जैमिनिराचार्य्यो मन्यते ब्रह्म गमयतीति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् ब्रह्मलोकानिति शब्दश्च ब्रह्मैव लोको ब्रह्मलोकः
इति कर्मधारयपरिग्रहस्यैव न्याय्यत्वादुपपद्यते एवं निश्चिते बहुवचनं चादिभिः पाशानितिवदुपपन्नं॰ दर्शनाच्च॰ अस्माच्छ
रीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इत्यर्चिरादिनागतस्य परं ब्रह्मप्राप्तिं च दर्शयति च न च कार्ये

निःसंशयः स्व स्वरूपस्य सुषुप्त्यादौ तिरानंदत्व शर्दनात् स्वरूपमात्रस्य नित्याविर्भूतत्वाच्च साध्येन रूपेणैव केनानरूपेण संबध्य
नेन वेंचहि निष्पद्यते इति संगच्छते परंज्योतिरूपसंपन्नस्य ह्यानंदित्वं श्रूयते रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवति स एको
वे०टी० ब्रह्मण आनंदः श्रोत्रियस्य चाकामहतस्य इत्यादिश्रुतेः साध्येन रूपेणेति पूर्वपक्षः राद्धांतस्तु स्वेन रूपेणाभिनिष्पद्यत इति
८८ विशेषणात्स्वरूपाविर्भावरूपस्य चापहतपाप्मत्वादिगुणकतया प्रजापतिवाक्योदितस्य कर्मकृतदेहसंबंधतिरोहित
स्य परंज्योतिरूपसंपन्नस्य सूक्ष्मदेहविनिर्मुक्तस्य संकुचितज्ञानादिगुणकस्य स्वरूपाविर्भावात्स्वयाथात्म्यानुभवपूर्वकान
87 वधिकातिशयानंदब्रह्मानुभवः संपत्स्यते इति चोपपन्नतरं सूत्रार्थः नादिगुणकस्य स्वरूपाविर्भावात्स्वे परंज्योतिरूप
संपद्य स्वस्वरूपाविर्भावात्प्रतिपाद्यते कुतः स्वेनशब्दात् साध्यस्यापि रूपस्यासाधारणत्वेनेति विशेषणं ह्यनर्थकं
स्व स्वरूपमात्रस्याहं जानामीति नित्याविर्भूतत्वेन परंज्योतिरूपसंपद्य इत्यनर्थकं इत्याशंक्याह॥ मुक्तः प्रतिज्ञानात्॥
कर्मबंधनकृतदेहाद्देर्मुक्तस्वरूपमात्रं स्वेन रूपेणाभिनिष्पद्यत इत्युच्यते कथमिदमवगम्यते एवं त्वेवैते भूतोनुव्या
ख्यास्यामीति कर्महेतुकदेहसंबंधनकृतजागरितादि अवस्थाविनिर्मुक्तस्वरूपस्यात्र वक्तव्यतया प्रतिज्ञानात् एवमपि स्वस्वरू
पमात्राविर्भावस्य पुरुषार्थत्वं न सिद्ध्यतीत्याशंक्याह॥ आत्मा प्रकरणात्॥ देहादिविनिर्मुक्तस्वरूपेणावस्थित आत्मा अपहत राम ८८
हतपाप्मत्वादिसत्यसंकल्पपर्यंतगुणकः तस्यैवाविर्भाव उच्यते कुतः प्रकरणात् य आत्मापहतपाप्मेति प्रकृतस्य

नि० भू० नि: पावन्नामिनोनेनागतं तत्रास्य य पाकामच्चा शेम वति इत्यादिका अतो ब्रह्मणा सह ते सर्वे इति वचनं नाचिरादिनागतानां
गतिप्रकारविषयं अर्चिरादिनागतानां देहावसानसमय एव मुक्तत्वं उक्तं तयोर्ना शास्त्रि रण्यगर्भलोकप्राप्तिर्ब्रह्मसनतवस्थभो
गानुभवहेतुत्वभावात् क्रतुन्यायविरोधात्तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाश्च न ह्येवं तत्तु पुण्यकर्मविशेषेण हिरण्यगर्भ
लोकं प्राप्तानां तदुपर्यपि वादरायण इति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषयं यत्तेव ब्रह्मलोक इति तु ब्रह्म
लोकशब्दस्य कर्मधारयवृत्त्या ब्रह्मविषयत्वात् ब्रह्मण एवोपास्य वर्तमानाः परान्तकाले चरमदेहावसानसमये परामृ
तात् परस्माद्ब्रह्मणः उपासनप्रीतात्तद्धेतोः परिमुच्यन्ति सर्वे इत्याद्यधिमुमुक्षन्त इति वेदान्तविज्ञानसुनिश्चितार्थाः इति प्र
करणात् एवं गम्यते तत्य इत्थं विदुरिति पंचाग्निविदो ब्रह्मप्राप्त्यपुनरावृत्तिश्रवणात् किं तु न्यायेनाचिद्वियुक्तब्रह्मात्मकात्म
स्वरूपोपासीनं विवक्षितमिति निश्चीयते तेन येव तत्र श्रुतिरपि इति तु पंचमामाहुतावापः पुरुषवचसो भवंतीति रमणी
यचरणा इति च कर्महेतुकमनुष्यादिभावो भूतांतरसंसृष्टानामिति चिद्विवेकं प्रतिपाद्य य इत्थं विदुरिति भूतस
क्ष्मव्यतिरिक्तात्मस्वरूपोपासनमेव विद्यते इति ॥ इति श्रीभगवद्रामानुजविरचिते वेदांतदीपे चतुर्थाध्यायस्य तृतीयः पा
दः ३ संपद्याविर्भावः स्वेनशब्दात् एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनि
ष्पद्यत इति किं परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मनः स्वस्वरूपाविर्भावः प्रतिपाद्यते उत कर्मणा नसा येन रूपेण संबंध

यमिति संशयः अपहतपाप्मत्वगुणक इति प्रथमः पक्षः य आत्मा अपहतपाप्मेति प्रतिपादनात् चैतन्यमात्र इति द्वितीयः पक्षः ए
वे॰दी॰ वं वा अरे अयमात्मानन्तरोबाह्यः कृत्स्नः प्रज्ञानघन एव विज्ञानघन एवेत्यवधारणात् राद्धान्तस्तु विज्ञानस्वरूपस्यैवापहतपाप्म
८९ त्वादिगुणकत्व प्रतिपादनादविरोधादुभयस्वरूपं न च विज्ञानघन एवेत्यवधारणं गुणान्तरासह यथा सैन्धवघन एवेत्यवधा
रणेपि रसाश्रयद्रव्यरूपस्पर्शादिगुणान्तरं च सहते रसघन एवेत्यवधारणं तु रसद्रव्यान्तरस्वभाववारणेति परं द्रव्यान्तराणां हि
स्वस्यैकदेशे रसवत्त्वं सैन्धवघनस्य तु सर्वत्र एवमत्रापि वस्तुव्यावृत्त्या स्वभावस्य सगुणस्यात्मनः स्वप्रकाशतावधारणं किंय
ते विज्ञानघन एवेति सूत्रार्थः ब्राह्मेण अपहतपाप्मत्वादिना स्वस्वरूपाविर्भावः अपहतपाप्मेत्युपन्यासात् आदिशब्दात् जक्षत्
88 क्रीडन्रममाण इत्यादिभ्योपि सत्यसंकल्पादयोवगम्यं इति जैमिनिराचार्यो मन्यते ॰ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः
चैतन्यमात्रस्वरूपाविर्भावः विज्ञानघन एवेति तदात्मकत्वावधारणादित्यौडुलोम्याचार्यो मन्यते ॰ एवमप्युपन्यासात्पूर्वभावाद(
विरोधं बादरायणः एवं विज्ञानघनस्वरूपस्यैकस्यैव स्वप्रकाशस्वरूपैव पूर्वेषामपहतपाप्मत्वादिसत्यसंकल्पत्वपर्यन्ताना
मपि य आत्मापहतपाप्मेत्युपन्यासात् सद्भावावगमादुभयोरविरोधं भगवान्बादरायणो मन्यते उभयश्रुत्यवगतस्येतरेतरवि राम
रोधाभावान्नान्यतरबाधे प्रमाणमस्तीत्यभिप्रायः संकल्पादेव च तच्छ्रुतेः परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः ८९
पुरुषः स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा स यदि पितृलोककामो भवति संक(

वंत्वेवते भूयोनुव्याख्यास्यामि इत्यादिनोच्यते अतो पहतपाप्मत्वादिगुणकस्य कर्मारब्धाविद्यातिरोहितस्य परंज्योतिरूपसंपन्नस्य तिरोधा
नस्य आविर्भावः प्रतिपाद्यते: अविभागेन दृष्टत्वात्. किमयं मुक्त आविर्भूतस्वरूपः प्रत्यगात्मा परंब्रह्म स्वात्मनो विभक्तमनुभवति उ
तस्वात्मनोप्यात्मतयाविभागेनाहंब्रह्मास्मीतिसंशयः निरंजनः परमं साम्यमुपैतिसोऽश्नुते सर्वान्कामान्सहब्रह्मणा विपश्चिता इदं
ज्ञानमुपाश्रित्य मम साधर्म्यमागता इति श्रुतिस्मृतिभ्यो विभक्तमुक्तात्मानुभवतीति पूर्वपक्षः राद्धांतस्तु सर्वंखल्विदंब्रह्म ऐतदा
त्म्यमिदंसर्वंतत्सत्यंस आत्मा तत्त्वमसीत्यादि सामानाधिकरण्येन यः पृथिव्यां तिष्ठन् यस्य पृथिवी शरीरं य आत्मनि तिष्ठन् यस्यात्मा
शरीरमित्यादिषु सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरतया ब्रह्मप्रकारतया तत्तद्वाचिशब्दास्तत्पर्यंतविषया इत्यवगम्यात्मेति उ
पगच्छंति ग्राहयंतीतिन्यायेन स्वात्मनोप्यात्मतया अहं ब्रह्मास्मीत्युपासनेन यथावस्थितपरमात्मात्मकस्वात्मनो दृष्टत्वान्मु
क्तात्मनोपि आत्मभूतं ब्रह्माहं ब्रह्मास्मीति अविभागेनैवानुभवतीति सूत्रार्थः अहं ब्रह्मास्मीति अविभागेन ब्रह्मानुभवति मुक्तः र(
स्वात्मनोप्यात्मतयोपासने यथावस्थितपरमात्मकस्वरूपस्य दृष्टत्वात् साधर्म्यश्रुतिस्तु परमात्मशरीरभूतस्य प्रत्यगा
त्मनोपहतपाप्मत्वादिगुणैस्तत्साधर्म्यं प्रतिपादयति सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति ब्रह्मशरीरतया ब्रह्मप्रका
रभूतस्सन्स्वात्मभूतेन ब्रह्मणा सह तद्गुणाननुभवतीति वदति काम्यंते इति कामाः गुणाः सर्वकल्याणगुणविशिष्टं ब्रह्मानुभ
वतीत्यर्थः ब्रह्मणा जैमिनिरुपन्यासादिभ्यः किं जीवस्य स्वाभाविकं रूपमेवापहतपाप्मत्वादिगुणकं उतचैतन्यमात्रं उत अ

आत्मन एकरूपस्य छेद्यस्यैवैविध्यसंभवाच्छरीरद्वारेणहि वैविध्यं ज्ञायते० द्वादशाहवदुभयविधं बादरायणोतः अतः उभयश्रुतेरिच्छात्।
वे०दी० उभयविधं शरीरत्वं अशरीरत्वं च भगवान्बादरायणो मेने द्वादशाहवत् यथा द्वादशाह उभयश्रुतेः सत्रमहीनं च द्वादशा।
९० हमृद्धिकामा उपेयुरिति सत्त्वं द्वादशाहेन प्रजाकामं याजयेदित्यहीनं यथाशरीराद्युपकरणाविनदातानिशरीराद्युपकरणानिस्व
नैवसृष्टानि इति नास्ति नियमस्स्यात् तन्वभावे संधिवदुपपत्तेः स्वेनैवसृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भो
गोपपत्तेः सत्यसंकल्पोपि स्वयं नेसृजति यथास्वप्नेऽथरथान्रथयोगान्पथः सृजत इत्यारभ्य अथवेशं तान् पुष्करण्यः स्रव
न्त्यः सृजते स हि कर्तेति य एषु सुप्तेषु जागर्त्ति कामकामं पुरुषो निर्ममाणः तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते तस्मिंल्लोकाः श्रिताः सर्वे
तदु नात्येति कश्चनेति चेश्वरसृष्टैरथाद्युपकरणैर्जीवो भुंक्ते तथा मुक्तोपि लीला[illegible] तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलार
संभुंक्ते० भावे जाग्रत्वत्० स्वसंकल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणभावे जाग्रन्मुक्तो लीलारसं भुंक्ते परमपुरुषली
लार्थं दशरथवसुदेवादिकं स्वयमेव सृजति कदाचिन्मुक्तः सत्यसंकल्पत्वात्परमपुरुषलीलान्तर्गतं स्वपितृलोकादिकं स्वयमेव सृ
जतीति तदुपपन्नं ननु आत्माणुपरिमाण इत्युक्तं कथमनेकेषु शरीरेषु एकस्याणोरात्माभिमानसंभव इत्यत्राह प्रदीपवदावेशः
तथाहि दर्शयति यथा प्रदीपस्य एकस्य एकदेशवर्तिनः स्वप्रभया अनेकदेशप्रवेशः तद्वदात्मनोपि एकदेशस्थस्य स्वभारूपे राम
णज्ञानेन सर्वदेहेषु यथासंकल्पमात्माभिमानानुगुणव्याप्तिः स्वभावरूपचैतन्येनन० तथाहि दर्शयति श्रुतिः बालाग्रशतभा ९०

89

ल्पादेवास्यपितरस्समुत्तिष्ठन्तीत्याम्नायते किं तेज्ञात्यादयो मुक्तस्य संकल्पादेव भवन्ति उत प्रयत्नांतरसव्यपेक्षात्संकल्पादिति संश
यः लोके राज्ञां सत्यसंकल्पानामपि प्रयत्नांतरसापेक्षत्वदर्शनात्तत्सापेक्षत्वादिति पूर्वपक्षः संकल्पादेवेत्यवधारणं विज्ञान
घन एवेति वत्भविष्यति राद्धांतस्तु संकल्पादेवास्य पितरः समुत्तिष्ठंतीत्यवधारणान्नान्यापेक्षत्वं न चेह सत्यकामत्वाद्युपन्यासवत्
मुक्तस्यान्यापेक्षत्वे प्रमाणमस्ति लोके सत्यसंकल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वं न हि परमपुरुषव्यतिरिक्तः कश्चित्सत्य
संकल्पोस्ति मुक्तश्च तत्प्रसादात्तत्साम्यमुपागतः तथैव सूत्रं व्याख्यातम् ॰ अत एव चानन्याधिपतिः अतः श्रुतेरेव मुक्तोना
न्याधिपतिश्च अनाधिपतित्वं कर्माधीनत्वे अपहतपाप्मा सत्यसंकल्प इति हि श्रूयते अतो मुक्तोनान्याधिपतिः अभावं वादरि
राह ह्येवम् किं मुक्तस्य शरीरेन्द्रियाद्यस्ति उत न अथवा यथा संकल्पमस्ति नवेति संशयः न ह वै शरीरस्य सतः प्रियाप्रिययोर
पहतिरस्ति अशरीरं वा वसंतं न प्रियाप्रिये स्पृशतः इति मुक्तस्याशरीरत्वश्रवणान्नास्त्येवेत्येकः पक्षः स एकधा भवति त्रिधा
भवति स शरीरत्वश्रुतेः शरीरत्वश्रुतिः कर्मगृहीतशरीरविषये शरीरेन्द्रियाद्यस्त्येवेति द्वितीयः पक्षः राद्धांतस्तु मनसैता
न्कामान्पश्यन्रमते य एते ब्रह्मलोक इति अशरीरस्यैव भोगश्रुतेः स एकधा भवतीति श्रुतेश्च यथासंकल्पमस्ति न
वेति सूत्रार्थः एनमाह हि श्रुतिः अशरीरं वावसंतमिति ॰ भावं जैमिनिर्विकल्पाम्नानात् शरीराभावं वादरिर्मेने कुतः वि
कल्पामननात् विविधः कल्पो विकल्पः स एकधा भवति त्रिधा भवतीत्यादिना मुक्तस्य हि विविधः कल्प आम्नायते ॥

नवधिकातिशयानंदब्रह्मानुभवमुक्तस्यसाम्यंब्रह्मणाहि स्वस्यपरस्यचानुभूयमानमविशेषेणानवधिकातिशयानंदयमवतिआनंद
स्वरूपत्वाविशेषात्सूत्रमपिव्याख्यातंप्रत्यक्षोपदेशादितिचेन्नाधिकारिकमंडलस्थोक्तेः॥ प्रत्यक्षः श्रुतिः तस्य सर्वेषुलोकेषुकामचा
वे०द्री० रोभवति इमान्लोकान्कामान्नीकामरूप्यनुसंचरन्नित्यादिश्रुत्यामुक्तस्य॰ जगद्व्यापारोपदेशात्सोपीतिचेन्नआधिकारिकमंडल
८१ स्थोक्तेः आधिकारिकपरमपुरुषेणलोकनियमनाधिकारेप्रयुक्तहिरण्यगर्भादयः तद्भोगभोगेषुमुक्तस्यपदीच्छावर्तते तत्रतत्र
यथाकामंपरमपुरुषानुग्रहेणवर्तमानस्तत्स्थानभोगान्भुंक्त इतितथाश्रुत्यामुक्तेः कामान्नीकामचारोभवति इतिहिश्रूयते
ननुउत्पत्त्यादिविकारवर्तिहेयमिश्रोऽल्पोऽल्पश्चकथंमुक्तस्यभोगोभवतियत इच्छातःसर्वेषुलोकेषुकामचारउच्यते इत्यत्राह वि
80 कारावर्तिचतथाहिस्थितिमाह॰ चशब्दोवधारणेउत्पत्त्यादिविकारेषुनवर्तत इति विकारावर्ति परंब्रह्मैवास्यमुक्तस्यभोग्यं
तथाहिमुक्तस्यस्थितिमाह वादात्स्यैवेषएतस्मिन्दृश्यतेनात्म्येनिरुक्तेनिलयनेऽभयंप्रतिष्ठांविंदतेथसोभयंगतोभवतिरसोवैसःरसंह्येवा
यंलब्ध्वानंदीभवतियतिब्रह्मनिष्ठोब्रह्मैवभवतिब्रह्मैवयंलब्ध्वानंदीभवतीत्यर्थः ब्रह्मनिरतिशयानंदस्वरूपनिरतिशयकल्याण
नंतगुणमनंतमहाविभूतिचमत्सविभूतिचब्रह्मानुभवायाविभूत्येकदेशभूतलोकेषुसंचरतः तत्रतत्रकामचारोभवति इत्यु
च्यते॰ दर्शयतश्चैवंप्रत्यक्षानुमाने॰ उत्पत्त्यादिगतनियमनंपरस्यैवमुक्तस्यतुपरब्रह्मानुभवएवभोग इत्युक्तमर्थंप्रत्यक्षा
नुमानेश्रुतिस्मृतिदर्शयतः तस्माद्वाएतस्माद्वाआत्मनआकाशःसंभूतःभीषास्माद्वातःपवतेएतस्यवाअक्षरस्यप्रशासनेगार्गि राम
सूर्याचंद्रमसौविधृतौतिष्ठतः इत्यादिकाश्रुतिःस्मृतिरपिप्रियोहिज्ञानिनोत्यर्थमहंसचममप्रियः आस्थितःसहियुक्ता ८१

गस्य शतधा कल्पितस्य च भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते इति प्रत्यगात्मनो ह्यणुत्वमेव स्वरूपमिति सूत्रकारमतं नाणुरतत् ।
छ्रुतेरिति चेन्नेतराधिकारादिति परस्यैव महत्त्ववचनात् ननु परब्रह्मप्राप्तस्यान्तरं वा ह्यज्ञानं वा ध्वंदर्शयति श्रुतिः प्राज्ञेनात्मना सं
परिष्वक्तो न बाह्यं किंचन वेद नान्तरं इति कथं मुक्तस्य ज्ञानानन्त्यमुच्यते इत्यत्राह॰ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि॰ नेदं मु
क्तविषयं सुषुप्तिमरणयोरन्यतरापेक्षः आविष्कृतं हि श्रुत्या सुषुप्तिमरणयोर्ज्ञानसंबोधकत्वं मोक्षदशायां सर्वज्ञत्वं च सुषुप्तौ ताव
न्न नाह खल्वयं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवतीति विनाशमदर्शनमित्यर्थः
मरणे चा एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति न पश्यतीत्यर्थः मोक्षे तु स वा एष एतेन दिव्येन चक्षुषा मनसैतान् कामान् पश्यन् रमते य
एते ब्रह्मलोक इति सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः इति च जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च॰ किं मुक्तस्य भोगो नि
खिलहेयप्रत्यनीककल्याणैकतानसकलेतरविलक्षणानवधिकातिशयमहाविभूतिरूपपरब्रह्मानुभव एव जगत्सृष्ट्यादि ।
जगन्नियमनरूपलीलापीति संशयः निरंजनः परमं साम्यमुपैतीत्यादिश्रुतेः जगन्नियमनरूपलीलापीति पूर्वपक्षः राद्धां
न्तस्तु यतो वा इमानि भूतानि जायन्ते सदेव सोम्येदमग्र आसीत् ब्रह्म ह वा इदमग्र आसीत् आत्मा वा इदमेक एवाग्र आसीत् ए
को ह वै नारायण आसीदित्यादिषु परब्रह्मप्रकृतत्वेन जगद्व्यापारः श्रूयते न तत्र तत्र प्रकरणे न मुक्तस्य संनिधिरस्ति अतो जगन्नि
यमनरूपधर्मवर्जं सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितेति सर्गे कोऽब्रह्मण आनंदः श्रोत्रियस्य चाकामहतस्य इति ॥

वे०दी०
९२

91

त्मानमेवानुत्तमां गतिं वासुदेवः सर्वमिति स महात्मा सुदुर्लभ इत्यादिका मुक्तविषया भोगमात्रसाम्यलिंगाच्च सोऽश्नुते सर्वा
न्कामान् सह ब्रह्मणा विपश्चितेति हि मुक्तस्य ब्रह्मानुभवः भोगमात्रवचनात् ब्रह्मसाम्यवचनाच्चालिंगाच्च। जगद्व्या
पारवर्जमित्यवगम्यते चैवमेवेति निश्चीयते यदि नियंतृत्वं परस्यैव तर्हि स्वतंत्रत्वेन मुक्तं परः कदाचित् पुनरावर्तयि
ष्यतीत्याह। अनावृत्तिः शब्दादनावृत्तिः शब्दाच्च। अस्य मुक्तस्यानावृत्तिः शब्दादवगम्यते यथा यतो वा इमानि भूतानि जा
यंते सोऽकामयत बहु स्यां प्रजायेयेति यः पृथिवीमंतरो यमयतीति शब्दात्परमपुरुषस्य सर्वं प्रति नियंतृत्वं चावगम्यते तथा।
येऽतेन यथा प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुन
रावर्तते मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं नाप्नुवंति महात्मानः संसिद्धिं परमां गताः मामुपेत्य तु कौंतेय पुनर्जन्
म न विद्यते इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः सर्गेऽपि नोपजायंते प्रलये न व्यथंति चेति शब्दादेव कदाचिदपि
नावर्तयतीत्यवगम्यते सूत्रावृत्तिः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समंजसम्॥ इति श्रीभगवद्रामानुजाचार्यविर
चिते वेदांतदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः ४ समाप्तोऽध्यायः॥ ॥संवत १७८८ अश्वन शुक्लपुर्णिमां।
२५ कुजवासरे लिषितं श्रीदियालसर्मणे न पठनार्थं श्रीमन्नारायणदासस्य शुभं भवतः नग्रलाडवामध्ये लिखितं॥

राम
९२

प्र० ५

वेदानीपपत्र ९२